24/10/74
Vedas Sacred

ARANYASANHITA

OF THE SAMAVEDA

WITH THE COMMENTARY OF

SAYANA ACHARYA AND A

BENGALI TRANSLATION BY

SATYA BRATA SAMASRAMI.

आरण्य संहिता।

सायणाचार्य्यकृत भाष्य सहिता।

वङ्गानुवादयुताच।

वि, ए, उपाधिधारिणा

श्रीजीवानन्द विद्यासागर भट्टाचार्य्येण

प्रकाशिता।

Calcutta.

PRINTED AT THE DWEIPAYANA PRESS.

1873.

To be had from Pandit Jibananda Vidyasagara B. A. Sanskrit College of Calcutta.

1875
'05

पण्डितकुलतिलक-पूज्यपाद श्रीमत् तर्कवाचस्पति
पाद-प्रणीत-प्रकाशित-पुस्तकान्येतानि

१	आशुबोध व्याकरणम्	...	३।
२	धातुरूपादर्शः	...	२
३	शब्दस्तोम-महानिधि [संस्कृत अभिधान]		१०
४	सिद्धान्तकौमुदी—सरलाटीकासहिता		११
५	सिद्धान्तबिन्दुसार [वेदान्त]	...	॥
६	तुलादानादिपद्धति [वङ्गाक्षरैः]	...	४
७	गयाश्राद्धादिपद्धति	...	१
८	शब्दार्थरत्न	...	॥।
९	वाक्यमञ्जरी [वङ्गाक्षरैः]	...	।
१०	छन्दोमञ्जरी तथा वृत्तरत्नाकर—सटीक		॥=
११	वेणीसंहार नाटक—सटीक	...	१
१२	मुद्राराक्षस नाटक—सटीक	...	१॥
१३	रत्नावली	...	॥।
१४	मालविकाग्निमित्र—सटीक	...	१॥
१५	धनञ्जय विजय—सटीक		।
१६	महावीरचरित	...	१॥
१७	साङ्ख्यतत्त्वकौमुदी—सटीक	...	२
१८	वैयाकरणभूषणसार	...	॥।
१९	लीलावती	...	॥।
२०	बीजगणित	...	१
२१	शिशुपालबध—सटीक	...	६
२२	किरातार्जुनीय—सटीक	...	२॥
२३	कुमारसम्भव—पूर्वखण्ड सटीक	...	१
२४	कुमारसम्भव—उत्तरखण्ड	...	॥
२५	अष्टकम् पाणिनीयम्	...	॥।
२६	वाचस्पत्यम् [संस्कृत-बृहदभिधान]	...	६०

17—2863

आरण्य-संहिता ।

ओं नमः सामवेदाय ।

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥
यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ २ ॥

कृपालुः सायणाचार्यो वेदार्थं वक्तुमुद्यतः ।
आरण्यकाभिधः षष्ठोऽध्यायो* व्याक्रियतेऽधुना ॥ ३ ॥

तत्रेन्द्रेत्यादिकानान्तु पञ्चपञ्चाशतां क्रमात् ।
ऋषिच्छन्दोदैवतञ्च तत्र तत्राभिदध्महे ॥ ४ ॥
तत्राद्याया ऋचो द्रष्टा भरद्वाजः प्रकीर्त्तितः ।
द्वितीयस्य वसिष्ठः स्यात्, तृतीयाया ऋचः स्मृतः ॥ ५ ॥
वामदेवस्ततश्छन्दो बृहतीत्रिष्टुबेव च ।
गायत्रीति क्रमादिन्द्रो भवेत् तिसृषु देवता ॥ ६ ॥

---

* तत्र आर्चिक-ग्रन्था इति विवरणादि-सकल-ग्रन्थ-सम्मता वैदिक-प्रवादानुगताः पुस्तकाद्यन्त-समीक्षणेनोपलब्धव्याश्च । तथाच षड्ध्यायकश्छन्दो नाम एकः, अपरो नवाध्यायात्मक उत्तरः, ताभ्यामन्यत् एषोऽध्यायैकात्मक आरण्य इति व्यवहृतः । सायण-मते तु नैवम् । अयं हि पञ्चोपविभागे रेव छन्दोग्रन्थं परिसमाप्य तस्यैव षष्ठोपभाग एष इति मन्येत ।

प्रथम-खण्डे—

सैषा प्रथमा।

भरद्वाजऋषिः, बृहतीच्छन्दः, इन्द्रोदेवता।

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
ओम्। इन्द्रज्येष्ठन्नआभरओजिष्ठम्पुपुरिश्रवः।

१र २र ३ १ २ ३ १ ३ २र
यदिदृक्षेमवज्रहस्त (१) रोदसीउभेसुशिप्रपप्राः ॥१॥

हे 'इन्द्र'! * 'ज्येष्ठं' प्रशस्यतमम् 'ओजिष्ठम्' अतिशयेन बलकरम् 'पुपुरि' पूरकं 'श्रवः' अन्नं 'नः' अस्मभ्यम् 'आभर' आहर प्रयच्छ। हे 'वज्रहस्त'! वज्रबाहो! हे 'सुशिप्र'! शोभन-हनुक! एवम्भूत! हे इन्द्र! 'यत्' अन्नं 'दिदृक्षेम' धारयितुमिच्छेम, यच्चान्नम् इमे परिदृश्यमाने 'उभे रोदसी' द्यावापृथिव्यौ 'आ पप्राः' आ पूरयसि, तदन्नमाहरेत्यन्वयः ॥१॥

হে দুরাত্মগণের শাস্তা, বজ্রহস্ত এবং সুন্দরহনুমৎ, সাধুগণের দর্শনীয় ঈশ্বর! আমরা যে অন্ন ধারণ করিতে ইচ্ছা করি—যে অন্নে এই পরিদৃশ্যমান, ঊর্দ্ধাধোভাগে পরিবর্ত্তমান, উভয়-লোক পরিপূর্ণ করিতেছ, সেই প্রশস্ত বলকর আশাপূরক অন্ন আমাদিগকে প্রদান কর ॥১॥

---

(१) "येनेमेचित्रवज्रहस्त"—इति बह्वृचां पाठः।

* "इन्दते वैश्वर्य्य-कर्म्मणः"-इति निरुक्तम् ३का० १०अ० ८ख० ईश्वरश्चायमिति तद्भाष्यम्।

अथ द्वितीया ।

वसिष्ठऋषिः, त्रिष्टुप्छन्दः, इन्द्रोदेवता ।

२ ३२ ३ १ २ ३ १र २र ३ २ ३ १ २ ३
इन्द्रोराजाजगतश्चर्षणीनामधिक्षमाविश्वरूपं-
१ २ १ २ ३ २ ३ १ २ ३ २ उ ३ १ २
यदस्य । ततोददातिदाशुषेवसूनिचोदद्राधउपस्तुतं
३ २
चिदर्वाक् ॥ २ ॥

यः 'इन्द्रः' 'जगतो' जङ्गमस्य पश्वादेः यतो 'राजा' ईश्वरो भवति चर्षणीनां मनुष्याणां च राजा भवति । किञ्च । अधिक्षमा (सप्तम्येकवचनस्य लुक्) क्षमायां* 'विश्वरूपं' 'यत्' धनमस्ति तस्यापि राजा भवति । 'ततो ददाति दाशुषे वसूनि' यजमानाय वसूनि धनानि ददाति । स इन्द्रोऽस्माभिः उपस्तुतं सम्यक् स्तुतं 'राधः' धनं 'अर्वाग्' अस्मदभिमुखं 'चोदत्' प्रेरयतु ॥२॥

ইন্দ্র—মনুষ্যদিগের এমন কি সমস্ত জঙ্গম-পদার্থের ও পৃথিবীর (অর্থাৎ স্থাবর বস্তুর) অধিপতি; এই পরিদৃশ্যমান বিবিধ ঐশ্বর্য্য ইহাঁরই। সেই নিমিত্তই তিনি আস্তিক বর্গকে বহুতর ধন বিতরণ করিতে প্রবৃত্ত আছেন—আমাদিগের আদরণীয় বস্তু, আমাদিগের সম্মুখান করিতেছেন ॥২॥

(২) "अधिक्षमा"-"अधिक्षमि"-इति, "विश्वरूपं"-"विषुरूपम्"-इति, "उपस्तुतम्"-"उपस्तुतः"-इति च साम्न ऋचः पाठभेदः ।

* निघण्टौ पृथिवी-नामसु क्षमा-इति षष्ठम् पदम् ।

अथ तृतीया।

वामदेवऋषिः, गायत्रीच्छन्दः इन्द्रोदेवता।

३ २ ३ २ ३ १ २ ३ २उ ३ २क २र
यस्येदमारजोयुजस्तुजेजनेवनꣳस्वः
१ २ ३ १ २ ३ २
इन्द्रस्यरन्त्यंबृहत्॥ ३॥

'रजोयुजः' ज्योतिभिर्युक्तस्य (ज्योतीरज उच्यत इति यास्कः) अत्यन्त तेजस्विनो 'यस्य' इन्द्रस्य 'इदं' पुरोवर्ति स्तोत्रयुक्तं हविरस्ति तद्धविः 'स्वः' स्वर्गं सर्वत्र वा 'तुजे' दातरि जने यजमान विषये 'वनं' यतो वननीयं सम्भजनीयं खलु। अतः 'इन्द्रस्य' दानं 'रत्यम्' अत्यन्तरमणीयं 'बृहत्' प्रभूतं भवति॥३॥

यें अत्यन्त ज्योतिष्मान् इन्द्रेर प्रजावर्गेर दानविषयें एई बुद्धिस्थ स्वर्ग अतिप्रभूत ओ पराकाष्ठा हईयाछे, ताँहाके नमस्कार॥ ७॥

अथ चतुर्थी।

शुनःशेपऋषिः, चतुष्पाज्जगतीच्छन्दः, वरुणो देवता।

१ २ ३ १ २ ३ १ २ ३ १र २र ३ [१र २र ३ १ २
उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमꣳश्रथाय।
१ २ ३ २ ३ १र २र ३ २ ३ १ २
अथादित्यव्रतेवयन्तवानागसोअदितयेस्याम॥ ४॥

---

(४) "अथादित्यव्रतेवयन्तव"-"अथावयमादित्यव्रतेतव"—इति साम्न ऋचः पाठभेदः॥

आद्ये ऋचौ चतुष्पादे ह्येकपादयुतान्तिमा।
शौनःशेपी गार्त्समदी वामदेवीति ताः क्रमात्।
वारुणी पावमानी च वैश्वदेवीति संस्मृताः॥

हे 'वरुण'! *'उत्तमम्' उत्कृष्टं शिरसि बद्धं 'पाशम्' 'उच्छ्रथाय' उत्कृष्टं शिथिलं कुरु। 'अधमं' निकृष्टं पादेऽवस्थितं पाशं 'अवश्रथाय' अव अधस्तात् शिथिली कुरु। 'मध्यमं 'नाभिदेशगतं पाशं 'विश्रथाय' वियुज्य शिथिली कुरु। 'अथ' अनन्तरं हे 'आदित्य' अदितेः पुत्र! † वरुण! 'वयं' शुनःशेपाः 'तव' व्रते त्वदीये कर्म्मणि 'अदितये' खण्डन-राहित्याय 'अनागसः' अपराध-रहिताः 'स्याम' भवेम॥४॥

হে সর্ব্বাবরক দেব! আমাদের উত্তমাঙ্গে (শিরোভাগে) বদ্ধ আছে যে পাশ, তাহা শিথিল করত উপরেই তুলিয়া লও, অধমাঙ্গে (পাদভাগে) অবস্থিত পাশও শিথিল করত নিম্নভাগে খসাইয়া দাও এবং মধ্যভাগের (নাভিদেশের) পাশও শিথিল করিয়া বিযুক্ত কর। হে অখণ্ডকালের অংশ! তোমার অখণ্ডব্রতে আমরা যেন কোন রূপে অপরাধী না হই!॥৪॥

---

* "दक्षस्य वादिते जन्मनि व्रते राजाना मित्रावरुणा विवाससि। अतूर्त्त पन्थाः पुरुरथौ अर्यमा सप्तहोता विशुरुपेषु जन्मसु ऋक् १०म० ६, ४, ४"-इति मन्त्रलिङ्गात्—"अहोरात्रं मित्रावरुणौ २का० ११अ० २३ख०"-नैरुक्त-भाष्याच्च मित्र-शब्देन दिवा, वरुण-शब्देन च रात्रिः सुग्रहः। "वरुणः वृणोतीति सतः ३का० १०अ० ३ख०"-इति व्युत्पादनात् सर्वेषां घटपटादीनां तमीरूपेण आवरकत्वं।

† "अदितिरदीना*-* 'अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः।

अथ पञ्चमी।

गृत्समदऋषिः, चतुष्पाज्जगतीच्छन्दः, पवमानीदेवता।

१ २ ३१र२र ३ १ २३१र २र ३ १ २
त्वयावयंपवमानेनसोमभरकृतंविचिनुयामशश्वत्।

१ २ ३ १ २ ३ १ २ ३ १ २ ३ २३ २
तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउत द्यौः॥ ५॥

हे 'सोम'! * पवमानेन पवित्रेण पूयमानेन 'त्वया' सहायेन 'भरे' (सङ्ग्राम-नाम) सङ्ग्रामे शश्वद् बहु 'कृतं' कर्त्तव्यं 'वयं' 'विचिनुयाम' विशेषेण कुर्य्याम। यस्मात्तव साहाय्येन कर्म्माणि कुर्म्मः 'तत्' तस्मात् अस्मान् 'मित्रो वरुणः अदितिः' एतन्नामिकाः, 'सिन्धुः' † एतदभिधाना, तथा 'पृथिवी', 'उत' अपिच 'द्यौः'। एते मित्रादयः 'नः' अस्मान् 'मा महन्ताम्, पूजयन्तु धनादि-दानेन॥ ५॥

हे स्रष्टृदेव! आमरा तोमार पवित्र साहाय्ये बहुतर कर्त्तव्य साधन करिते पारि! अतएव दिवस ও रजनी रूपे विभक्त सेई अखण्ड काल एवं अन्तरीक्ष, पृथिवी ও द्युलोक एई त्रिभागीकृत अखण्ड देश आमादिगके परितृप्त करुन॥५॥

विश्वेदेवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम्"-इत्यदितेर्विभूतिमाचष्ट एनान्यदीनानीति वा"—इति नैरुक्तम् २का० ४अ० २२ २२ख०। दितिः खण्डनं तदभावोऽदितिरिति निष्पन्नोऽर्थो भाष्यादि-लभ्यः।

* सोमः सुनोतेः"-इत्यादि नैरुक्तम् ३का० ११अ० २ख०। तथाच सोमः सविता स्रष्टेत्यर्थः।

† सिन्धुः समुद्रः, समुद्रइति अन्तरिक्षनामसु पञ्चदशम् पदम् नि० १, २।

अथ षष्ठी।

वामदेवऋषिः, एकपाञ्चगत्रीच्छन्दः, विश्वे देवा देवताः।

३ १र २र ३ २ उ३ २
इमंवृषणंकृणुतैकमिन्माम्॥६॥

पूर्व्वस्या मृचि प्रकृता हे मित्रादयो देवाः! यूयम् 'एकम्' अद्वितीयं दानकर्म्मणि 'इमं' सोमं 'वृषणं' कामानामभिवर्षकं 'कृणुत' कुरुत। तथा 'इमां' क्रियां फलाभिवर्षिकां कुरुत॥६॥

हे देवगण! तोमरा एई सर्व्व-फल-प्रद अद्वितीय ईश्वरके आमाय प्राप्त करा ओ!। ७

अथ सप्तमी।

अमहीयु ऋषिः, गायत्रीच्छन्दः, पवमानो देवता।

३ २ २ ३ १ २ ३ १ २ ३ १
सनइन्द्रायवज्रिवेवरुणायमरुद्भ्यः।

३ १र २र
वरिवोवित्परिस्रव॥७॥

गायत्र्यौ पावमान्यौ तु सनइत्यादिके ऋचौ।
अमहीयुस्तयोरेवं छन्दोदैवत-निर्णयः॥१॥

हे सोम! * 'सः' 'वरिवोवित्' धनस्य-लम्भकस्त्वं 'नः'

* 'अथैषा परा भवति चन्द्रमसो वैतस्य वा"-३का० ११अ० ४ख०।

अस्माकं यज्यवे' यष्टव्यायेन्द्राय * 'वरुणाय' † 'मरुद्भ्यः' ‡ च 'परिस्रव' धारया क्षर ॥ ७ ॥

हे सितरश्मे चन्द्र! अभीष्ट-साधक तुमि, आमादिगेर पूजनीय वायु, वारि ও অগ্নির স্বাস্থ্যকারিতা সম্পাদনার্থ অমৃত ধারা ক্ষরণ কর।৭

अथाष्टमी।

अमहीयुऋषिः, गातत्रीच्छन्दः, पवमानोदेवता।

३ १र २र ३ २उ ३ २ ३ १ २
एनाविश्वान्यर्य आद्युम्नानिमानुषाणाम्।
१ २
सिषासन्तोवनामहे॥ ८॥

'एना' एनेनान्नेन सोमेन 'मानुषाणां' मनुष्याणां 'विश्वानि' 'द्युम्नानि' अन्नानि 'अर्यः' अभिगच्छन्तः 'सिषासन्तः' सम्भक्तुमिच्छन्तश्च वयं 'वनामहे' भजामहे ॥ ८ ॥

---

* 'इरां ददातीति वेरां दधातीति वा'-इत्यादि नैरुक्तम् ३का० १०अ० ८ख०। इरा शब्देन जलं प्रसिद्धम्, जलयोनित्वाच्चान्तरिक्षस्थाग्नेरितीन्द्रपदेनाग्निरपि गृह्यते।

† 'वरुणः कबन्धं प्र-ससर्ज' -इत्यादि-मन्त्र-लिङ्गात् वरुणो मेघ-वर्षण-हेतु-भूतः, स च आकृष्ट-वारि-समूहः प्रसिद्धः।

‡ 'मरुतो मितराविणो वा, मितरोचिणो वा, महद्द्रवन्तीति वा इति नैरुक्तम् ३का० ११अ० १३०। 'वायुर्वै क्षेपिष्ठा देवता'-इति च श्रूयते। ततो मरुतो वायव इति सिद्धान्तः।

এই চান্দ্রমস রশ্মির প্রভাবে মনুষ্যগণের অদনীয় শস্যাদি সমস্ত পরিপুষ্ট হইতেছে, যাহার ভোগে অভিলাষী হইয়া আমরা সতত উপচর্য্যা করি।৮

अथ नवमी।

त्रिष्टुभा अन्नदेवता आत्मान मेवाह—आत्माएव ऋषिः।

३ १ २ ३ २ ३ २ ३
अहमस्मिप्रथमजाऋतस्य-
१ २ ३ १ २ ३ १ २ ३ १ २
पूर्वंदेवेभ्योअमृतस्यनाम।
३ १ २ ३ २उ ३ १ २ ३
योमाददातिसइदेवमावद-
२उ २ ३१ ३१ २
हमन्नमन्नमदन्तमद्मि ॥९॥

'देवेभ्यः' पूर्वं अग्नि-वरुणादि-देवेभ्यः-पुरा 'अहम्' अन्न' देवता 'अमृतस्य' विनाश-रहितस्य 'ऋतस्य' सत्यस्य परब्रह्मणः सम्बन्धिनी 'प्रथमजा अस्मि नाम' प्रथमतएवोत्पन्ना भवामि खलु। 'यः' पुमान् 'मां ददाति' अन्नरूपां माम् अतिथ्यादिभ्यो ददाति 'सइत्' सएव 'एवं' परिदृश्यमान-प्रकारेण 'आवत्' अवति सर्वान् प्राणिनो रक्षति। यस्तु लोभ-युक्तः-सन् प्राणि-भ्योऽन्नमदत्वा स्वयमेव तदन्नमत्ति। 'अन्नम् अदन्त' नाना-विधान्नभक्षकं तं लोभिनम् 'अहमन्नम्' अन्न-देवता 'अद्मि' भक्ष-यामि विनाशयामीत्यर्थः॥ ९॥

['उषसः' सम्बन्धी 'पृश्निः' आदित्यः*[पृश्निरादित्यो भवति, प्राश्नुत एनं वर्णं इति नैरुक्ताः]। 'अग्रियः' अग्रः मुख्यः सोमः 'अरूरुचत्' रोचयति। स 'उक्षा' जलस्य सेक्ता पर्जन्यः सन् 'मिमेति' भृशंशब्दायते। 'भुवनेषु' भूतजातेषु 'वाजयुः' तेषां मन्न मिच्छन्; 'मायाविनः' माया प्रज्ञा तद्वन्तो देवाः 'अस्य' सोमस्य 'मायया' प्रज्ञया 'ममिरे' निर्मितवन्तः [सोमस्य एकैकांश-पान-वशात् अग्न्यादयः स्व-स्व-व्यापारेण जगत् सृजन्तीत्यर्थः]। तस्य 'अस्य' मायया 'नृचक्षसः' नृणां द्रष्टारः 'पितरः' पालकाः देवाः अङ्गिरसः पितरो वा 'गर्भम्' 'आदधुः' धारयन्ति ओषधीषु॥

सचात्र सूर्यात्मा सोमः स्तूयते। सूर्य-रश्म्यनुगमाधीन-वर्द्धनाच्च चन्द्रस्य॥

यद्वा अय मुषसः पृश्निः सविता अरूरुचत् रोचयति रोचते वा। सर्वं शिष्टं समानम्। तत्सम्बन्धिनो नृणां द्रष्टारः पितरो जगद्रक्षकाः रश्मयो गर्भ मादधु र्दृष्ट्यर्थम्॥ ११॥

ऊषार सहचारी सूर्य्य, नानावर्णेर कारणरूपे किरणजाल विस्तार करितेछेन, चन्द्र प्रतिनियत प्रदीप्त हइतेछेन; पर्जन्य एइ भुवनसकले अन्न-कामनाय निर्घोष करितेछेन; मनुजगणेर जीवनाधार ओ रक्षक, शस्यसकल गर्भधारण करितेछेन—अधिक कि, दीप्यमान स्थावर जङ्गमसकलइ इहाँर प्रज्ञा शक्तितेइ प्रज्ञावान् हइया सचेतनवत् सृजनक्रियार उपयोगिता करितेछेन। ११

* 'सहचारिणावुषाश्चादित्यश्च इति च नैरुक्तम् ३का० ११अ० १०ख०।

अथ तृतीया।

इयं मधुच्छन्दा वैश्वामित्रो द्रष्टा स्वाद्गायत्रीच्छन्द इन्द्रो देवतेति।

२ ३ ३ उ ३ २ ३ १ २ ३ १ २ ३ १ २
इन्द्रइद्धर्योःसचासम्मिश्लआवचोयुजा।
१ २ ३ १ २ ३ १ २
इन्द्रोवज्रीहिरण्ययः॥१२॥

'इन्द्रइत्' इन्द्रएव 'हर्योः' हरि-नामकयो रश्वयोः 'सचा' सह युगपत् 'आ सम्मिश्लः' सर्वतः सम्यङ्मिश्रयिता। कीदृश्यो र्हर्योः? 'वचोयुजा' इन्द्रस्य वचनमात्रेण रथे युज्यमानयोः सुशिक्षितयोरित्यर्थः। अयम् 'इन्द्रः' 'वज्री' वज्र-युक्तः 'हिरण्यया' हिरण्मयसर्वाभरणैरुपेत इत्यर्थः॥१२॥

সূর্য্য এবং চন্দ্র ঈশ্বরের এই দুইটি বেগগামী অশ্ব, তিনি ইচ্ছামাত্রে ইঁহাদিগকে অহোরাত্র-করণরূপ কার্য্যে নিয়োগ করিয়া থাকেন, তিনিই একমাত্র এই অশ্বদ্বয়ের সংযোজয়িতা। ঈশ্বর, দুরাত্মদিগের জন্য বজ্রী এবং সাধুগণের সমক্ষে অমৃতময়।১২

अथ चतुर्थी।

मधुच्छन्दविश्वामित्रऋषिः, गायत्री च्छन्दः, इन्द्रो देवता।

३ १ २ ३ १ २
इन्द्रवाजेषुनोवसहस्वप्रधनेषुच।
३ २ ३ १ २ ३ १ २
उग्रउग्राभिरूतिभिः॥१३॥

हे इन्द्र! 'उग्रः' शत्रुभिरप्रधृष्यस्त्वम् 'उग्राभिः' अप्रधृष्याभिः ऊतिभिः अस्मद्द्वेष्य-पर-पक्षाभिः 'वाजेषु' युद्धेषु 'नः' अस्मान् 'अव' रक्ष। तथा 'सहस्रप्रधनेषु' च सहस्र-सङ्ख्याक-गजाश्वादि-लाभ-युक्तेषु महायुद्धेष्वपि रक्ष॥ १३॥

हे ईश्वर! अप्रधृष्य तुमि अप्रधृष्य पालन शक्तिते आमादिगकें अन्नादिमत्सम्पदे एवं रणक्षेत्रादि घोरविपत् स्थले रक्षा कर (सम्पदे येन प्रमत्त ना हई! एवं विपदे येन व्याहत ना हई!।१३

अथ पञ्चमी।

प्रथ ऋषिः, त्रिष्टुब्छन्दः, विश्वेदेवा देवताः।

१ २ ३ १ २ ३ १ २ ३ १ २र ३ १
प्रथश्चयस्यसप्रथश्चनामानुष्टुभस्यहवि-
२ ३ २ ३ १र ३ २ ३ १
षोहविर्यत्। धातुर्द्युतानात्सवितुश्चवि-
२ ३ १ र २ र ३ १ २
ष्णोरथन्तरमाजभारावसिष्ठः॥१४॥

अपश्यत् प्रथइत्येतां त्रिष्टुभं प्रथनामकः।
वैश्वदेवीं भवेदेवं छन्दोदैवत-निर्णयः॥ १॥

'यस्य' वसिष्ठस्य 'प्रथ नाम' पुत्रः, यस्य भरद्वाजस्य 'सप्रथः' नाम पुत्रः—तयोर्मध्ये 'वसिष्ठः' मम पिता 'आनुष्टुभस्य' अनुष्टुप्छन्दसा-युक्तस्य 'हविषः' घर्माख्यस्य 'हविः' हविष्ट्वापादकं 'रथन्तरं'

साम तद्रथन्तरं 'धातुः' धाटसंज्ञाद्दिवात् (१)। 'द्युतानात्' द्योतमानात् 'सवितुश्च' (२)'विष्णोश्च' (३) 'आ जभार' आजहार आहृतवान् (हृग्रहोर्भइति भत्वम्। रथशब्दोपपदात्तरतेः संज्ञायां भृतृवृजीति खच्। अरुर्द्विषदजन्तस्येति मुमागमः ॥१४॥

सुप्रसिद्ध वशिष्ठ ऋषि, द्योतमान स्रष्टा, पाता, सर्व्व-व्यापी देवतार यजने प्रवृत्त हईया—अनुष्टुप्छन्दे प्रदेय यें हविर प्रथम प्रचारयिता प्रथ ও सप्रथ नामक ऋषिरा, याहा अनुष्टुप्छन्दे प्रदेय हविर मध्ये उत्कृष्ट, सेई हवि एवं रथन्तर साम लाभ करियाछेन ॥ १४

अथ षष्ठी ॥

नियुत्वानिति गायत्री वायुं गृत्समदोऽब्रवीत्।

३ १२ र ३२ ३३ १ २
नियुत्वान्वायवागह्ययꣳशुक्रोअयामिते।
१२ ३२ ३२
गन्तासि*सुन्वतो गृहम् ॥१५॥

हे 'वायो!' (४) 'नियुत्वान्' नियुतो वाहनानि वायोः (नियुतो वायोरिति निघण्टुः) तैर्युक्तस्त्वं 'आगहि' आगच्छ।

* "गतासि" इति ऋग्वेद पाठः।

१—'धाता-विधाता' सर्वस्य इति नैरुक्तम् ३का० ११अ० १०ख०।

२—'सविता सर्वस्य प्रसविता'-इति नैरुक्तम् ३का० १०अ० ३१ख०।

३—'विष्णु र्विशतेर्वा व्यश्नोतेर्वा'-इत्यादि नैरुक्तम् ३का० ११अ० १५ख०।

एवञ्च विष्णुशब्देन सर्वव्यापी सर्वान्तर्यामीति सिद्धान्तः।

४—'वायुर्वातेर्वेतेर्वा स्याद् गति-कर्मणः'-इत्यादि नैरुक्तम् ३का० १० १,२ख०।

'अयं' 'शुक्रः' दीप्यमानः सोमः 'ते' तुभ्यम् 'अयामि' (यामः कर्मणि लुङि रूपम्)नियतो गृहीत आसीत्। यतः 'सुन्वतः' सोमाभिषवं कुर्वतो यजमानस्य 'गृहं' 'गन्तासि' यातोसि ॥१५॥

हे सर्व्वत्रगामिन्! तुमि सर्व्व कार्य्येर नियन्ता, आगमन कर। तोमार जन्य एई शुक्लवर्ण सोमरस उत्सर्गई रहियाछे; कारण—अभिषवकारी यजमानदिगेर गृहे गमन करियाई थाक॥ १५

अथ सप्तमी।

नृमेधपुरुमेधौ द्वावृषी ऐन्द्र्या अनुष्टुभः।

१र २र ३ १२ ३१ २
यज्जायथाअपूर्व्यमघवन्वृत्रहत्याय।
१३ ३१ २ ३१ २ २१ ३१र २
तत्पृथिवीमप्रथयस्तदस्तभ्नाउतोदिवम् ॥१६॥

हे 'अपूर्व्य!' त्वत्तो व्यतिरिक्तेन पूर्वेण वर्जित! हे 'मघवन्!' मंहनीयतम! धनवन्निन्द्र! 'वृत्रहत्याय' (१) वृत्रासुर-हननाय 'यद्' यदा त्वं 'जायथाः' उत्पन्नः प्रादुर्भूतोसि 'तत्' तदानीमेव 'पृथिवीं' प्रथमानाम् 'अप्रथयः' प्रसिद्धां दृढ़ामकरोः। 'उत' अपिच 'दिवं' द्यां द्युलोकं अन्तरिक्षेण 'अस्तभ्नाः' निरुद्धामकार्षीः (ईदृशं वीर्यं त्वदन्यस्य न भवतीत्यर्थं द्योतयितुम् अपूर्व्येति पदम् ॥१६॥

हे पूर्व्व-वर्ज्जित, ऐश्वर्य्यशालिन्! देव! यखन तुमि मेघ सञ्चालनें प्रवृत्त हो, तखनई एई पृथिवी शस्योत्पादिका

१—'अथास्य कर्म—रसानुप्रदानं वृत्रवधो या च का च बलकृतिरिन्द्र-कर्मैव तत्'-इति नैरुक्तम् २का० ७अ० १०ख०। 'वृत्रवधो मेघवधः'-इति तत्रत्य-भाष्यम्।

শক্তিমতী রূপে প্রথিত হইয়া পড়ে এবং তখন দ্যুলোক স্তম্ভিত অর্থাৎ নির্ব্বাতপ্রায় করিয়া থাক ॥ ১৬

इति द्वितीयः खण्डः ॥

अथ तृतीयखण्डे—

सैषा प्रथमा।

वामदेवऋषिः प्रीतौ मयीत्यस्याः प्रजापतिः।
देवतास्यास्ततश्छन्दोनुष्टुप् सयइतीरितम् ॥

२ ३ २ ३ २ ३ १ र २र ३ २ ३ १र २र
मयिवर्चोअथोयशोथोयज्ञस्ययत्पयः।

३ २ ३ १ २ ३ १र १ २र
परमेष्ठीप्रजापतिर्द्दिविद्यामिवदृंहतु ॥१७॥

'परमेष्ठी' परमे लोके तिष्ठतीति परमेष्ठी प्रजापतिः (१) 'दिवि' द्योतमाने स्वर्गे 'द्यामिव' द्योतमानां कान्तिमिव। 'मयि' अस्मदीये शरीरे 'वर्चः' तेजः ब्रह्माख्यं 'दृंहतु' वर्द्धयतु। 'अथो' अपिच 'यशश्च' 'दृंहतु'। 'अथो' किञ्च। 'यज्ञस्य' यागस्य सम्बन्धि अतएव स उत्तमं 'पयः' हविर्लक्षणमन्नं च दृंहतु ॥१७॥

পরম লোকস্থায়ী প্রজাগণের পাতা দেবতা আমার শরীরে সেই স্বর্গীয় ব্রহ্মতেজ পরিবর্দ্ধিত করুন এবং যশ পরিবর্দ্ধিত করুন ও যজ্ঞীয় উৎকৃষ্ট অন্নও পরিবর্দ্ধিত করুন ॥ ১৭

১—'प्रजापतिः प्रजानां पाता पालयिता वा'-इत्यादि नैरुक्तम् ३का० १०अ० ४२, ४३ख०।

अथ द्वितीया।

त्रिष्टुभः पावमान्या स्यादृषि गौतम नामकः।

३ १ २ ३ १ २ ३ २ ३ १र २१
सन्त्वेपयाᳬसिसमुयन्तुवाजाःसंवृष्णान्यभि
३ १ २ ३ १ २ ३ १ २
मातिषाहः। आप्यायमानोअमृतायसोम
३ १र १ २र ३ १ २
दिविश्रवाᳬस्युत्तमानिधिष्व॥ १८॥

हे 'सोम!' 'अभिमातिसाहः' अभिमातीनां शत्रूणां हन्तुः 'ते' तव एवंभूतं त्वां 'पयांसि' अपणार्थानि क्षीराणि 'संयन्तु संगच्छन्ताम्। तथा 'वाजाः' हविर्लक्षनान्यन्नानि च त्वां संगच्छन्तां 'वृष्णानि' वीर्याणि च सङ्गच्छन्ताम्। हे सोम! त्वं 'अमृताय' आत्मनः अमृतत्वाय अमरत्वाय 'आ' समंताद्वर्द्धमानः सन् 'दिवि' नभसि स्वर्गे 'उत्तमानि' उन्नततमानि उत्कृष्टानि 'श्रवांसि' अन्नानि अस्माभिः भोक्तव्यानि हविर्लक्षणानि 'धिष्व' धारय (ते क्रिया-ग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी ॥१७॥

हे स्रष्टः! এই পেয় হব্য তোমার উদ্দেশে গমন করিতেছে, এই অন্ন সমস্তও তোমার উদ্দেশে গমন করিতেছে; এই সমিভ্যারে প্রমত্ত শত্রুগণের বীর্য্য সকলও তোমার উদ্দেশে গমন করুক। হে দেব! তুমি সন্তুষ্ট হইয়া, আমাদের ভোগের জন্য দ্যুলোকে অক্ষয় উৎকৃষ্ট ভোগ্য বস্তু সকল আয়োজন কর॥ ১৮

अथ तृतीया ॥

(ऋष्यादिकम् पूर्ववत्)

३ १ र १ २र ३ २ ३ २ ३ १ २
त्वमिमाओषधीःसोमविश्वास्त्वमपोअज-
३ २ १ २ ३ २ १ २ ३
नयस्त्वंगाः। त्वमातनो*रुर्वाऽन्तरिक्षं
१र २र ३ १र २१
त्वंज्योतिषावितमोववर्थ ॥ १९॥

हे 'सोम'! 'त्वम्' 'इमाः' भूम्यां वर्तमानाः 'विश्वाः' सर्वाः 'ओषधीः' 'अजनयः' उत्पादितवानसि। तथा 'त्वम्' 'अपः' तासामोषधीनां कारणभूतानि वृष्ट्युदकानि अजनयः। तथा 'त्वं' 'गाः' सर्वान् पशून् उदपादयः। 'उरु' विस्तीर्णम् 'अन्तरिक्षं' 'त्वम्' 'आतनोः' विस्तारितवानसि। तस्मिन्नन्तरिक्षे यत् 'तमः' अस्मद्दृष्टि-निरोधकम् अन्धकारं यदपि 'त्वं' 'ज्योतिषा' आत्मीयेन प्रकाशेन 'वि ववर्थ' विशिष्टं कृतवानसि। (ववर्थ वृञ वरणे लिटस्थलि, "बभूथा-ततंथ-जगृभ-ववर्थेति" निपात्यते ॥१९॥

हे स्रष्टः! तुमि एई भूमितें विद्यमान समस्त ओषधि सृजन करियाछ, तुमि ऐ समस्तेर कारणस्वरूप वृष्टि जलेर सृजन करियाछ तुमि ऐ समस्तेर उत्पादनार्थ भूमि कर्षणोपयोगी गो-जातिर सृजन करियाछ, तुमि एई समस्तेर स्था-

---

*"आतनोः" "आतन्थ"—इति साम्नऋचः पाठौ।

য়িত্বের জন্য এই বিস্তীর্ণ অন্তরীক্ষের বিস্তারয়িতা হইয়াছ, তুমিই জ্যোতিঃ সৃজন পুরঃসর তমোজাল বিনষ্ট করিয়া থাক॥ ১৯

अथ चतुर्थी।

अग्निमीडे मधुच्छन्दा गायत्र्यग्निर्संस्तुतिः।

३ १ २ ३१ २ ३१ २ ३ २ ३ ३ २
अग्निमीडे पुरोहितंयज्ञस्यदेवमृत्विजम्।
१ २ ३ १ २
होतारं रत्नधातमम्॥ २०॥

'अग्नि'-नामकं 'देवम्' 'ईड़े' स्तौमि (ईड स्तुताविति धातुः; मन्त्रस्यास्य होत्रा प्रयुज्यमानत्वात् अहं होता स्तौमीति लभ्यते) कीदृशम् अग्निम्? 'यज्ञस्य पुरोहितं' यथा राज्ञः पुरोहितः तदभीष्टं सम्पादयति तथाग्निरपि यज्ञसापेक्षितं होमं सम्पादयति। यद्वा यज्ञस्य सम्बन्धि पूर्वभागे आहवनीयरूपेणावस्थितम्। पुनः कीदृशम्? 'होतारमृत्विजम्' (देवानां यज्ञेषु होतृनामक-ऋत्विगग्निरेव। तथाच श्रूयते—"अग्निर्वै देवानां होतेति")। पुनरपि कीदृशम्? 'रत्नधातमम्'। यागरूपाणां रत्नानाम् अतिशयेन धारयितारं पोषयितारम्॥

अत्राग्निशब्दस्य यास्को बहधा निर्वचनं दर्शयति—"अथातो नुक्रमिष्यामोऽग्निः पृथिवीस्थान स्तं प्रथमं व्याख्यास्यामोऽग्निः कस्मादग्रणी र्भवति, अग्रं यज्ञेषु प्रणीयतेंऽगं नयति सन्नममा-

* "मीले" इति ऋग्वेद पाठः।

नोऽक्लोपनो भवतीति स्थौलाष्ठीवि र्न क्लोपयति न स्नेहयति त्रिभ्य आख्यातेभ्यो जायतइति शाकपूणिरितादक्लाद्दग्धाद्वानी तात्स खल्वेते रकार मादत्ते गकारमनक्तेर्वा दहते र्वा नीः परस्तस्यैषा भवति(७,४,१)"इति ॥२०॥

हे अग्निदेव ! तुमि यज्ञेर मध्ये प्रथमेई स्थापित हईया थाक, तुमि ना थाकिले होमकार्य्य निष्पन्नई हईत ना, अतएव तुमिई यागरत्नेर पोषक—तोमाके स्तव करि ॥ २०

अथ पंचमी।

त्रिष्टुभावामदेवीस्तौदग्निं तेमन्वतेति च।

१ २ ३ २उ ३ २ ३ २ ३ १
तेमन्वतप्रथमन्नामगोनांत्रिःसप्तप
२ ३१र २ र १ २ ३ २ क २र
रमन्नामजानन्। ताजानतीरभ्यनूष
३ २ ३ १ २ ३ १र २र ३ १ २
तच्चाआविर्भुवन्नरुरुणीर्यशसागावः* ॥२१॥

---

*"ताजानतीरभ्यनूषतच्चाआविर्भुवन्नरुणीर्यशसागावः"—इति छन्दोगाः। "ते मन्वत प्रथमं नाम गोनां त्रिःसप्त परमं नाम जानन्। ता जानती रभ्यनूषत च्चा आविर्भुवन् धेनोस्त्रिः परमाणि विन्दन्। तज्जानती रभ्यनूषत च्चा आविर्भुव दरुणी र्यशसा गोः" —इति बह्वृचाः।

हे 'अग्ने!' 'ते' स्तोत्रं कुर्वाणा अङ्गिरसः 'गोनां' गवां वाचां सम्बन्धि नाम स्तुति-साधकं शब्द-मात्रं 'प्रथमं' पूर्वम्, 'अमन्वत' अजानत। पश्चात्तस्या वाचः सम्बन्धीनि 'त्रिःसप्त' एकविंशति-संख्याकानि 'परमं' परमान्युत्कृष्टानि 'नाम' नामानि स्तुतिसाधकानि स्तोत्राणि (जातावेकववनं। छन्दांसि वा, तानि च गायत्र्यादीनि जगत्यन्तानि सप्त, अतिजगत्यादीनि अतिधृत्यन्तानि सप्त, कृति-प्रभृतीन्युत्कृति-पर्यन्तानि सप्त) 'जानन्' अजानन् अलभतम् (एवं-विधच्छन्दो युक्तै र्मन्त्रै रग्नि मस्तुवन्नित्यर्थः) 'ताः' वाचः 'जानतीः' सर्वं जानत्यः 'क्षाः' (क्षियंति गच्छत्युषः कालं प्रापयन्ति ताः) 'अभ्यनूषत' अस्तुवन्। ततः सूर्यस्य 'यशसा' तेजसा सह 'अरुणीः' अरुणवर्णाः 'गावः' 'आविर्भुवन्' प्रादुरभूवन्। (यद्वा 'ते' अङ्गिरसः 'प्रथमं' पुरातनं 'नाम' एहि सुरभि-गुग्गुलु-गन्धिनीति धेनु-नामधेयम् 'अमन्वत' उच्चारयामासुः। पश्चात् स्व-भूतानि पणिभिरपहृतानि त्रिःसप्त-रत्नान्यविन्दन्। तत उच्चारितं जानंत्यो 'गावः' 'अभ्यनूषत' हम्भारव-लक्षणं शब्दमकुर्वत। तदानीं मुषाः प्रादुरभूदिति ॥२१॥

সেই পূর্ব্বতন ঋষিগণ, সর্ব্ব প্রথমে একমাত্র ব্রহ্মনাম বা একমাত্র প্রণবাক্ষর জানিতেন, পরে ক্রমে একবিংশতি প্রকার ছন্দে নিবদ্ধ উৎকৃষ্ট বেদগ্রন্থ লাভ করেন, তাহা অবগত হইয়া অবধি পৃথিবীতে আস্তিক্য ও উপাসনা প্রবৃত্ত হয়, তখন তাঁহাদের নিকটে সর্ব্ব প্রথমে সূর্য্যদেবের এই তেজঃপুঞ্জ আরক্তিম দীপ্তিই উপাসনার একমাত্র অবলম্বন বলিয়া প্রকাশিত হইয়াছিল ॥ ২১

अथ षष्टी।

इतीयं त्रिष्टुबाग्नेयी दृष्टा गृत्समदेन सा॥

३ १र २र ३ १ २ ३ २ ३ २
समन्यायन्त्युपयन्त्यन्याः समानमूर्वं
क २र ३ ३ १ २
नद्यस्पृणन्ति। तमूशुचिꣳशुचयोदी
३ १ २ ३ १र २र ३ १ २ ३ १ २
दिवाꣳसमपान्नपातमुपयन्त्यापः* ॥२२॥

'अन्याः' वर्षाणाम् 'आपः' 'संयन्ति' भूम्यां सङ्गच्छन्ते 'अन्या' श्च 'पूर्वं' तत्रावस्थिताः 'उपयन्ति' उपगच्छन्ति। ताः सर्वा आपः 'समानं' सह 'नद्यो' नदी भूत्वा 'ऊर्वं' समुद्रमध्ये वर्तमानं वडवानलं 'पृणन्ति' प्रीणयन्ति (पृण प्रीणने तौदादिकः) 'तमु' तमेव 'अपान्नपातम्' 'शुचिं' निर्मलं 'दीदिवांसं' दीप्यमानं [दीदिवेति छान्दसो दीप्तिकर्मा लिटः क्वसुः। वस्वेकाजाद्वसा मिति नियमा दड़भावः। छन्दसीवेति वक्तव्य मिति वचनाद्द्विवचनाभावः। एवं भूतं] 'शुचयः' शुद्धाः 'आपः' 'उपयन्ति' समीपे गच्छन्ति॥

एष हि वैद्युताग्निरूपेण मेघे वर्तमानोऽस्मान् अजीजनदिति बुध्या वडवानलरूपेण वर्तमानं तं पर्युपासत इत्यर्थः। यद्वा

---

* "अपान्नपातमुपयन्त्यापः"—"परितस्त्वापः"-इति साम्नऋचः पाठ-भेदः॥

अन्या एकधनाख्या आपः संयन्ति। चात्वालोत्करयो र्मध्ये वसतीवरीभिः सङ्गच्छन्ते। अन्या वसतीवर्याख्या आपश्च उपर्यति उयगच्छन्ति एकमत्यं प्राप्ता भवन्ति। एताश्च मिलित्वा यज्ञं साधयन्त्यः तत्साध्य-वृष्टि-द्वारा नद्यो भूत्वा ऊर्वं पृणन्तीत्यादि समानम्। एवं हि आपो वा अस्मद्वन्त वयं पूर्वं यज्ञं वक्ष्याम इत्यादिको बह्वृच-ब्राह्मण-विनियोगश्चानुगच्छते ॥ २२॥

उदक सकल, नभोमण्डल हईते एकरूप वृष्ट हईते देखा याय, एई धरणीमण्डलेर समतल (क्षेत्रादि) भूमिते अपर आकारे सङ्कलित हईया थाके। नदी सकल समुद्रे गमन करे; सेई समिभ्यारे एई पवित्र निर्म्मल जल सकलও सेई पवित्र देदीप्यमान पयोधितें गमन करिया थाके ॥२२

अथ सप्तमी।

अस्ती दनुष्टुभा रात्रिं वामदेव ऋचानया ॥

१र २र ३ १ २ ३ १र २र ३ १र २र
आप्राग।ङ्गद्रायुवतिरङ्गःकेतूंत्समीर्त्सति।
१ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
अभूङ्गद्रानिवेशनीविश्वस्यजगतोरात्री॥ २३॥

'भद्रा' सूर्यप्रकाशसन्तापं निवारयन्ती सुखकरी 'युवतिः' तमसो मिश्रयित्री 'रात्रिः' 'आ प्रागाद्' आभिमुख्येन प्रगच्छति। 'अङ्ग' चन्द्रमसः 'केतून्' रश्मीन् 'समीर्त्सति' सम्यग्वमयितु मिच्छति च। अतएव 'भद्रा' कल्याणी रात्री 'विश्वस्य' सर्वस्य 'जगतः' 'निवेशनी' निवेशकारिणी

'अभूत्' भवति। (अहनि स्वस्वव्यापारात् खिन्नान् सर्वप्राणिनः स्वाश्रयेषु स्वापयतीत्यर्थः॥ २३॥

दिवसेर प्रभा गोपनकारिणी, कल्याणरूपा, चिर युवति, रात्रि प्रतिनियत आगमन करितेछेन। एई कल्याणी समस्त जगतेर विश्राम दायिनी हईयाछेन॥२३

अथ अष्टमी॥

वैश्वानरं जगत्या सौद्गरद्वाजो बार्हस्पत्यः॥

३ २ ३ १ २ ३ २ ३ २उ ३ २ ३ १ २
प्रक्षस्यवृष्णोअरुषस्यनूमहः प्रनोवचो
३ १ २ ३ १ २ ३ १ २ ३ १र
विदथाजातवेदसे। वैश्वानरायमतिर्न
२र ३ २ ३ १ २ ३ १ २ ३ १ २
व्यसेशुचिः सोमइवपवतेचारुरग्नये*॥ २४॥

'प्रक्षस्य' संपृक्तस्य व्याप्तस्य (यद्वा पृक्षं हविर्लक्षणं मन्त्रं तद्वतः) 'वृष्णः' सेक्तुः 'अरुषस्य' आरोचमानस्य 'वैश्वानराय'१ 'महः' पूजायुक्तं बलं तेजो वा 'नु' क्षिप्रं स्तौमि। अतएव 'नो' अस्मदीयं 'वचो'

---

*"प्रक्षस्य"—"पृक्षसा"-इति, "महः"-"सहः"-इति, "प्र नोवोचः"-"प्र नु वोचम्"-इति, "जातवेदसे"-"जातवेदसः"-इति, "नव्यसे"-"नव्यसि"-इति च साम्नऋचः पाठ-भेदः॥

१—वैश्वानरः कस्माद् विश्वान् नरान् नयति इत्यादि निं ७,२९॥

वचनं 'विदथे' यागे 'प्रयच्छति' स्तौतीत्यर्थः। 'जातवेदसे' जातप्रज्ञाय जातधनाय वा तमुद्दिश्येत्यर्थः। (उक्तमेव प्रकारान्तरेणादरादाह) 'नव्यसे' नवतराय 'वैश्वानराय' 'अग्नये' 'शुचिः' निर्मला स्तोतॄणां शोधयित्री वा। 'चारुः' कल्याणी 'मतिः' मननीया स्तुतिश्च 'पवते' मत्सकाशात् प्रभवति स्वयमेव गच्छतीत्यर्थः। 'सोमइव' यथा सोमो दशापवित्रात् स्रवति तद्वदित्यर्थः॥२४

চরাচরে ব্যাপ্ত ও যথাপ্রার্থিত ফলবর্ষী, সর্ব্বত্র দেদীপ্যমান সেই দেবতার তেজ আমাদিগের বাক্য অবগত হউক। পবিত্র অগ্নির নিমিত্ত শোধিত সোমের ন্যায়—পবিত্র, আমাদের মতি, চিরমভিনব ও জাতপ্রাজ্ঞ, সর্ব্বনিয়ন্তার জন্য হউক॥২৪

अथ नवमी।

एषा त्रिष्टुब् वैश्वदेवी भरद्वाजेन वीचिता॥

१ २ ३ १र २र ३ २ ३ १र २र ३ १र
विश्वेदेवाममम्हवन्तुयज्ञो*मुभेरोदसीअपान्न
२र ३ १ २ ३ १ २ ३ १ २
पाञ्चमन्म। मावोवचाᳬसिपरिचक्ष्याणि
३ २उ ३ १ २
वोचᳬसुम्नेष्विद्वोअन्तमामदेम॥ २५॥

'विश्वे' सर्वे 'देवाः' 'मम' मदीयं 'मन्मः' मननीयं 'यज्ञं'

"यज्ञं"—"यज्ञियाः"-इति पाठौ।

यजनीयं पूजां हवींषि वा 'शृणवतु' गच्छन्त्वित्यर्थः। 'अपान्नपात्' मध्यस्थानोऽग्निश्च 'उभे रोदसी' द्यावा-पृथिव्यौ अस्मदीयं स्तोत्रं शृणवन्तु चित्ते अवधारयन्तु।

अथ प्रत्यक्ष-कृताः।— हे 'देवाः'! 'वः' युष्माकं 'परिचक्षाणि' परिवर्जनीयानि यानि 'वचांसि' स्तोत्राणि 'मा वोचं' न ब्रवीमि। अपितु समीचीनानीति। अतः, वो युष्माकम् 'अन्तमाः' अन्तिकृतमाः सन्तो वयं 'सुम्नेष्वित्' युष्माभिर्दत्तेषु सुखेष्वेव वर्तमानाः 'मदेम' मोदेम ॥ २५ ॥

এই ভূলোক, দ্যুলোক এবং অন্তরীক্ষলোকে বর্ত্তমান সমস্ত দেবগণ আমার মাননীয় প্রতিজ্ঞা শ্রবণ করুন। 'হে দেবগণ! আমি তোমাদের অহিতকর বাক্যও প্রয়োগ করিব না, তোমাদের সুখে সুখজ্ঞান করিয়া চিরদিন সুখে কাল যাপন করিব' ॥২৫

अथ दशमी।

वामदेवो महापङ्क्त्या स्तौति लिङ्गोक्तदेवताः ॥

१ २ ३ १ २ ३ १र २र ३ २
यशोमाद्यावापृथिवीयशोमेन्द्रबृहस्पती।
३ १ २ ३ १ २ ३ १ २
यशोभगस्यविन्दतुयशोमाप्रतिमुच्यताम्।
३ २ २ ३ २ ३ १ २ ३ १ २
यशस्वा३:स्या:सꣳसदोहंप्रवदितास्याम् ॥२६॥

'द्यावापृथिवी' द्यावापृथिव्यौ 'यशः' 'मा' स्तोतारम् 'आवि-

न्दतु' लभतां प्राप्नोत्वित्यर्थः। किञ्च, 'इन्द्रबृहस्पती" इन्द्राबृहस्पत्योः 'यशो' 'मा' मां विन्दतु। किञ्च, 'भगस्य' आदित्यस्य 'यशो, मा' मां विन्दतु। बहुलेन यशसा यशो मया 'मा प्रतिमुचतां' न प्रमुच्यताम्। 'यशस्वस्याः' अस्याः मम 'संसदः' समूहस्य 'यशो' न प्रमुच्यताम्। 'अहं' प्रवदिता सर्वत्र प्रवक्ता 'स्याम्' भूयासम्॥२६॥

एई द्यावा पृथिवीर यश आमाके आश्रय करुक, एई ईन्द्र ओ बृहस्पतिर यश आमाके आश्रय करुक, एई सूर्य्येर यश आमाके आश्रय करुक, एई आमार सभा हईते कखन येन यश विदूरित ना हय—आमि प्रकृत यशस्वी हईवार अभिलाषे एईरूप प्रार्थना करि ॥२६

अथ एकादशी ॥

दृष्टा हिरण्यस्तूपेन त्रिष्टुबेपेन्द्रदेवता ॥

१ २ ३ २ क २र ३ १ २ ३ १ २ ३ १ २
इन्द्रस्यनुवीर्याणिप्रवोचंयानिचकार
३ १ २ ३ २ ३ १ २ ३ १ २
प्रथमानिवज्री। अहन्नहिमन्वपस्त
३ २ ३ १ २ ३ १ २
स्तर्हप्रवक्षणाअभिनत्पर्वतानाम् ॥२७॥

'वज्री' वज्रयुक्तइन्द्रः 'प्रथमानि' पूर्वसिद्धानि मुख्यानि वा 'यानि' 'वीर्याणि' पराक्रमयुक्तानि 'कर्माणि' चकार। तस्य 'इन्द्रस्य' तानि वीर्याणि। 'नु' क्षिप्रं 'प्रवोचं' प्रब्रवीमि। कानि वीर्याणीति?

तदुच्यते—'अहिं' मेघम् 'अहन्' हतवान्। तदेतदेकं वीर्यम्। 'अनु' पश्चाद् 'अपो' जलानि 'ततर्द' हिंसितवान् भूमौ पातितवानित्यर्थः। इदं द्वितीयं वीर्यम्। 'पर्वतानां' सम्बन्धिनीः 'वक्षणाः' प्रवहणशीला नदीः 'अभिनत्'। कूलद्वयकर्षणेन प्रवाहितवानित्यर्थः। इदं तृतीयं वीर्यम् ॥ २७ ॥

ইন্দ্র বজ্র ধারণ করিয়া মুখ্য যে কয়েকটি কর্ম্ম করেন, তাহা বলি—প্রথম মেঘকে তাড়ন করেন; পশ্চাৎ ভূমিতে বৃষ্টি ধারা পাতন করেন; তাহার পরে সেই সমস্ত জল পর্ব্বত-বৃন্দ হইতে নদী রূপে প্রবাহিত করিতে থাকেন ॥২৭

अथ द्वादशी।

विश्वामित्रऋषिस्त्रिष्टुप्छन्दस्त्वग्निरिति त्रयीः ॥
उत्तराग्नेः स्तुतिः पूर्वा स्तुतिः सर्वात्मनात्मनः ॥

३ १ २ ३ १ २ ३ १ २ ३ १र २र
अग्निरस्मिजन्मनाजातवेदाघृतंनेचक्षु
३ १ २ ३ २ ३ १ २ ३ १र २
रमृतंमआसन्। त्रिधातुरर्कोरजसो
३ १र २र ३ १ २ ३ १ २ ३ १ २
विमानोजस्र*ज्योतिर्हविरस्मिसर्वं ॥२८॥

साक्षात्कृत-परतत्त्व-स्वरूपोऽग्निः स्वात्मनः सर्वात्मनः सर्वात्मकत्वानुभवम् अस्या ऋचि आविष्करोति—

हे कुशिकाः! भोक्तृ-भोग्य-भावेन द्विविधम् इदं सर्वं जगत्।

* "अजस्र"-"घर्मः"-इति साम्नऋ च: पाठ-भेदः॥

"एतावद्वा इदमन्नं चैवान्नादश्च सोम एवान्नमग्नि रन्नाद"-इति श्रुतेः। तत्र सकल-भोक्तृ-वर्ग-रूपेणान्नादोऽग्निः। स च अग्नि-वाय्वादित्य-भेदेन त्रेधा भूत्वा पृथिव्यन्तरिक्ष-द्युलोकानधिति-ष्ठति। तदुक्तं वाजसनेयके—"स त्रेधात्मानं व्यकुरुतादित्यं द्वितीयं वायुं तृतीय" मिति।

तत्र सो 'ऽग्निः' अहं 'जन्मना' एव 'जातवेदाः' 'अस्मि' श्रवण-मननादि-साधन-नैरपेक्ष्येण स्वभावतएव साक्षात्कृत-पर-तत्व-स्वरूपोऽस्मि। 'घृतं मे चक्षुः' यदेतद्विश्वस्यावभासकं मम स्वभाव-भूतप्रकाशात्मकं चक्षुः तद्घृतम् इदानी मत्यन्त-दीप्तम्। यदेतद् अमृतं कर्म-फलं दिव्यादि-विविध-विषयोपभोगात्मकं तन्मे मम आसन्नास्ये वर्तते। सकल-भोक्तृ-वर्गात्मना स्वयमेवावस्थानात्। (एवं स्वात्मनः पृथिव्यधिष्ठातृ-रूपता-मभिधाय वाय्वात्मनान्त-रिक्षाधिष्ठातृता माह—) अर्को जगतः स्रष्टा प्राणः। "सोर्चन्न चरत्तस्यार्चत आपो जायन्तार्चतैव मेकमभूदिति तदेवार्कस्यार्कत्व मिति श्रुतेः। स प्राणः अहं त्रिधातुः त्रिधात्मानं विभज्य तत्र वाय्वात्मना 'रजसः' ऽन्तरिक्षस्य 'विमानः' विमाता अधिष्ठा-तास्मि। (तथा आदित्यरूपेण द्युलोकाधिष्ठातृतामाह—) 'अजस्रं ज्योतिः' अनुपक्षीणं नित्यं तेजः प्रकाशात्मा द्युलोकाधिष्ठाता आदित्योऽप्यहमस्मि। (एवं भोक्तृ-रूपता मात्मनोनुसन्धाय भोग्य-रूपता मप्यनुसन्धत्ते। यद्यद्विभोग्यं प्रसिद्ध मस्ति तत्सर्व मप्यहमेवास्मि॥

यद्वा। अहं 'मग्नि रस्मि देवानां' हविः-प्रापणात् अङ्गनादि-गुण-युक्तोऽस्मि। किञ्च, 'जन्मना' उत्पाद्या 'जातवेदाः' जात-ज्ञानोऽस्मि। उत्पत्ति-क्षण एव सर्वज्ञोऽहमस्मि। अथवा जातं सर्वं स्वात्मतया वेत्तीति जातवेदाः सर्वात्मकइत्यर्थः। तत् कथम्? इत्युच्यते—'घृतं मे चक्षुः यदेतद् घृतं प्रसिद्धमस्ति तन्मे चक्षुः-स्थानीयम्, यथालोके चक्षुर्भासकम् एवं घृत-

मपि प्रचितं ज्वालामुत्पादयत मम भासकम्। 'अमृतं' प्रभा-रूपं। यदमृत मविनाशि ज्योतिः 'मे' मम 'आसन्' आस्ये वर्त्तते। 'त्रिधातुः' प्राणापानव्यानात्मकस्त्रिधा वर्तमानोऽर्कोऽर्चनीयो यः प्राणोऽस्ति सोऽप्यह मेवास्मि। तथा 'रजसः' अन्तरिक्षस्य 'वि-मानः' विशेषेण माता परिच्छेत्ता वायुश्चाह मस्मि। किञ्च। 'अजस्रं ज्योतिः' नैरन्तर्येण तापकः सूर्यश्चाह मस्मि। किं बहुना। आज्य-पुरोडाशादि-रूपं यदेतद्धवि रस्ति तदुपलक्षितं तत्सर्व मप्यह मस्मि ('सर्वं खल्विदं ब्रह्मेति श्रुतेः) तमनेनाधान्नेः सर्वा-त्मकत्व-प्रतिपादनेन परब्रह्मत्व मुक्तं भवति ॥२८

ईहार अर्थ स्पष्टेरूपे बूझिते पारिलाम ना ॥२८

अथ त्रयोदशी।

३ ३ २ ३ १र २र ३ १र २र ३ १र
पात्यग्निर्विपोअग्रं*पदं वेःपातियह्व

२र ३ १ २ ३ १ २ ३ १ २
श्चरणꣳसूर्यस्य। पातिनाभासप्तशीर्षा-

३ १र २र ३ १ २ ३ १ २ ३ २
णमग्निःपातिदेवानामुपमादमृष्वः॥ २९ ॥

'अग्निः' 'वेः' गन्त्र्याः सर्वत्र व्याप्तायाः 'विपः' रिपः भूम्याः 'अग्रं' मुखं 'पदं' स्थानं 'पाति' रक्षति। 'यह्वः' महान् अग्निः 'सूर्यस्य' 'चरणं' चरत्यनेनेति चरण मन्तरिक्षं 'पाति'। 'नाभा' नाभौ अन्तरिक्षस्य मध्ये 'सप्त शीर्षाणं सप्तगणं मरुद्गणं 'पाति'। 'ऋष्वः' दर्शनीयोऽयम् 'अग्निः' 'देवानाम्' 'उपमादम्' उपमादकं यज्ञं 'पाति' रक्षति ॥२९

* "पात्यग्निर्विपोअग्रं"-"पाति प्रियं रिपोअग्रम्"-इति पाठौ।

অগ্নি এই প্রথিত পৃথিবীর মুখ্য পদ রক্ষা করেন। অগ্নি সূর্য্যরূপে অন্তরীক্ষের উর্দ্ধভাগের মুখ্য পদ রক্ষা করেন। অগ্নি সপ্তশীর্ষ হইয়া বায়ুর সহিত মিলন ভাবে (বিদ্যুদাদি রূপে) মধ্য স্থানের মুখ্য পদ রক্ষা করেন। এই দর্শনীয় অগ্নি দেবগণের আমোদ-স্থান (যজ্ঞ) রক্ষা করেন ॥২৯

इति तृतीयः खण्डः।

अथ—चतुर्थखण्डे—

सैषा प्रथमा।

वामदेवऋषिः पंक्तिर्भ्राजंत्यग्इति दृयीः।
आग्नेयी प्रथमर्तव्या द्वितीया दृश्यते तथीः॥

१ २ ३ १ २ ३
भ्राजंत्यग्नेसमिध्यानदीदिवोजिह्वाचरत्यं
२ ३ १ २ १र २र ३ १ २ ३ २ ३ १र
तरासनि। सत्वंनोअग्नेपयसावसुविद्रयिं
२र ३ १ २
वर्चोदृशेदाः॥ ३० ॥

'समिधान' ऋत्विग्भिः समिध्यमान! दीप्त! हे 'अग्ने'! 'भ्राजन्ती' प्रकाशमाना 'आसनि' आस्ये 'अन्तर्, मध्ये स्थिता त्वदीया 'जिह्वा' हवींषि 'चरति' भक्षयति। हे 'अग्ने'! 'वसुवित्'! धनलम्भक! त्वं 'नः' अस्मभ्यं 'पयसा' अन्नेन सह 'रयिं' रमणीयं धनं 'दृशे' दर्शनाय 'वर्चः' तेजश्च तेजस्वित्वं वा 'अदाः' देहि॥३०

হে প্রদীপ্ত অগ্নে ! তোমার এই প্রকাশমান আস্যে শিখা রূপে দেদীপ্যমান জিহ্বা হবি গ্রহণ করিতেছে ; হে অভীষ্ট-দ অগ্নে ! তুমি আমাদিগকে অন্ন ও তাহার সহিত অন্যান্য রমণীয় ধন প্রদান কর অপিচ আমাদের তেজস্বিতা পরিবর্দ্ধিত কর ॥৩০

অথ দ্বিতীয়া ।

३ १र २र ३ १र २र ३ १र २र
वसंतइन्नुरंत्योग्रीष्मइन्नुरंत्यः । वर्षाण्यनु
३ १ २ ३ १र २र ३ १र २र
शरदोहेमंतःशिशिरइन्नुरंत्यः ॥ ३१ ॥

'वसन्तः इन्नु' वसन्तएव चैत्र-वैशाखरूपवसन्त ऋतुरेव 'रन्त्यः' रमणीयः भवति। 'ग्रीष्मइन्नु'ज्येष्ठाषाढ़रूपो ग्रीष्मऋतुरेव 'रन्त्यः' रमणीयः । 'वर्षाणि' वर्षा श्रावण-भाद्रपदरूपेणावयवीभूतः प्रावृट् ऋतुरेव 'रन्त्यः' रमणीयः । 'तान्यनु' 'शरदः' आश्विनकार्त्तिकरूपेणावयवीभूतऋतुः 'रन्त्यः' रमणीयः । 'हेमन्तः' मार्गशीर्ष-पौषरूपएव रन्त्यः' रमणीयः । 'शिशिरइन्नु' माघ-फाल्गुनरूपएव 'रन्त्यः' रमणीयः ॥३१

বসন্ত ঋতুই অতি রমণীয়, গ্রীষ্ম ঋতুই অতি রমণীয়, বর্ষা ঋতুই অতি রমণীয়, অনন্তর আগত শরৎ ঋতুই অতি রমণীয়, হেমন্ত ঋতুই রমণীয়, শিশির ঋতুই রমণীয়, (এতাবতা দেশ ভেদে, পাত্র ভেদে স কল ঋতুই রমণীয়, কেহই নিন্দনীয় নহে) ॥

अथ तृतीया।

३ १ २ ३ १ २ ३ २ ३ १र २
सहस्रशीर्षा: पुरुष: सहस्राक्ष: सहस्रपात्।
१र २र ३ १ २ ३ १ २ ३ २
स भूमिꣳ सर्वतो* वृत्वात्यतिष्ठद्दशाङ्गुलम्॥ ३२॥

सर्व-प्राणि-समष्टि-रूपो ब्रह्माण्ड-देही विराड़ाख्यो य: पुरुष: सोऽयं 'सहस्रशीर्षा:' (सहस्र-शब्दस्योपलक्षणत्वात्) अनन्तै: शिरोभिर्युक्तइत्यर्थ:। यानि सर्व-प्राणिनां शिरांसि तानि सर्वाणि तद्देहान्त:पातित्वात्तदीयान्येवेति सहस्र-शीर्षत्वम्। एवं सहस्राक्षत्वं सहस्रपादत्वं च। स पुरुषो 'भूमिं' ब्रह्माण्ड-गोलक-रूपां सर्वत: 'आ' समन्तात् 'वृत्वा' परिवेष्ट्य दशाङ्गुल-परिमितं देशम् 'अत्यतिष्ठत्' अतिक्रम्य व्यवस्थित:। (दशाङ्गुलमित्युपलक्षणं) ब्रह्माण्डाद्बहिरपि सर्वतो व्याप्यावस्थितइत्यर्थ:॥३२

सेई पुरुष—अनन्त मस्तके विशिष्ट, अनन्त चक्षु विशिष्ट, ब्रह्माण्ड गोलकान्तर्वर्त्ती समस्त भूमि व्यापिया दशाङ्गुल परिधिर बहिर्द्देशेओ रहियाछेन॥३२

अथ चतुर्थी॥

३ २ ३ २उ ३ १ २ ३ १ २ ३ १ २ ३ १ २
त्रिपादूर्द्ध्व उदैत्पुरुष:पादोऽस्येहाभवत्पुन:।
३ १ क २र ३ २ ३ २
तथा विष्वङ्व्यक्रामदशनानशने अभि†॥३४॥

---

* "विश्वतो"-इति ऋ०।

† "ततो विष्वङ् व्यक्रामत् साशनानशने अभि" ऋ०।

योऽयं 'त्रिपात् पुरुषः' संसार-स्पर्श-रहितः बहुल-स्वरूपः सोऽयम् 'ऊर्ध्वउदैत्' अस्मादज्ञान-कार्य्यात्संसाराद्बहिर्भूतः सन् तत्रत्यैर्गुणदोषै रस्पृष्टः उत्कर्षेण स्थितवान् । 'अस्य' योयं 'पादः' लेशः सोऽय मिह मायायां पुनरभवत् । सृष्टि-संहाराभ्यां पुनः पुनः रागच्छदिति (अस्य सर्वस्य जगतः परमात्म-लेशत्वं भगवता-पुरक्तं—"विष्टभ्याह मिदं कृत्स्न मेकांशेन स्थितो जगदिति") तथा मायाया मागत्यानन्तरं 'विष्वङ्' देव-तिर्य्यगादि-रूपेण विविधः सन् 'व्यक्रामत्' व्याप्तवान् । किं कृत्वा ? 'अशनानशने' अभिलक्ष्य अशनं भोजनादि-व्यवहारोपेतं चेतनं प्राणि-जातम्, अनशनं तद्रहित मचेतनं गिरि-नद्यादिकम् । तदुभयथा यथा स्यात्तथा । अय मेव विविधो भूत्वा व्याप्तवानित्यर्थः ॥३३

এই ত্রিপাৎ পুরুষ, অজ্ঞান কার্য্য সংসারের ঊর্দ্ধে অর্থাৎ বাহিরে আছেন, কিন্তু এই সংসারেরও তাঁহার অংশ আছে, এবং তিনিই চেতন, অচেতন বিবিধ রূপে বর্ত্তমান রহিয়াছেন ॥৩৩

अथ पञ्चमी ।

१ २ ३ २उ ३ २ ३ २उ ३ १ २
पुरुष * एवेद ँ सर्वं यद्भूतं यच्च भाव्यम् † ।
१ २ ३ १ २ ३१ २ ३ १ २ ३ १ २ ३ १
पादोस्य सर्वाभूतानि त्रिपादस्यामृतं दिवि ‡॥३५॥

---

* "पुरुएवेदं"—† "यच्च भव्यम्"—‡ "उतामृतत्वेत्यादि" ऋ० ।

यत् 'इदं' वर्त्तमानं जगत् तत् 'सर्वं' 'पुरुषएव'। 'यद्भूतम्' उत्पन्नं जगत् 'यच्च भाव्यं' भविष्यज्जगत् तदपि पुरुषएव। यथास्मिन् काले वर्त्तमानाः प्राणिनः सर्वेऽपि चराचरात्मक-पुरुषस्यावयवाः तथैव गतागामिनो रपि कल्पयोर्द्रष्टव्य मित्यभि-प्रायः। एतदेवोभयं स्पष्टीक्रियते—'अस्य' पुरुषस्य 'सर्वाणि भूतानि' काल-त्रय-वर्तीनि प्राणि-जातानि 'पादः' चतुर्थोंऽशः। 'अस्य' पुरुषस्यावशिष्टं 'त्रिपात्' स्वरूपम् 'अमृतं' 'विनाश-रहितं' सत् 'दिवि' द्योतनात्मके स्व-प्रकाश-स्वरूपे व्यवतिष्ठतइति शेषः। (यद्यपि "सत्यं ज्ञान मनन्तं ब्रह्म"-इत्यनन्तस्य परब्रह्मणो-हीयदन्तत्वाभावात् पादचतुष्टयं निरूपयितु मशक्यं, तथापि जगदिदं ब्रह्म-स्वरूपापेक्षया अल्पमिति विवक्षित्वात् पादत्वो-पचारः॥३४

याहा किछु उत्पन्न हईयाछे ओ याहा किछु उत्पन्न हईबे—एई समस्तई सेई पुरुष, एई विनश्वर जगत् एई त्रिपात् पुरुषेर एक अंश अथच तिनि द्यु-लोके अविनश्वर पूर्ण स्वरूपे विराजमान आछेन॥३४

अथ षष्ठी।

१ २ ३ २उ ३ १ २ ३ १ २
तावानस्य * महिमाततो † ज्यायाꣳश्चपूरुषः ‡।
३ १ २ ३ १र २र ३ १र २र ३ १ २
उतामृतत्वस्येशानोयदन्ने नातिरोहति॥ ३६॥

---

*"एतावानस्य"—†"अतोज्यायांश्च"—‡"पादोऽस्येत्यादि"ऋ०।

अतीतानागतवर्तमान-रूप-जगदाद्याधारो योऽस्ति 'तावान्' सर्वोऽपि 'अस्य' पुरुषस्य 'महिमा' स्वकीय-सामर्थ्य-विशेषः। न तु तस्य वास्तवं स्वरूपं। वास्तवस्तु 'पुरुषः' 'ततो' महिम्नोऽपि 'ज्यायान्' अतिशयेनाधिकइत्यर्थः। 'उत' अपिच 'अमृतत्वस्य' देवत्वस्य 'अयम् ईशानः' स्वमायया 'यत्' यस्मात्कारणात् 'अन्नेन' प्राणिनां भोगेन अन्नेन निमित्त-भूतेन 'अतिरोहति' स्वकीयां कारणावस्था मतिक्रम्य परिदृश्यमान-जगदवस्थां प्राप्नोति। तस्मात् प्राणिनां कर्म्म-भल-भोगाय जगदवस्था-स्वीकारात् नेद-न्तस्य वस्तु-तत्व मित्यर्थः ॥३५

উক্ত সমস্তই ইহাঁর মাহাত্ম্য, অপিচ যেহেতু ইনি ভোগ্য বস্তুর অনুরোধে স্বীয় স্বরূপ অতিক্রম করিয়া জীবত্ব আরোহণ করেন অথচ সমস্ত অবিনশ্বরের ঈশ্বর অতএব বর্ণিত-স্বরূপ হইতেও অতিশয় শ্রেষ্ঠ ॥৩৫

अथ सप्तमी।

१ २ ३ १ २ ३ २ ३ २ ३ १ २
ततो * विराडजायतविराजोअधिपूरुषः।
३ १र २र ३ २उ ३ १ २ ३ २
सजातोअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ ३७ ॥

"विष्वङ् व्यक्रामत्"-इति यदुक्तं तदेवात्र प्रपञ्चयति—'ततः' तस्मादादि-पुरुषात् 'विराट्' ब्रह्माण्ड-देहः 'अजायत' उत्पन्नः।

* "तस्माद्" क०।

(विविधानि राजन्ते वस्तूयत्रेति विराट्) 'विराजो अधि' विराड्देहस्योपरि तमेव देहमधिकरणं कृत्वा 'पुरुषः' तद्देहाभिमानी कश्चित्पुमानजायत। योऽयं सर्व-वेदान्त-वेद्यः परमात्मा सएव स्वकीयया मायया विराड्देहं ब्रह्माण्ड-रूपं सृष्ट्वा तत्र जीव-रूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवत् (एतच्चाथर्वणिकउत्तरतापनीये विस्पष्टमामनन्ति—"स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्य मूढोमूढइव व्यवहरन्नास्ते माययैवेति)। 'स जातः' विराट् पुरुषः 'अतपरिचित' अतिरिक्तोऽभूत्। विराड्व्यतिरिक्तो देव-तिर्य्यङ्मनुष्यादिरूपोऽभवत्। पश्चाद्देवादि-जीव-भावादूर्ध्वं भूमिं ससर्जेति शेषः। 'अथो' भूमि-सृष्टेरनन्तरं तेषां जीवानां 'पुरः' ससर्ज [पूर्य्यन्ते सप्तभि र्धातुभि रिति पुरः] शरीराणि ॥३६

সেই পুরুষরূপ কারণ হইতে বিরাট্ অর্থাৎ ব্রহ্মাণ্ড দেহাভিমানী জীব পুরুষ হইয়াছেন, সেই জীব পুরুষ উৎপন্ন মাত্রই দেব তির্য্যঙ্ মনুষ্যাদি রূপে বিরাট্ হইতে ব্যতিরিক্ত হইয়াছেন, তাহার পরে ভূম্যাদি সপ্ত ধাতু, তদনন্তর জীবাশ্রয় শরীর সকল হইয়াছে ॥৩৬

मन्येवामिति पञ्चर्चो वामदेवेन वीक्षिताः ।
अत्राद्यैकान्तिमे च द्वे त्रिष्टुबस्तासु चादिमा ॥
उपरिष्टाज्ज्योतिरिति बह्वृचैव विधीयते ।
अन्ये अनुष्टुभौ द्यावा-पृथिव्योः प्रथमा तथा ॥
द्वितीयैन्द्री चतुर्थी च तृतीयाशीर्निजात्मनः ।
स्तुतिर्गवा मन्तिमेति छन्दो दैवत-निर्णयः ॥

अथ अष्टमी

वामदेवऋषिः । त्रिष्टुप्छन्दः । द्यावापृथिवी देवते ।

१ २ ३ १ २ ३ १र २र ३ १
मन्येवांद्यावापृथिवीसुभोजसौयेअप्रथेथाम
२ ३ १र २र १ २ ३ १ २
मितमभियोजनम् । द्यावापृथिवीभवतꣳ
३ १र २र ३ १ २
स्योनेतेनोमुञ्चतमꣳहसः ॥ ३७ ॥

हे 'द्यावापृथिवी' द्यावापृथिव्यौ! 'वां' युवां 'सुभोजसौ' शोभनपालयित्रावितिं 'मन्ये' अहं जानामि हे द्यावापृथिव्यौ 'अमितम्' अपरिमितं 'योजनं' [युज्यते पुरुषोऽनेनेति योजनं] धनादि तत् 'अभ्यप्रथेथाम्' अभिविस्तारयतम् हे 'द्यावापृथिवी' द्यावापृथिव्यौ! युवां अस्माकं 'स्योने' सुरूपे स्वसुखकार्ये 'भवतम्' 'ते' द्यावापृथिव्यौ 'वः' अस्मान् 'अंहसः' पापात् 'मुञ्चतं' 'मोचययतम् ॥ ३७

আমি স্বীকার করি—এই দ্যাবা-পৃথিবী আমাদের মঙ্গল কারী, যাঁহারা অপরিমিত সম্বন্ধের বা অপরিমিত ভোগ্য বস্তুর বিস্তার করিতেছেন ; হে দ্যাবাপৃথিবী ! আমাদিগের কল্যাণের জন্য আমাদিগকে পাপ হইতে মুক্ত কর ॥৩৭

अथ नवमी।

अनुष्टुप्छन्दः। इन्द्रो देवता। वामदेव ऋषिः।

१ २ ३ १ २ ३ १ २ ३ २ ३ १ २
हरीतइन्द्रश्मश्रूण्युतोतेहरितौहरी।

१ २ ३ १ २ ३ १ २ ३ १ २
तंत्वास्तुवन्तिकवयःपरुषासोवनर्गवः॥ ३८॥

हे 'इन्द्र' 'ते' तव 'श्मश्रूणि' 'हरी' सोम-पानेन हरित-वर्णानि' [तथाचश्रूयते—'इन्द्रः श्मश्रूणि हरिताभि प्रणुत' इति। "शेश्छन्दसि बहुल"-मिति हरि-शब्दात्परस्य शेर्लुक] 'उतो' अपिच। 'ते' 'हरी' अश्वौ 'हरितौ' हरिद्वर्णौ। 'कवयः' मेधाविनः ' पुरुषासः' पुरुषाः 'वनर्गवः' वननीयाः सम्भजनीया सेवनीयो गावो येषां ते वनर्गवः [मध्यरेफश्छान्दसः। गोस्त्रियो रितिऋस्वत्वं] तादृशः कवयः 'तं' 'त्वा' त्वां स्तुवन्ति॥ ४८॥

হে ইন্দ্র! যাঁহাদিগের ভাল ভাল গোধন আছে, সেই বড় বড় কবিগণ, বর্ণনা করেন—যে, হরিত বর্ণ সোম রস পান করিয়াই তোমার শ্মশ্রু সকল হরিত বর্ণ হইয়াছে এবং এই কারণেই ত্বদীয় অশ্বগণও হরিত বর্ণ॥৩৮

॥ अथ दशमी ॥

वामदेव ऋषिः । अनुष्टुप्छन्दः । आशासने विनियोज्या ।

२उ ३ १ २ ३ २ ३ २ ३ १ ३२ ३ २ ३
यद्वर्चोहिरण्यस्ययद्वावर्चोगवामुत । सत्यस्य
१ २ ३ २ ३ १ २ ३ १ २
ब्रह्मणोवर्चस्तेनमासꣳसृजामसि ॥ ४९ ॥

'हिरण्य' हित-रमणीयस्य एतन्नामकस्य 'यद्वर्चः' तेजोऽस्ति । 'यद्वा' अपिच । 'गवाम्' एतन्नामकानां 'यद्वर्चः' तेजोऽस्ति । 'उत' अपिच । 'सत्यस्य' सर्वैः सम्मतस्य 'ब्रह्मणः' यद्वर्चोऽस्ति तेन तैः 'मा' 'संसृजामसि' सम्पादयामः । धनवन्तः पशुमन्तः श्रोत्रिया भवेमेति तात्पर्यार्थः ॥ ४९ ॥

आमरा हिरण्ययेर (तेजेर) सत्ता, गोसकलेर (अर्थात् पृथिवी, जल ও वायुर) सत्ता एवं सत्य स्वरूप ब्रह्मेर सत्ताय-सृष्ट हइयाथाकि ॥ ३९

॥ अथ एकादशी ॥

३ १ २ ३ २ ३ २ क २र १ २
सहस्तंनइन्द्रदध्योजईशेह्यस्यमहतोविरप्-
३ २ ३ ११ २र ३ १ २ ३ २ ३ १
शिन् । क्रतन्नन्त्स्त्स्यविरंचवाजंटचेषुशु
२ ३ १ २
वुंत्सुहनाकृधीनः ॥ ४० ॥

हे 'विपि्रशन्'! विशेषेण रपणं व्यक्त-वचनं तदस्यास्तीति विरप्शी, तस्य सम्बोधनं हे विपि्रशन्! विशेषेण स्तोतृ-विषये सत्यवाक्य! 'इन्द्र'! 'ते' तव 'सहः' शत्रूणामभिभवन-रूपम् 'ओजो' बलं 'नः' अस्मभ्यं 'दद्धि' देहि (ददातेश्छान्दसं रूपं लोड़ि हेर्द्धिभावादिना) यस्मात् त्वं तस्य 'अस्य' 'महतः' बलस्य 'ईशे' ईश्वरो भवसि। अतो हे इन्द्र! 'नः' अस्माकं 'क्रतुं न' यज्ञमिव 'वृज्नं' धनं 'स्थविरम्' अतिशयेन प्रवृद्धं "वाजं" बलं च 'कृधि' कुरु। किञ्च नोऽस्माकं 'शत्रून्' 'वृत्रेषु' आवरकेषु उपायेषु 'कृधि' कुरु॥ ४०

যাঁহার স্তুতি কার্য্যে সততই স্ফুট বাক্যের স্ফুর্ত্তি হইয়া-থাকে এতাদৃশ! হে ইন্দ্র! যেহেতু তুমিই সুমহৎ বলের অধিপতি অতএব আমাদিগকে ইন্দ্রিয়-দমনোপযোগি ত্বদীয় সামর্থ্য প্রদান কর। ইন্দ্র! আমাদিগকে আবশ্যকানুযায়ি সমধিক সামর্থ্য ও ধন প্রদান কর এবং অস্মদাদির শত্রুবর্গকে আবরণের অন্তর্গত কর॥ ৪০

॥ অথ দ্বাদশী॥

३ १ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ २
सहर्षभाः सहवत्साउदेतविश्वारूपाणिबिभ्र
३ २ ३ २ ३ १ २ ३ २ ३ १ २
तीर्द्युभीः। उरुःपृथुरयंवोअस्तुलोकइमा
२र ३ २ ३ १ २
आपः सुप्रपाणाइहस्त॥ ४१॥

हे 'सहर्षभाः' वृषभैः सहिताः! 'सहवत्साः' वत्सैः सहिताः! गावः! 'द्युभीः' सायं प्रातः काले द्विविधान्यधांसि

यासां ता द्रूध्रीः द्रूध्राः । 'विश्वा' सर्वाणि नाना रूपाणि बिभ्रतीं विभ्रत्यः यूयम् 'उदेत' उद्गच्छत समृद्धाः सत्यः आगच्छत । किञ्च । 'उरुः' बहुः 'पृथुः' विस्तीर्णः (उरुः पृथु रिति शब्दाभ्याम् आयाम-विस्तारौ उच्येते । 'अयं लोकः' 'वः' युष्माकम् 'अस्तु' भवतु । 'इमा आपः' 'इह' लोके भूतले अस्मिंस्थाने 'सुप्रपाणाः' सुखेन प्रकर्षेण पातुं योग्याः सन्तु तस्मादिह बद्धीभूताः 'स्त' भवत उपविशतेति पूर्वेण सम्बन्धः ॥ ४१ ॥

হে অনন্তদীপ্তে ! অনন্তস্রষ্টঃ! তেজঃপুঞ্জ! তোমরা সায়ং প্রাতঃকালে বিবিধ আকার ধারণ করত উদিত হইতেছ ; এই সুবিস্তীর্ণ ভূলোক তোমার কৃপাপাত্র হউক, এই লোকস্থ বায়ু বারি সমস্ত স্বাস্থ্যকর কর ॥ ৪১

इति चतुर्थः खण्डः ।

—:-०-:—

अथ पञ्चमे खण्डे——

॥ अथ प्रथमा ॥

चतुर्दशाग्न्यायूंषीत्याद्यास्तच जगत्यसौ ।
विभाट्चिष्टुप्चित्रमिति गायत्री द्वादशेतराः ।
आद्याग्नेः पवमानस्य स्तुतिः सौर्यस्त्रयोदश ।

ऋषीणां विप्रकीर्णत्वात्तत्र तत्राभिदृश्यते ।
शतं वैखानसा एवं दृष्टवन्तो महर्षयः ।

२ ३ १ २ ३ २ ३ २ १ २
अग्न आयूꣳषि पवस आसुवोर्जमिषं च नः ।
३ १ २ ३ १ २
आरे बाधस्व दुच्छुनाम् ॥ ४२॥

हे 'अग्ने' पवमान-रूप ! अस्माकमायूंषि अन्नान्येतन्नामकानि वा 'पवसे' क्षरसि 'नः' अस्माकम 'ऊर्जम्' अन्नरसम् 'इषम्' अन्नं च 'आसुव' आभिमुख्येन प्रेरय । किञ्च । 'दुच्छूनां' (रक्षोनामैतद्) रक्षांसि 'आरे' अस्मत्तो दूरएव 'बाधस्व' सम्पीड़य ॥ ४२ ॥

हे अन्तरीक्षस्थ अग्ने ! आमादिगेर आयु वृद्धि कर एवं आमादिगेर आयुर उपयोगी अन्न ओ जल सुखकर कर, विपक्ष दलके दूरेई दलन कर ॥ ४२

॥ अथ द्वितीया ॥

वभ्राण्नामकएत-तु सूर्य-पुत्रीददर्श सः ॥

३ २ ३ १ २ ३ २उ ३ १ २ ३ १ २ ३
विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपता
१ २ १ ३२र ३ १ २ ३ १ २ ३ १ २ ३ १
वविह्रुतम्। वातजूतो यो अभिरक्षति त्मनाप्रजाः
२ ३ १र २र
पिपर्त्ति बहुधा विराजति ॥ ४३ ॥

'विभ्राट्' विभ्राजमानः विशेषेण दीप्यमानः सूर्यः 'बृहत्' परिवृढं 'सोम्यं' सोममयं 'मधु' पिबतु। किं कुर्वन्? 'यज्ञपतौ' यजमाने 'अविहुतम्' अकुटिलम् अकण्टकम् 'आयुर्दधत्' अन्नं वा कुर्वन्। 'यः' सूर्यो 'वातजूतः' वातेन वायुना प्रेर्यमाणः सन् 'त्मना' आत्मना स्वयमेव अभिरक्षति सर्वं जगदभिमृशन् पालयति(राशि-चक्रस्य वायु-प्रेर्यत्वात् सूर्यस्यापि तत्प्रेर्यत्वम्) स सूर्यः 'प्रजाः' पिपर्ति'* वृष्ट्यादि-प्रदानेन पूरयति पालयति वा। 'बहुधा' 'विराजति' विशेषेण दीप्यते च। ४३॥

यो सूर्य्य, वायु-कर्तृक* चालित हइया स्वयं एइ समस्त जगत् संरक्षण करितेछेन, यो सूर्य्य वृष्ट्यादि प्रदान द्वारा समस्त तृषा निवारण करितेछेन, यो सूर्य्य दिवसे ओ निशितो विभिन्न प्रकारे आलोक दान करितेछेन, विशेष रूपे प्रदीप्त; सेइ सूर्य्य यज्ञकारी आमादिगके अकपट आयु प्रदान करत एइ सोमीय मधु पान करुन॥ ४३

॥ अथ तृतीया ॥

कुत्सा।

३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २
चित्वंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुण-

*"पिपर्ति"-"पुपोष"-इति, "बहुधा" "पुरुधा" इति च पाठौ॥

३ २ ३ १ २ ३ २ ३ १ २ ३ १
स्याग्नेः। आप्राद्यावापृथिवीअन्तरिक्षꣳसू-
२ ३ १र २र ३ १ २
र्य आत्माजगतस्तस्थुषश्च ॥ ४४ ॥

'देवानां' दीव्यतीति देवा रश्मयः, तेषां देवानामेव वा प्रसिद्धानाम् 'अनीकं' तेजः-समूह-रूपं 'चित्रम्' आश्चर्य-करं सूर्य-मण्डलम् 'उदगात्' उदयाचलं प्रयासीत्। कीदृशं ? 'मित्रस्य वरुणस्याग्नेश्च' (चक्षुरुपलक्षणमेतत्) एतदुपलक्षितानां जगतां 'चक्षुः' प्रकाशकं चक्षुरिन्द्रियस्थानीयं वा। उदयं प्राप्यैव 'द्यावा-पृथिवी' दिवं च पृथिवीं च 'अतरिक्षं' च 'आप्राः' स्वकीयेन तेजसा 'आ' समन्तात् अपूरयत्। ईदृग्भूत-मण्डलान्तरवर्ती सूर्यः अतर्यामितया सर्वस्य प्रेरकः परमात्मा 'जगतो' जङ्गमस्य 'तस्थुषश्च' स्थावरस्य च 'आत्मा' स्वरूप-भूतः स हि सर्वस्य स्थावर-जङ्गमात्मकस्य कार्य-वर्गस्य (कारणाच्च कार्यं नातिरिच्यते। तथाच पारमर्ष-सूत्रं—"तदनन्यत्वमारम्भ-णशब्दादिभ्यः"-इति। यद्वा। स्थावर-जङ्गमात्मकस्य सर्व-प्राणि-जातस्य जीवात्मा। उदिते हि सूर्ये मृतप्रायं सर्वं जगत् पुनश्चेतन-युक्तं सत् उप-लभ्यते। तथाच श्रूयते-"योसौ तमो नुदेति सर्वेषां भूतानां। प्राणाना-दायोदेती ति ॥ ४४ ॥

দিবারাত্রি ও অগ্নির চক্ষু স্থানীয় প্রকাশক, তেজ সমস্তের আকর স্বরূপ আশ্চর্য্যরূপ এই সূর্য্য ভূলোক দ্যুলোক এবং অন্তরীক্ষলোক স্বীয় প্রভায় পরিপূর্ণ করিয়া থাকেন। ইনি কি স্থাবর, কি জঙ্গম, সকল প্রকার প্রাণী রই জীবন ॥ ৪৪

॥ अथ चतुर्थी ॥

आयङ्गौः पृश्निरित्यस्य सार्पराज्ञी समैक्षत ।
ऋचस्त्रिस्त्रीभवेदासां विकल्पेनात्मदैवता ॥

१र २र ३ १ २ ३ १ २
आयंगौःपृश्निरक्रमीदसदन्मातरं
३ २ ३ १ २ ३ १ २
पुरः । पितरंचप्रयंत्स्वः ॥ ४५ ॥

'गौः' गमनशीलः 'पृश्निः' प्राष्टवर्णः व्याप्ततेजाः 'अयं' सूर्यः 'आक्रमीत्' आक्रान्तवान् उदयाचलं प्राप्तवानित्यर्थः । आक्रम्य च 'पुरः' पुरस्तात् पूर्वस्यां दिशि 'मातरं' सर्वस्य भूतजातस्य निर्मात्रीं 'भूमिम्' 'असदत्' आसीदति प्राप्नोति (सदे स्छान्दसो लेट् । लृदित्वात् च्लेरङादेशः) ततः 'पितरं' पालकं द्युलोकं, 'च' शब्दा दन्तरिक्षं 'प्रयन्' प्रकर्षेण शीघ्रं गच्छन् 'स्वः' सु अरणः शोभन-गमनो भवति । यद्वा । पितरं स्वर्द्यूलोकं प्रवर्त्तते ॥ ४५ ॥

এই সর্ব্বত্রগামী, প্রাষ্ঠবর্ণ, তেজঃপুঞ্জরূপী সূর্য্য সতত পূর্ব্বদিকে উদিত হইয়া থাকেন, উদিত হইয়াই ভূতসমস্তের নির্ম্মাণ-ভুমি মাতৃরূপা এই পৃথিবীকে প্রসন্না করেন এবং পিতৃরূপে সমস্ত প্রাণিবর্গের পালয়িতা দ্যুলোকেরও প্রকাশক হইয়া থাকেন ॥ ৪৫ ॥

॥ अथ पञ्चमी ॥

३ १ २ २उ ३ १ २ ३ २
अन्तश्चरतिरोचनास्यप्राणादपानती।
२उ ३ १र २र
व्यख्यन्महिषोदिवम्॥ ४६॥

'अस्य' सूर्यस्य 'रोचना' रोचमाना दीप्तिरन्तःशरीर-मध्ये मुख्य-प्राणात्मना 'चरति' वर्त्तते। किं कुर्वती? 'प्राणाद-पानती' (मुख्य-प्राणस्य प्राणाद्याः पञ्च वृत्तयः। तत्र प्राणनं नाड़ीभि रूर्ध्वं वायो र्निर्गमनं) तथाविधात्प्राणात् प्राणनादनन्त-रम् अपानती (अपाननं नाड़ीभि रवाङ्मुखं वायो र्नयनं) तत्-कुर्वन्ती (अपपूर्वादनिते र्लटः शतृ, अदादित्वाच्छपो लुक्। उगितश्चेति ङीप्। शतुरनुमइति नद्याउदात्तत्वम्।

यद्वा। 'अन्तः' द्यावापृथिव्योर्मध्ये "अस्य" सूर्यस्य "रोचना" रोचमाना दीप्तिः "चरति" गच्छति (रुच दीप्तौ। अनुदान्ते तश्च हलादेरिति युच्) किंकुर्वन्ती ? "प्राणात्" प्राणनादुदयादनन्तरम् 'अपानती' सायाह्न-समये अस्तङ्गच्छन्ती। ईदृश्या दीप्त्या युक्तः) अतएव 'महिषो' महान् सूर्यः 'दिवम्' अन्तरिक्षं उदयास्तम-योर्मध्ये 'व्यख्यत्' विचष्टे प्रकाशयति (महेरचि महेष्टिषजिति औणादिकष्टिषच् प्रत्ययः। चक्षिङःख्याञ् छांदसे लुङि अस्यति-वक्तिख्यातीत्यादिना चेरङादेशः॥

এই সূর্য্যের প্রভা দ্যাবা পৃথিবীর মধ্য ভাগে প্রকাশিত

হইয়া অধোমুখে এই পৃথিবীকে প্রকাশ করিতেছেন অপিচ এই মহাভাগ সূর্য্যদেবই দ্যুলোকও প্রকাশ করিতেছেন ॥ ৪৬

॥ अथ षष्ठी ॥

३ २४ ३ १ २ ३ १ २ ३ १ २
त्रिंशद्धामविराजतिवाक्पतंगायधी
३ २ ३ २ ३ १ २
यते । प्रतिवस्तोरहद्युभिः ॥ ४७ ॥

'त्रिंशद्धाम' धामानि स्थानानि (वचनव्यत्ययः) 'वस्तोः' वासरस्य अहोरात्रस्यावयवभूतानि । 'अह' शब्दोऽवधारणे । 'द्युभिः' सूर्यस्य दीप्तिभिरेव 'विराजति' विराजते विशेषेण दीप्यते (व्यत्ययेनैकवचनं । मुहूर्तान्यत्रधामानुच्यन्ते । पञ्चदशरात्रेःपञ्चदशाङ्गः) 'पतङ्गाय' पतति गच्छतीति पतङ्गः सूर्यः तस्मै सूर्याय स्तुति-रूपा 'वाक्' 'प्रतिधीयते' प्रतिमुखं स्तोतृभिर्विधीयते क्रियते [यद्वा 'वस्तोः' अहः 'त्रिंशत्' 'धाम' धामानि (घटिकाभिप्रायमेतत्) त्रिंशद्घटिकाः (अत्यन्तसंयोगे द्वितीया) एतावत् कालं 'द्युभिः' दीप्तिभि रसौ सूर्यो 'विराजति विशेषेण दीप्यते । तस्मिंश्च समये 'वाक्' त्रयीरूपा तस्मै 'पतङ्गाय' 'प्रतिधीयते' प्रतिमुखं धार्यते] तं पूर्वं सेवतइत्यर्थः ॥ [श्रूयते हि "ऋग्भिः पूर्वाह्णे दिवि देवईयते, यजुर्वेदे तिष्ठति मध्ये अह्नः । सामवेदे नास्तमये महीयते वेदैरशून्यस्त्रिभिरेति सूर्यः"-इति । यदा त्विह सूक्ते सार्पराज्ञ्या आत्मस्तुतिस्तदा सूर्यात्मना स्तूयतइत्यवगन्तव्यम् ॥ ४७ ॥

পতঙ্গরূপী এই সূর্য্য স্বীয় দীপ্তিতে প্রতি দিবসকে ত্রিংশৎভাগে ভোগ করিয়া থাকেন, এতাদৃশ হিতকারী দেবতার স্তুতি-ক্রিয়ায় বাক্যপ্রয়োগ সাধুমাত্রেরই কর্ত্তব্য ॥ ৪৭

॥ অথ সপ্তমী ॥

३ २ ३ १ २ ३ १ २ ३ १ २
अपत्येतायवोयथानक्षत्रायंत्यक्तुभिः ।
१ २ ३ १ २
सूरायविश्वचक्षसे ॥ ४८ ॥

'तेत्र' 'तायवो' 'यथा' प्रसिद्धास्तस्करादिव 'नक्षत्राणि' देवगेहरूपाणि ("देवगृहा वै नक्षत्राणि" इति श्रुत्यन्तरात्) यद्वा। इह लोके मानुषा ये स्वर्गं माप्नुवन्ति ते नक्षत्ररूपेण दृश्यन्ते। तथाच—श्रूयते—'यो वा इह यजते असुं स लोकं नक्षते तन्नक्षत्राणां नक्षत्रत्व' मिति। यद्वा, तेषां सुकृतिनां ज्योतींषि नक्षत्राण्युच्यन्ते। 'सुकृतां वा एतानि ज्योतींषि यन्नक्षत्राणी' त्याम्नानात्। यास्कस्त्वाह—'नक्षत्राणि नक्षतेर्गतिकर्मणो नेमानि न क्षत्राणीति च ब्राह्मण' मिति) यथाविधानि नक्षत्राणि 'अक्तुभिः' रात्रिभिः सह 'अपयन्ति' अपगच्छन्ति। 'विश्वचक्षसे' विश्वस्य सर्वस्य प्रकाशकस्य 'सूराय' सूर्यस्य आगमनं दृष्ट्वेति शेषः (तस्करा नक्षत्राणि च रात्रिभिः सह सूर्यआगमिष्यतीत्याकुलायन्तिइत्यर्थः। तायुरिति स्तेननाम। तायुस्तस्करइतितन्नामसु पाठात्। अक्तुरिति रात्रिनाम। शर्वरीअक्तुरितितन्नामसु-पाठात् ॥ ४८ ॥

নিশাকালে নভোমণ্ডলে পরিদৃশ্যমান উড়ুগণ বিশ্ব-প্রকাশক এই সূর্য্যদেবের উদয়ে তস্কর দলের ন্যায় স্ব-সাহায্যকারিণী নিশার সহিত প্রস্থান করেন ॥ ৪৮ ॥

॥ অথাষ্টমী ॥

१ २ ३ २ ३ २ ३ २ ३ २ ३ २ ३
अदृश्रन्न*स्यकेतवोविरश्मयोजनाँ
१ २ १ २ ३ १ २
अनु। भ्राजन्तोअग्नयोयथा ॥ ४९ ॥

'अस्य' सूर्यस्य 'केतवः' प्रज्ञापका 'रश्मयो' दीप्तयः 'जनान्-अनुअदृश्रन्' जनान् सर्वान् अनुक्रमेण प्रेक्षन्ते। सर्वं जगत्प्रकाशयन्तीत्यर्थः। तत्र दृष्टान्तः—'भ्राजन्तो' दीप्यमाना 'अग्नयइव' ॥ ४९ ॥

এই সূর্য্যের বিখ্যাতিকারী, জ্বলন্ত অগ্নির ন্যায় দেদীপ্যমান, এই রশ্মিপুঞ্জই সমস্ত জগৎ প্রকাশ করিতেছেন ॥ ৪৯ ॥

॥ অথ নবমী ॥

३ १ २ ३ १ २ ३ १ २
तरणिर्विश्वदर्शतोज्योतिष्कृदसि
३ १ २ ३ २
सूर्य। विश्वमाभासिरोचनम् ॥ ५० ॥

---

* "अदृश्रन्"—"अदृश्रम्" इति पाठौ ॥

हे 'सूर्य' त्वं 'तरणिः' प्रगन्ता अन्येन गन्तुमशक्यस्य महतोऽध्वनो गन्तासि (तथाच स्मर्यते—"योजनानां सहस्रे द्वे द्वे शते द्वे च योजने। एकेन निमिषार्द्धेन क्रममाणं नमोस्तु ते"-इति। यद्वा। उपासकानां रोगात्तारयितासि। "आरोग्यं भास्करादिच्छे" दिति स्मरणात्) तथा 'विश्वदर्शतः' विश्वैः सर्वैः प्राणिभिर्दर्शनीयः (आदित्य-दर्शनस्य चण्डालादि-दर्शन-जनित-पाप-निबर्हण-हेतुत्वात्। तथाचापस्तम्बः—'दर्शने ज्योतिषां दर्शन' मिति। यद्वा, 'विश्वं' सर्वं भूतजातं 'दर्शतं' द्रष्टव्यं प्रकाश्यं येन स तथोक्तः) तथा 'ज्योतिष्कृत्' ज्योतिषः प्रकाशस्य कर्ता। सर्वस्य वस्तुनः प्रकाशयितेत्यर्थः (यद्वा। चन्द्रादीनां। रात्रौ हि अस्तमये चन्द्रादिषु सूर्य-किरणाः प्रतिफलिताः अतोन्धकारं निवारयन्ति। यथा द्वारस्य दर्पणोपरि निपतिताः सूर्यरश्मयो गृहान्तर्वर्ति तमो निवारयन्ति तद्वदित्यर्थः यस्मादेवं तस्मात् 'विश्वं' प्राप्तं 'रोचनं' रोचमानम् 'अन्तरिक्षम्' 'आ' समन्तात् 'भासि' प्रकाशयसि॥

यद्वा। हे "सूर्य" अन्तर्यामितया सर्वस्य प्रेरक परमात्मन्! "तरणिः" संसाराब्धेस्तारकोसि। यस्मात् त्वं 'विश्वदर्शतः' विश्वैः सर्वैर्मुमुक्षुभिर्दर्शतोद्रष्टव्यः साक्षात्कर्तव्यइत्यर्थः [अधिष्ठान-साक्षात्कारे हि आरोपितं निवर्तते] ज्योतिषः सूर्यादेः कर्त्ता [तच्चाम्नायते-"चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायते" ति] ईदृशस्त्वं चिद्रूपतया 'विश्वं' सर्वं दृश्यजातं 'रोचमानं' दीप्यमानं यथा भवति तथा 'आभासि' प्रकाशयसि (मैवं न्यक्करणे हि सर्वं जगत् दृश्यते। तथाचाम्नायते-"तमेवभांतमनुभातिसर्वं तस्य भासा सर्वमिदं विभाती" ति॥ ५०॥

হে সূর্য্য! তুমি সমস্ত জগতের দর্শনীয় ও জ্যোতিকারী এবং প্রকাশক রূপে পথ-প্রদর্শক হইতেছ এই অন্তরীক্ষ সমস্ত ও প্রকাশ করিয়া রাখিয়াছ ॥ ৫০ ॥

॥ অথ দশমী ॥

३ २ ३ २ ३ १ २ ३ १र २र ३ १
प्रत्यङ्देवानांविशः प्रत्यङ्ङुदेषिमा
२ १ २ क २र ३ २
नुषान्। प्रत्यङ्विश्वꣳस्वर्दृशे ॥ ५१ ॥

हे सूर्य! त्वं 'देवानां' 'विशः' मरुन्नामकान् देवान् ['मरुतो वै देवानां विशः"-इति श्रुत्यन्तरात्। तान्मरुत्सञ्ज्ञकान्देवान् 'प्रत्यङ् उदेषि' प्रतिगच्छन्नुदयं प्राप्नोषि। तेषामभिमुखं यथा भवति तथेत्यर्थः। तथा 'मानुषान्' मनुष्यान् प्रत्यङ् उदेषि। तेपि यथास्मदभिमुखएव सूर्यउदेतीति मन्यन्ते तथा। 'विश्वं' प्राप्तं 'स्वः' द्यां लोकं 'दृशे' द्रष्टुं 'प्रत्यङ्' उदेषि। यथा स्वर्लोक-वासिनो जनाः स्वस्याभिमुखेन पश्यन्ति तथा उदेषीत्यर्थः [एतदुक्तं भवति—ये लोकाः पश्यन्ति ते जनाः सर्वेऽपि स्वस्याभिमुख्येन सूर्यं पश्यन्तीति। तथाचाम्नायते—'तस्मात्सर्वएव मन्यन्ते मां प्रत्युदगा' दिति ॥ ५१ ॥

হে সূর্য্য! তুমি অন্তরীক্ষস্থ দেবগণের সম্মুখে উদয় হইতেছ, তুমি ভূলোকস্থ আমাদিগেরও সম্মুখেই উদয় হইতেছ এবং দ্যুবাসিদিগের দর্শনার্থ তাহাদিগেরও সম্মুখেই উদয় হইতেছ—কি আশ্চর্য্য! একমাত্র তুমি লোকত্রয়ের

সম্মুখস্থ হইতেছ, যিনি যথা হইতে দর্শন করুন তোমাকে সম্মুখেই দেখিতে পাইবেন ॥ ৫১

अथ एकादशी।

१ २ ३ १ २ ३ २ ३ २ ३
येनापावकचक्षसाभुरण्यंतंजनाꣳ
१ २ १ २ ३ १ २
अनु। त्वंवरुणपश्यसि ॥ ५२ ॥

हे 'पावक' सर्वस्य शोधक 'वरुण' अनिष्ट-वारक सूर्य ! त्वं 'जनान्' प्राणिनः 'भुरण्यन्तं' धारतन्तं पोषयन्तं वा इमं लोकं येन 'चक्षसा' प्रकाशेनानु पश्यसि अनुक्रमेण प्रकाशयसि तं प्रकाशं स्तुमइति शेषः। [यद्वा। उत्तरस्यामृचिसम्बन्धः, तेन चक्षसा उदेतीति। तथा च यास्केनोक्तं—तत्तेवयं स्तुमइति वाक्यशेषोपिवोत्तरस्या मन्वयस्तेन व्याख्यातीति' ॥ ५२ ॥

সমস্ত পদার্থের শোধক ও অনিষ্টবারক হে সূর্য্য ! তুমি প্রাণিগণকে পোষণ করত যে প্রকাশে প্রতিনিয়ত প্রকাশিত করিয়া থাক, সেই প্রকাশ সর্ব্বথা বর্ণনীয় ॥ ৫২

अथद्वादशी।

१र २र ३ १ २ ३ २ ३ १ २ ३
उदग्ना*मेषिरजः पृथ्वहाभिमानोअ
१ २ २ ३ १ ३
क्तुभिः। पश्यंजन्मानिसूर्य ॥ १२ ॥

* "उद्याम्"—"विद्याम्"—इति पाठौ ॥

हे 'सूर्य!' त्वं 'पृथु' सुविस्तीर्णं 'रजः' लोकं [लोका रजांस्युच्यन्ते"-इति यास्क-वचनात्] द्युलोकं 'द्याम्' अन्तरिक्षलोकम् 'उदेषि' उद्गच्छसि। किं कुर्वन् ? 'अहानि' 'अक्तुभिः' रात्रिभिः सह 'मिमानः' उन्मानयन् [आदित्यगत्यधीनत्वादहोरात्रविभागस्य] तथा 'जन्मानि' जननवन्ति भूतजातानि 'पश्यन्' प्रकाशयन् ॥ ५३ ॥

হে সূর্য্য! তুমি এই সুবিস্তীর্ণ অন্তরীক্ষ লোক, দ্যুলোক ও ভূলোক অহোরাত্রে পরিমাণ করত এবং সমস্ত পদার্থের প্রকাশয়িতা হওত প্রতিনিয়তই উদয় হইতেছ ॥ ৫৩

अथ त्रयोदशी।

१ २ ३ २ ३ २ ३ २ ३ १ क २र
अयुक्तसप्तशुंध्युवः सूरो रथस्य नप्त्र्यः
१ २ ३ १ २
ताभिर्याति स्वयुक्तिभिः ॥ १३ ॥

'सूरः' सर्वस्य प्रेरकः सूर्यः, 'शुन्ध्युवः' शोधिका अश्वास्त्रयः। तादृशीः सप्त सप्त संख्याकाः 'अयुक्त' स्व-रथे योजितवान्। कीदृशीः ? 'रथस्य' 'नप्त्र्यः' नपातयित्र्यः। याभिर्युक्तो रथो याति न पतति ईदृशीरित्यर्थः। एवं भूताभिस्ताभिरश्वस्त्रीभिः स्वयुक्तिभिः स्वकीय-योजनेन रथे संबद्धाभिर्याति यज्ञगृहं प्रत्यागच्छति। अतस्तस्मै हविर्दातव्य मिति वाक्य-शेषः ॥ ५४ ॥

সূর্য্য সেই সপ্ত ঘোটকী স্বীয় রথে যুক্ত করেন, যাহারা তাঁহার ভার বহনে সক্ষম; সেই স্বকীয় রথে সর্ব্বত্র গমন করিয়া থাকেন ॥ ৫৪

अथ चतुर्दशी।

३ १ २ ३ २ ३ २ ३ १ २
सप्तत्वाहरितोरथेवहंतिदेवसूय।

३ १ २
शोचिष्केशंविचक्षण॥ १४॥

हे 'सूर्य' 'देव!' द्योतमान! 'विचक्षण'! सर्वस्य प्रकाशयितः! 'सप्त' सप्त-सङ्ख्याकाः 'हरितः' अश्वाः रस-हरण-शीला रश्मयो वा 'त्वा' त्वां 'वहन्ति' प्राप्नुवन्ति। कीदृशं 'रथे' अवस्थित मिति शेषः तथा 'शोचिष्केशं' शोचींषि तेजांस्येव यस्मिन् केशाइव दृश्यन्ते स तथोक्तस्तमिति॥ ५५॥

হে সূর্য্য! হে সমস্ত জগতের প্রকাশয়িতঃ! দেব! তোমাকে হরিতবর্ণ সপ্ত অশ্বে * বহন করিয়া থাকে; তাহারা তোমার রথে সুনৈপুণ্যে সংযুক্ত রহিয়াছে এবং তাহাদের স্কন্ধদেশীয় কেশ সকল অতি শুভ সুচিক্কণ॥ ৫৫

* সায়ণাচার্য্য বলেন—রশ্মিপুঞ্জই অশ্বরূপে কল্পিত এবং তদীয় প্রভাপুঞ্জই কেশস্থানীয়।

—:০:—

॥ ইতি শ্রীমদ্ ভগবত্ কুথুমর্ষি প্রাদুষ্কৃতা ভাষ্যেণানুবাদেন চ সমেতা সামবেদীয়া আরণ্যসংহিতা সমাপ্তা॥

२७	कादम्बरी—सटीक	...	४
२८	राजप्रशस्ति	...	=
२९	अनुमानचिन्तामणि तथा अनुमानदीधिति		४
३०	सर्वदर्शनसंग्रह	...	१
३१	भामिनीविलास—सटीक	...	१
३२	हितोपदेश—सटीक	...	१
३३	भाषापरिच्छेद मुक्तावलीसहित	...	१
३४	बहुविवाहवाद	...	।
३५	दशकुमारचरित—सटीक	...	१॥
३६	परिभाषेन्दुशेखर	...	॥
३७	कविकल्पद्रुम (वोपदेवकृत धातुपाठ)		॥
३८	चक्रदत्त (वैद्यक)	...	१॥
३९	उणादिसूत्र—सटीक	...	२
४०	मेदिनी कोष	...	१
४१	पञ्चतन्त्रम् [श्रीविष्णु-शर्म्म-सङ्कलितम्]		२॥
४२	विद्वन्मोदतरङ्गिणी (चम्पूकाव्य)	...	॥
४३	माधवचम्पू	...	।=
४४	तर्कसंग्रह (इंराजी अनुवाद सहित)		॥
४५	प्रसन्नराघवनाटक (श्रीजयदेवकविरचित)		१
४६	विवेकचुड़ामणि [श्रीमत्शङ्कराचार्य्य विरचित]		।=
४७	काव्यसंग्रह [सम्पूर्ण]	...	५
४८	लिङ्गानुशासन (सटीक)	...	।
४९	ऋतुसंहार—सटीक	...	।=
५०	विक्रमोर्वशी—सटीक	...	१॥
५१	वसन्ततिलक भाण	...	॥–
५२	गायत्री [वङ्गाक्षरैः]	...	
५३	सांख्यदर्शन (भाष्यसहित) सांख्यप्रवचनभाष्य		२

५४ भोजप्रबन्ध ... ॥।

५५ नलोदय—सटीक ... ॥=

५६ ईश केन कठ, प्रश्न, मुण्ड, माण्डूक्य, (उपनिषद्) [शाङ्करभाष्य तथा आनन्दगिरिकृत टीका सहित] ... ५

५७ छान्दोग्य (उपनिषद्) [शाङ्करभाष्य तथा आनन्दगिरिकृतटीका सहित] ... ५

५८ तैत्तिरीय ऐतरेय (उपनिषद्) [शाङ्करभाष्य तथा आनन्दगिरिकृतटीका सहित] .. २

५९ बृहदारण्यक (उपनिषद्) [भाष्यसहित] १०

६० सुश्रुत ... ६

६१ शार्ङ्गधर [वैद्यक] ... १

६२ वेतालपञ्चविंशति ... ॥।०

६३ पातञ्जलदर्शन[महर्षिवेदव्यासकृतभाष्यसहित] ४

६४ आत्मतत्त्वविवेक [बौद्धाधिकार] ... २

६५ मुक्तिकोपनिषत् ... =

६६ उपमानचिन्तामणि ... ।

६७ नागानन्दनाटक ... १

६८ पूर्णप्रज्ञ दर्शनम् । मध्वस्वामिकृतभाष्य सहितम् २

६९ चन्द्रशेखर चम्पू काव्यम् ... १॥०

७० सामवेदस्य मन्त्रब्राह्मणम् भाष्यसहितम् २

७१ आरण्य संहिता भाष्य सहिता ... १

७२ विद्वशाल भञ्जिका नाटिकासटिका ... १

७३ कारण्डव्यूह [बौद्धशास्त्रम्] ... २

कलिकातासंस्कृतविद्यामन्दिरे—वि,ए,उपाधिधारिणः
श्रीजीवानन्द-विद्यासागर-भट्टाचार्य्यस्य
सकाशात् लभ्यानि ।

24/10.74

MANTRA BRAMHANAM

OF THE SAMAVEDA

WITH A COMMENTARY AND

BENGALI TRANSLATION BY

SATYA BRATA SAMASRAMI.

सामवेदस्य मन्त्रब्राह्मणम् ।

भाष्यसहितम् ।

वङ्गानुवादयुक्तञ्च ।

वि, ए, उपाधिधारिणा

श्रीजीवानन्द विद्यासागर भट्टाचार्य्येण

प्रकाशितम् ।

Calcutta.

PRINTED AT THE DWEIPAYANA PRESS.

1873.

To be had from Pandit Jibananda Vidyasagara B. A. Sanskrit llege of Calcutat.

पण्डितकुलतिलक-पूज्यपाद श्रीमत् तर्कवाचस्पति
पाद-प्रणीत-प्रकाशित-पुस्तकान्येतानि

१	आशुबोध व्याकरणम्	...	३।
२	धातुरूपादर्शः	...	२
३	शब्दस्तोम-महानिधि [संस्कृत अभिधान]		१०
४	सिद्धान्तकौमुदी—सरलाटीकासहिता		११
५	सिद्धान्तविन्दुसार [वेदान्त]	...	॥
६	तुलादानादिपद्धति [वङ्गाक्षरैः]	...	४
७	गयाश्राद्धादिपद्धति	...	१
८	शब्दार्थरत्न	...	॥।
९	वाक्यमञ्जरी [वङ्गाक्षरैः]	...	।
१०	छन्दोमञ्जरी तथा वृत्तरत्नाकर—सटीक		॥=
११	वेणीसंहार नाटक—सटीक	...	१
१२	मुद्राराक्षस नाटक—सटीक	...	१॥
१३	रत्नावली	...	॥।
१४	मालविकाग्निमित्र—सटीक	...	१॥
१५	धनञ्जय विजय—सटीक		।
१६	महावीरचरित	...	१॥
१७	साङ्ख्यतत्त्वकौमुदी—सटीक	...	२
१८	वैयाकरणभूषणसार	...	॥।
१९	लीलावती	...	॥।
२०	बीजगणित	...	१
२१	शिशुपालबध—सटीक	...	६
२२	किरातार्जुनीय—सटीक	...	२॥
२३	कुमारसम्भव—पूर्वखण्ड सटीक	...	१
२४	कुमारसम्भव—उत्तरखण्ड	...	॥
२५	अष्टकम् पाणिनीयम्	...	॥।
२६	वाचस्पत्यम् [संस्कृत-बृहदभिधान]	...	६०

मन्त्र-ब्राह्मणम् ।

॥ अथ प्रथमः प्रपाठकः ॥

तत्र

प्रथम-खण्डः ।

ओं । देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय । दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचन्नः स्वदतु ॥१॥ काम वेद ते नाम मदो नामासि समानया

हे 'देव' द्योतमान ! 'सवितः' ! जगत्-प्रसवितः ! त्वम् 'यज्ञं' इदं कर्म्म 'प्रसुव' अनुजानीहि ; 'भगाय' कर्म्म-फल-भाजनाय 'यज्ञपतिं' यजमानं माम् 'प्रसुव' अनुजानीहि, अनुष्ठित-कर्म्म-फल-भाजं मां कुरुतेति यावत् । किञ्च, 'दिव्यः'

हे द्योतमान जगत्प्रसविता देवता ! तुमि एई कर्म्म अवगत हओ एवं एई कर्म्मेर फलभागी करणार्थ आमाके

१ – परमेष्ठि-प्रजापतिर्ऋषिः * । यजुः । सविता देवता ।

* यावन्न भवति ऋष्यन्तरस्योपन्यासः, तावदेष एव ऋषिरित्यं सर्वत्र । विनियोगस्तु इतिकारवचनानुसाराद्वगन्तव्यः ।

मुꣳ सुरा ते अभवत् । परमत्र जन्माग्ने तपसो निर्मितोसि स्वाहा ॥२॥ इमन्त उपस्थं मधुना सꣳ सृजामि

द्युलोकस्थः 'गन्धर्व्वः' गां पृथिवीं धारयति यः सः 'केतपूः' केतं चित्तं प्रज्ञानं तत् पुनाति सः 'नः' अस्माकम् 'केतं' चित्तम् 'पुनातु' निर्म्मलीकरोतु । किञ्च, 'वाचस्पतिः' वाचामधिपतिः 'नः' अस्माकम् 'वाचः' गिरः 'स्वदतु' आस्वादयतु ॥ १ ॥

हे 'काम' ! 'ते' तव 'नाम' 'वेद' जानाति सर्व्वं जगदिति शेषः ; किम्पुनस्तदित्याह—'मदः' मदकरः 'नाम' प्रसिद्धः 'असि' भवसि ; 'ते' त्वदर्थां त्वदुत्पत्त्यर्थां इयं कन्या 'सुरा'

কর্ম-কর্ত্তা বলিয়া অবগত হও। চিত্ত-পরিত্র-কারী পৃথিবীর ধারয়িতা দেবতা, আমাদিগের চিত্তক্ষেত্র পবিত্র করুন। বাক্যের অধিষ্ঠাত্রী দেবতা, আমাদিগের বাক্যকে সুমধুর করুন ॥১

হে কাম দেবতা ! তোমার নাম সকলই বিদিত আছে, তুমি মাদক বলিয়া প্রসিদ্ধ ; তোমার উৎপত্তির আকর —সুরা-স্বরূপা এই কন্যাকে আত্ম-নিয়োগার্থ প্রাপ্ত হও (অর্থাৎ এই কন্যাতে আবির্ভূত হও)। হে কামাগ্নে ! এই স্ত্রীজাতিতেই তোমার শ্রদ্ধেয় জন্ম, তুমি পুরুষার্থ-সিদ্ধির জন্যই সৃষ্ট হইয়াছ ॥২॥

२ – प्रस्तारपङ्क्तिश्छन्दः । कामो देवता ।

प्रजापते र्मुखमेतद् द्वितीयं तेन पुꣳसोभिभवासि सर्वा-
नवशान्वशिन्यसि राज्ञी स्वाहा ॥३॥ अग्निं क्रव्याद-
मक्षणन्गुह्याना: स्त्रीणामुपस्थ मृषय: पुराणा: । तेना-

सुराभूता 'अभवत्' 'अमुं' कन्यकां 'समानय' स्वात्मानं प्रापय, इहोत्पद्यतामिति भाव: । हे 'अग्ने' कामाग्ने ! 'अत्र' स्त्री-जातिष्वेव तव 'परं जन्म' उत्कृष्टा जनि:, त्वं 'तपस:' पुरुषार्थस्य सिद्ध्यर्थं निर्म्मित: सृष्ट: 'असि' भवसि । 'स्वाहा'-एष शब्द: प्रसिद्धार्थ: ॥ २ ॥

हे 'कन्यके' ! 'इमं' 'ते' तव 'उपस्थं' आनन्देन्द्रियं 'मधुना' 'संसृजामि' संयोजयामि ; 'एतत्' 'प्रजापते:' 'द्वितीयम्" अपरं 'मुखम्' ; 'तेन' उपस्थ-प्रभावेण 'सर्व्वान्' 'अवशान् अपि' 'पुंस:' 'अभिभवासि' वशीकरोषि, 'वशिनी' कान्तिमती 'राज्ञी' च स्वामिनी सर्व्वकामानाम् 'असि' भवसि ॥३॥

হে কন্যে ! এই ত্বদীয় আনন্দেন্দ্রিয় মধু-সিক্ত করি, ইহা প্রজাপতির একটি মুখ (অর্থাৎ প্রজোৎপত্তির দ্বার) ; এই ইন্দ্রিয়-প্রভাবেই অ-বশ পুরুষ সকলকেও বশীভূত করিয়া থাক এবং কান্তিমতী স্বরূপে সর্ব্বকামের অধিপতি হইয়াছ ॥ ৩

---

३ – मध्ये ज्योतिर्जगतीच्छन्द: । उपस्थरूप: कामो देवता ।

ज्यमक्रण्वँ स्त्रैष्टङ्गं त्वाष्ट्रं त्वयि तद्दधातु स्वाहा ॥४॥
या अक्रन्तन्नवयन् या अतनत याश्च देव्यो अन्तान
भितो ततन्थ। ता स्त्वा देव्यो जरसा संव्ययन्त्वायुष्मती

'गुहानाः' तत्त्वदर्शिनः 'पुराणाः' पुरातनाः 'ऋषयः' 'स्त्रीणां' स्त्री-जातीनाम् 'उपस्थं' 'क्रव्यादम्' मांस-भक्षकम् 'अग्निम्' इति 'अक्रण्वन्' स्वीकृतवन्तः। किञ्च, 'तेन' संयुतं 'त्रैशृङ्गं' त्रिशृङ्गं पुरुषशिश्नं तेन निर्वृत्तं 'त्वाष्ट्रं' त्वष्टा विश्वकर्मा जगत्स्रष्टा तद्देवताकं शुक्रम् 'आज्यम्' इति 'अक्रण्वन्' निर्णयं कृतवन्तः। हे कन्ये! 'तत्' शुक्रं 'त्वयि' 'दधातु' स्थापयतु कामी देवता पतिर्वेति शेषः ॥ ४ ॥

'याः' 'देव्यः' पणिग्यः व्यवसायिन्य'स्त्रिय' इदं परिधेयं वस्त्रं'अक्रन्तन्' कर्त्तितवत्यः एतद्वस्त्र-निर्माणार्थं सूत्रं निर्मितवत्य इत्यर्थः, 'याः' 'अवयन्, उतवत्यः तन्तुसन्तानं कृतवत्यः,

তত্ত্বদর্শী, পুরাতন, ঋষিগণ স্ত্রীজাতির আনন্দেন্দ্রিয়কে মাংস-ভক্ষক অগ্নি বলিয়া স্বীকার করিয়াছেন এবং বিশ্বকর্ম্মা (সর্ব্ব-স্রষ্টা) দেবতার ইচ্ছায় তৎসংযোগে পুরুষেন্দ্রিয় হইতে প্রাদুর্ভূত শুক্রকে হোমীয় ঘৃত বলিয়া নির্ণয় করিয়াছেন। হে কন্যে! তোমাতে তাহা স্থাপিত হউক ॥ ৪ ॥

४ – उपरिष्टाज्ज्योतिरियं त्रिष्टुप्। उपस्थरूपः कामी देवता।

दं परिधत्स्व वासः ॥५॥ परि धत्तधत्त वाससैनाꣳ शता-युषीꣳ कृणुत दीर्घमायुः। शतं च जीव शरदः सुवर्चा व सूनि चार्ये विभृजासि जीवन् ॥६॥ सोमो ददद्गन्धर्वाय

'याः' 'अतन्वत' तनु विस्तारे विस्तारितवत्यः, 'याः च' अन्तान् पट-सन्तान् 'अभितः' उभयपार्श्वयोः 'अततन्य' ग्रथितवत्यः, 'ताः देव्यः' हे कन्ये ! 'त्वां' 'जरसा' जरान्तं यावत् 'संव्ययन्तु' परिधापयन्तु। हे 'आयुष्मति !' दीर्घायुषि ! 'इदम्' प्रकृतं 'वासः' वसनम् 'परिधत्स्व' परिधानं कुरु ॥५॥

हे परिधापयितारः ! ऋत्विजादयः ! 'शतायुषीम्' शतवर्षजीविनीम् 'एनां' कन्यकाम् 'वाससा' वस्त्रेण 'परि' सर्वतः 'धत्त धत्त' धारयतैव वेष्टनं कुरुतैव; किञ्च एतदीयम् 'आयुः'

যে দেবীরা এই বসনের সূত্র সকল প্রস্তুত করিয়াছেন, যে দেবীরা ইহা বয়ন করিয়াছেন, যে দেবীরা ইহাকে এই আকারে বিস্তৃত করিয়াছেন, এবং যে দেবীরা ইহার উভয় পার্শ্বের ছিলা সকল গ্রথন করিয়াছেন হে কন্যে ! সেই দেবীরা তোমাকে জরাবস্থা পর্য্যন্ত সোৎসাহে বস্ত্র পরিধান করাইতে থাকুন ; হে আয়ুষ্মতি ! এই বস্ত্র পরিধান কর ॥৫

হে বস্ত্র-পরিধাপয়িতৃগণ ! তোমরা শতবর্ষজীবিনী এই কন্যাকে বসনে পরিবেষ্টিত কর এবং আশীর্ব্বাদন দ্বারা ইহার

५—जगतीच्छन्दः। वस्त्रकारादेवता। वस्त्रपरिधापने विनियोगः।

६—त्रिष्टुप्छन्दः। परिधापयितारो देवताः। उत्तरीय परिधापने विनियोगः।

गन्धर्वो ददद्गन्धर्वाय रयिञ्च पुत्रांश्चादादग्निर्मह्यमथो इमाम् ॥७॥ प्र मे पतिं या नः पत्याः कल्पताम्

दीर्घं 'कृणुत' कुरुत। एवम् परिधापयितारोऽभिधाय अधुना तामेव साक्षादाशास्ते—हे 'आर्ये!' आर्यदेशोद्भवे! माननीये! वा, 'सुवर्चाः' तेजस्विनी सती 'शरदःशतं' शत-शरदृतु-परिमितं कालं 'जीव' 'च' अपिच 'जीवन्' जीवन्ती सती 'वसूनि' ऐश्वर्याणि 'विभृजासि' भजस्व ॥६॥

'इमां' कन्यां 'सोमः' सूयतइति सोमः स्रष्टृदेवता 'गन्धर्वाय' गां धारयति यः तस्मै पालकाय 'ददत्' अदात् समर्पयत; सच 'गन्धर्वः' अग्नये ददत्' अग्निसमीपमधुना समर्पयत्; 'अग्नि साक्षिरूपेण स्थितः 'मह्यं' परिणेत्रे 'अदात्;' 'अथो' अनन्तरं 'रयिं' धनं 'पुत्रान् च' अदादित्याशास्महे ॥७॥

পরমায়ু পরিবর্দ্ধিত কর। হে আর্য্যদেশোদ্ভবে! কন্যে! তুমি তেজস্বিনী হইয়া শত শরৎ (অর্থাৎ শতবর্ষ) জীবিত থাক এবং জীবিত থাকিয়া ঐশ্বর্য্যসকল ভোগ কর ॥৬

স্রষ্টা এই কন্যাকে পাতার হস্তে সমর্পণ করেন, পাতা এই অগ্নির নিকটে উপনীত করিয়াছেন, অগ্নি সাক্ষীরূপে উপস্থিত থাকিয়া ইহা আমাকে প্রদান করিলেন, ভরসা করি ধন পুত্রাদিও এই সমিভ্যারেই প্রদত্ত হইল ॥৭

৩—অনুষ্টুপ্‌ছন্দঃ। সোমাদয়ো দেবতাঃ।

शिवा अरिष्टा पतिलोकं गमेयम् ॥८॥ अग्निरेतु प्रथमो देवताभ्यः सो स्यै प्रजां मुञ्चतु मृत्यु-पाशात्। तदयं राजा वरुणोनु मन्यतां यथेयं स्त्री पौत्र मघन्नरोदात् स्वाहा ॥९॥ इमा मग्नि

'नः' अस्माकम् 'पतिः' पाता देवः 'मे' मदर्थं 'पन्थां' पन्थानम् 'प्र कल्पताम्' प्र करोतु; 'या' येन पथा, कीदृशेन ? 'शिवा' शिवेन कल्याणमयेन 'अरिष्टा' अरिष्टेन विघ्नशून्येन 'पतिलोकम्' पतिकूलं 'गमेयम्' गच्छेयम् अहमिति शेषः ॥८॥

'देवताभ्यः' देवतानां 'प्रथमः' मुख्यः 'अग्निः' 'एतु' आगच्छतु आगत्य च 'सः' 'अस्यै' अस्याः भाविनीं 'प्रजां' सन्तति-ततिं 'मृत्युपाशात्' अकाल-मरण-भयात् 'मुञ्चतु'; 'अयं' 'राजा' राजमानः वरुणः 'तत्' तथा अनुमन्यतां, यथा' 'इयं स्त्री' 'पौत्रम् पुत्रसम्बन्धि 'अघम्' पाप-मूलकं शोकं प्राप्य 'न रोदात्' रोदनं न कुर्य्यात् ; नैव प्राप्नुयादिति यावत् ॥९॥

অমাদিগের পাতা, আমাদের জন্য সেই পথ কল্পিত করুন যে কল্যাণময় বিঘ্নশূন্য পথে পতি-কূল-কার্য্য-নির্ব্বাহ করিতে পারি ॥৮

দেব-শ্রেষ্ঠ অগ্নি আগমন করুন ; তিনি এই কন্যার ভবিষ্যৎ সন্ততিগুলিকে মৃত্যুভয় হইতে মুক্ত করুন; এই রাজমান রজনি দেবতা সেইরূপ অনুমতি করুন যাহাতে এই স্ত্রী পাপমূলক পুত্রশোক প্রাপ্ত হইয়া ক্রন্দন না করেন্ ॥৯

৮—দ্বিপাদ্ জগতীচ্ছন্দঃ। পতির্দেবতা। পদপ্রবর্ত্তনে বিনিয়োগঃ।

৯—অতিজগতীচ্ছন্দঃ। অগ্নির্দেবতা। আজ্যহোমে বিনিয়োগঃ।

त्रायतां गार्हपत्यः प्रजामस्यै जरदष्टिं कृणोतु । अशून्योपस्था जीवता मस्तु माता पौत्रमानन्दमभिविबुध्यता मियꣳ स्वाहा॥१०॥द्यौस्ते पृष्ठꣳ रक्षतु वायुरूरू अश्विनौ च । स्तनन्धयस्ते पुत्रांत् सविताभि रक्षत्वा

'गार्हपत्यः' 'अग्निः' 'इमां' कन्यां 'त्रायतां' पालयतु 'अस्यै' एतदर्थम् 'जरदष्टिं' जरान्वितां दीर्घायुषीम् प्रजां सन्तति-ततिं 'कृणोतु' विदधातु, किञ्च 'इयम्' 'जीवता' जीवत्पुत्राणां माता 'सती' 'अशून्योपस्था' अशून्यागारा अविधवा 'अस्तु' अपिच 'पौत्रम्' आनन्दं सुपुत्र-सम्बन्धिन मानन्दं 'विबुध्यताम्' विशेषेण जानीयात् ॥१०॥

हे 'कन्ये ! 'ते' तव 'पृष्ठं' पृष्ठदेशं 'द्यौः' द्यु-लोको 'रक्षतु'; 'ऊरू' ऊरूदेशौ 'वायुः' 'च' अपिच 'अश्विनौ' दिवा-रात्रौ रक्षतु ; 'ते' तव 'स्तनन्धयः' स्तनन्धयान् 'पुत्रान् हृदय-रूपान् 'सविता' 'अभिरक्षतु' ; 'आ वाससः परिधानात्'

গার্হপত্য, এই কন্যাকে সতত রক্ষা করুন, ইহার জন্য ভাবি-জরাক্রান্ত (অর্থাৎ দীর্ঘজীবী) প্রজা বিধান করুন ; এই কন্যা জীবিত পুত্রগণের মাতা হইয়া পতির সহিত বাস করুন এবং সৎপুত্রজনিত আনন্দ উপভোগ করুন ॥১০

হে কন্যে ! দ্যুলোক তোমার পৃষ্ঠদেশ রক্ষা করুন, বায়ু এবং দিবস রজনি ঊরুদ্বয় রক্ষা করুন, তোমার স্তন্য-পায়ী

---

१० – अतिजगतीच्छन्दः । अग्निर्देवता । आजग्रहीमि विनियोगः ।

वाससः परिधानाद् बृहस्पतिर्विश्वेदेवा अभिरक्षन्तु पश्चात् स्वाहा॥११॥ मा ते गृहेषु निशि घोष उत्था दन्यत्र त्वद्रुदत्यः संविशन्तु॥ मात्वꣳ रुदत्युर आवधिष्ठा जीवपत्नी पतिलोके विराज पश्यन्ती प्रजाꣳ सुमनस्यमानाꣳ स्वाहा॥१२॥ अप्रजस्त्वं पौत्रमर्त्यं पाप्मान

वास-परिधानं यावत् प्रच्छन्नदेशं 'बृहस्पतिः' अभिरक्षतु; 'पश्चात्' ततोऽधस्तनस्थानानि पादाग्रादीनि, उक्तेभ्यउपरितनस्थानानि ग्रीवादीनि च 'विश्वेदेवाः' 'अभिरक्षन्तु' ॥११॥

हे 'कन्ये! 'ते' तव 'गृहेषु' 'निशि' रात्रौ 'घोषः' आर्त्तशब्दः 'मा उत्थात्' न उत्तिष्ठेत्; किञ्च 'त्वत्' त्वत्तः 'अन्यत्र' शत्रुगृहादौ 'रुदत्यः' स्त्रियः 'प्रविशन्तु,' 'त्वं' 'रुदत्' रुदती

হৃদয় স্বরূপ পুত্রদিগকে সবিতা রক্ষা করুন, পরিধেয় বস্ত্রে যাবৎ আবৃত থাকে তৎসমস্ত অঙ্গ বৃহস্পতি রক্ষা করুন, এতদ্ব্যতিরিক্ত (পাদাগ্রপ্রভৃতি ও গ্রীবা-প্রভৃতি) বিশ্বেদেবা দেবতারা রক্ষা করুন !১১

হে কন্যে ! তোমার গৃহে কদাপি নিশাভাগে আর্ত্তনাদ উত্থিত না হউক ! তোমার শত্রু-গৃহাদিতে স্ত্রীগণ ক্রন্দন করিতে করিতে প্রবিষ্ট হউক ! রোদন করিতে করিতে অন্তঃ-

---

११ – शक्वरीच्छन्दः । विश्वेदेवा देवताः । आजाहीमे विनियोगः ।

१२ – अतिजगतीच्छन्दः । अग्न्यादयो देवताः । आजाहीमे विनियोगः ।

मुत वा अघम् ॥ शीर्ष्णः स्रजमिवोन्मुच्य द्विष-द्भ्यः प्रति मुञ्चामि पाशꣳ स्वाहा ॥१३॥परैतु मृत्युर मृतं म आगाद्वैवस्वतो नो अभयं कृणोतु ॥ परं मृत्यो

सती 'पुरः' अन्तःपुरे 'मा' 'आवधिष्ठाः' न कदाचिदपि परि-जनान् घातयेः ; किञ्च 'जीवपत्नी' जीवत्पतिका सती 'सुमन-स्यमानां' हृष्टचित्तां 'प्रजां' 'पश्यन्ती' वीक्षमाणा 'पतिलोके' पतिगृहे 'विराज' शोभस्व ॥१२॥

हे कन्ये ! 'अप्रजस्यम्' बन्ध्यात्वं 'पौत्रमर्त्यम्' पुत्र-सम्बन्धि-मरणं 'पाशम्' मृत्योः पाशरूपम् 'पाप्मानम्' 'उत वा' अन्यदपि 'अघम्' अरिष्टं त्वयि यद् स्थितं तत् सर्वं 'शीर्ष्णः' मस्तकात् 'स्रजम् इव' मालामिव त्वत्तः 'उन्मुच्य'अवतार्य्य द्विष-द्भ्यः द्वेष्टृभ्यः 'प्रति मुञ्चामि' प्रतिक्षिपामि ॥१३॥

পুর বাসী-দিগকে তোমায় পীড়িত করিতে না হয় ! স-ধবা থাকিয়া হৃষ্টচিত্তে পুত্রাদি লইয়া আমোদ প্রমোদ করত পতি-গৃহে সুখে বাস কর ॥১২

হে কন্যে ! বন্ধ্যাত্ব, পুত্র-শোক প্রভৃতি মৃত্যুর পাশ স্বরূপ যে সকল পাপ ও অরিষ্ট তোমাতে আছে, তৎসমস্তই তোমার মস্তক হইতে মালা-উন্মোচনের ন্যায় উন্মুক্ত করিয়া শত্রুবর্গের প্রতি নিঃক্ষিপ্ত করিতেছি ॥১৩

---

१३ – उपरिष्टाद्बृहतीच्छन्दः । अग्न्यादयो देवताः । आज्यहोमे विनियोगः ।

अनु परेहि पन्थां यत्र नो अन्य इतरो देवयानात्॥चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् स्वाहा ॥१४॥

'मृत्युः' 'परेतु' पराङ्मुखो गच्छतु 'मे' मम 'अमृतम्' अमरणम् 'आगात्' आगच्छतु नाहं मृये ! इति भावः, 'वैवस्वतः' 'नः' 'अस्माकम् 'अभयं' 'कृणोतु' करोतु । 'मृत्यो !' 'यत्र' 'नः' अस्माकम् 'अन्यः' सदृशम् मर्त्यभूमि-कृत-वासः जीवः अस्ति—यः 'देवयानात्' देवमार्गात् 'अन्यः', तम् 'परं' परलोकीयं 'पन्थां' पन्थानम् 'अनु' संलक्ष्य 'परेहि' पराङ्मुखो गच्छ । 'चक्षुष्मते' पश्यतः 'शृण्वते' दर्शतः 'ते' तव सन्निधौ 'ब्रवीमि' प्रार्थयामि—'नः' अस्माकं 'प्रजां' परिवारं' 'उत' अपिच (विशेषेण) 'वीरान्' पुत्रान् 'मा' रीरिषः' मा हिंसीः ॥१४॥

इति सामवेदीये मन्त्रब्राह्मणे प्रथमप्रपाठकस्य

प्रथमः खण्डः ॥१॥

—०—

মৃত্যু পরাঙ্মুখ হইয়া গমন করুন, অমর ভাব আমার নিকটে আসিয়া উপস্থিত হউক, বৈবস্বত আমাদিগের অভয় বিধান করুন। হে মৃত্যো ! যে স্থলে আমাদিগের ন্যায় মর্ত্ত্য জীব সকল আছে—যাহা দেবগণের গমনীয় নহে, সেই (প্রেতলোকের) পথ লক্ষ্য করত পরাঙ্মুখ হইয়া গমন কর। উৎকৃষ্ট দর্শনবান্—উৎকৃষ্ট শ্রুতিমান্ তোমার নিকটে প্রার্থনা করি—আমার পরিবার বর্গকে বিশেষত পুত্রদিগকে নষ্ট করিও না ॥১৪

१४—मृत्युर्ऋषिः । त्रिष्टुप्छन्दः । वैवस्वती देवता । आज्यहोमे विनियोगः ।

द्वितीय-खण्डः—

इमम श्मानमारोहाश्मेव त्वꣳ स्थिरा भव ॥ द्विषन्तमपवाधस्व मा च त्वं द्विषता मधः ॥१॥ इयं नार्युपब्रूते ग्नौ लाजानावपन्ती । दीर्घायुरस्तु मे पतिः

हे कन्ये ! 'इमम्' प्रत्यक्षम् 'अश्मानम्' शिलाखण्डम् 'आरोहाः' आक्रम। तथाच 'त्वम्' 'अश्मा इव' पाषाणइव 'स्थिरा' अचला 'भव' ; अस्मिन्नेव पति-कुले जीवनं यापयेत्यर्थः । किञ्च कन्ये ! 'द्विषन्तम्' शत्रुकुलम् 'अपवाधस्व' पीड़य, 'च' 'अपिच' 'त्वं' 'द्विषतां' तेषाम् 'अधः' अधस्तात् अवरभावेन 'मा' अभूः ; त्वदीयागमनेनात्र कुले मङ्गलं—शत्रु-कुले अमङ्गलञ्च भवत्वित्याशयः ॥ १ ॥

'इयं नारी' 'लाजान्' भ्रष्टव्रीहीन् 'आवपन्ती' प्रक्षिपन्ती सती 'उप' अस्मत्-समीपे 'ब्रूते' कथयति ; किमित्याह—'मे' मम 'पतिः, 'दीर्घायुः' दीर्घजीवी 'अस्तु' 'शतं वर्षाणि जीवतु' इति ; किञ्च 'मम' ज्ञातयः 'एधन्ताम्' परिवर्द्धन्ताम् ॥ २ ॥

কন্যে ! এই শিলাখণ্ডে আরোহণ কর, তুমি এই প্রস্তরবৎ দৃঢ় রূপে অবিচলভাবে পতি-গৃহে বাস কর। কন্যে ! শত্রু-কুল নষ্ট কর এবং শত্রুদিগের নিকটে কখন অপদস্থ হইও না। অর্থাৎ তোমার আগমনে রিপুগণ নিস্তেজ হউক ॥১

এই নারী লাজাগুলি বিক্ষিপ্ত করত ক্রমে আমাদের নিকটস্থ হইয়া বলিতেছেন—যে, "আমার পতি দীর্ঘজীবী

---

१ – अनुष्टुव् छन्दः । अश्मा देवता । अश्माक्रमणे विनियोगः ।

शतं वर्षाणि जीवत्वे धन्तां ज्ञातयो मम स्वाहा ॥२॥ अर्यमणं नु देवं कन्या अग्निमयक्षत ॥ स इमान्देवो अर्य्यमा प्रेतो मुञ्चातु मा मुत स्वाहा ॥३॥ पूषणं नु देवं कन्या अग्निमयक्षत ॥ स इमां देवः पूषा प्रेतो

'उत' अपिच, इयं 'कन्या' 'अर्य्यमणम्' अर्य्यमाख्यम् 'अग्निम्' 'देवं' 'अयक्षत' पूजितवती ; 'सः' पूजितोऽग्निः 'इमां' कन्यकाम् 'इतः' पितृकुलात् 'माम्' उद्दिश्य 'प्रमुञ्चातु' प्रकर्षेण स्थिरतया मुञ्चतु मह्यं ददातु इत्यर्थः ॥ ३ ॥

'उत' अपिच इयं 'कन्या' 'पूषणं' पूष-नामकम् 'अग्निम्' 'देवं' 'नु' निश्चयम् 'अयक्षत' पूजितवती ; 'सः' पूजितोऽग्निः 'इमां' कन्यकाम् 'इतः' पितृकुलात् 'माम्' 'प्रमुञ्चातु' प्रकर्षेण स्थिरतया मुञ्चतु ॥ ४ ॥

হউন, শতবর্ষ পরমায়ু লাভ করুন এবং আমার দেবর প্রভৃতি জ্ঞাতিরা পরিবর্দ্ধিত হইতে থাকুন" ॥২

এবং এই কন্যা অর্য্যমা নামক অগ্নিদেবতাকে নিশ্চয় অর্চ্চনা করিয়াছিল ; সেই অর্চ্চিত অগ্নি, এই কন্যাকে, এই পিতৃকুল হইতে বিভিন্ন করিয়া আমাকে স্থিররূপে সমর্পন করিয়াছেন ॥৩

এবং এই কন্যা পূষা নামক অগ্নিদেবতাকে নিশ্চয় অর্চ্চনা

২—উপরিष्टाज्जगतीच्छन्दः । अग्निर्देवता । लाज*होमे विनियोगः ।

* लाजा भष्टव्रीहयः ।

३—उपरिष्टाद् बृहतीच्छन्दः । अर्यमा देवता । लाजहोमे विनियोगः ।

मुञ्चातु मा मुत स्वाहा ॥४॥ कन्यला पितृभ्यः पतिलोकं पतीय मप दीक्षा मयष्ट॥ कन्या उत त्वया वयं धारा-उदन्या इवाति गाहेमहि द्विषः ॥५॥ एकमिषे विष्णु-स्त्वानयतु ॥ द्वे ऊर्ज्जे विष्णु स्त्वा नयतु ॥ त्रीणि व्रताय

'कन्यला' कन्या 'पितृभ्यः' पितृ-भ्रातृ-प्रभृतिभ्यः 'अप' तान् परित्यज्य 'पतिलोकं' पतिगृहम् आगत्य 'पतीयं' पति-सम्बन्धिनीं 'दीक्षाम्' 'अयष्ट' इष्टवती । 'उत' अपिच 'कन्या' 'त्वया' सह एकत्रीभूताः 'उदन्या धाराः' उदकधाराः 'इव' बलवन्तो वेगवन्तो परस्पर-भेद-शून्यास्तादात्म्य-भावाश्च वयं 'द्विषः' द्वेष्टॄन् 'अति गाहेमहि' अतिक्रान्त्य विलोड़यामः उद्वे-जयामः ॥ ५ ॥

हे कन्ये ! 'विष्णुः' व्यापको देवः 'त्वाम्' 'एकं' पदं 'इषे' अन्नलाभाय 'नयतु' प्रापयतु । 'विष्णुः' 'त्वां' 'द्वे' पदे 'ऊर्जे'

করিয়াছিল ; সেই অর্চ্চিত অগ্নি এই কন্যাকে, এই পিতৃকুল হইতে বিভিন্ন করিয়া আমাকে স্থিররূপে সমর্পন করিয়াছেন ॥৪

কন্যা, পিতা মাতা ভ্রাতা প্রভৃতিকে ত্যাগ করিয়া পতি-গৃহে আগমন করত পতি-সম্বন্ধী উপদেশ গ্রহণ করিতেছে, এবং কন্যে ! আমরা তোমার সহিত একত্র হইয়া জলধারা-সমূহের ন্যায় বলবান্, বেগবান্ ও পরস্পর অভিন্নভাবে স্থিত হইয়া দ্বেষ্টৃগণকে উদ্বিগ্ন করি ॥৫

৪—उपरिष्टाद् बृहतीच्छन्दः । पूषा देवता । लाजहोमे विनियोगः ।

५—त्रिष्टुप्छन्दः । कन्या देवता । लाजहोमे विनियोगः ।

विष्णुस्त्वा यतु ॥ चत्वारि मायोभवाय विष्णुस्त्वा नयतु॥ पञ्च पशुभ्यो विष्णुस्त्वा नयतु ॥ षड्रायस्पोषाय विष्णु-स्त्वा नयतु॥ सप्त सप्तभ्यो होत्राभ्यो विष्णु स्त्वा नयतु॥६॥ सखा सप्तपदी भव सख्यं ते गमेयꣳ सख्यं ते मायोषाः सख्यं ते मायोष्टाः ॥७॥ सुमङ्गली रियं वधू रिमाꣳ

बललाभाय 'नयतु'। 'विष्णुः' 'त्वाम्' 'त्रीणि' पदानि 'व्रताय' पञ्च-महायज्ञान्तर्गत-बलि-कर्मणे 'नयतु'। 'विष्णुः' 'त्वाम्' 'चत्वारि' पदानि 'मायोभवाय' सौख्ये 'नयतु'। 'विष्णुः' 'त्वाम्' 'पञ्च' पदानि 'रायस्पोषाय' धनस्य पोषणाय 'नयतु'। 'विष्णुः' 'त्वाम्' 'सप्त' पदानि 'सप्तभ्यः होत्राभ्यः' यज्ञीय-सप्त-र्त्विक्प्राप्तये 'नयतु' ॥ ६ ॥

'सप्तपदी' सप्तपदाक्रान्ता त्वं कन्या 'सखा' मम सहचा-रिणी 'भव'; अहञ्च 'ते' तव 'सख्यं' 'गमेयम्' उपभुञ्जेयम्।

हे कन्ये! एई सर्व्वव्यापी देवता अन्नलाभेर जन्य एक पद अतिक्रमण कराइतेछेन। बललाभेर जन्य द्वितीय। नित्य कार्य्य पञ्च महायज्ञादि सिद्धिर जन्य तृतीय। सौख्येर जन्य चतुर्थ। पशुलाभेर जन्य पञ्चम। धनरक्षार जन्य षष्ठ। सप्त ऋत्विक् लाभेर जन्य अर्थात् सम्पत्यादि हइले कोन प्रशस्त काम्य यागादि कार्य्य करिवार जन्य ऋत्विक् आवश्यक हइया थाके, सेई अवस्था सिद्धिर जन्य, सप्तम पद अतिक्रमण कराइतेछेन ॥६

६—विराट्छन्दः। विष्णुर्देवता। पदाक्रमणे विनियोगः।

७—सामकी पङ्क्तिश्छन्दः। आशास्यमाना देवता। आशासने विनियोगः।

समेत पश्यत ॥ सौभाग्य मस्यै दत्वा याथास्तं विपरे-तन ॥८॥ समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ ॥

'ते' तव मया सह 'सख्य' 'योषाः' स्त्रियः विदूषिकाः समस्ताः 'मा' विच्छिन्दन्तु इति शेषः । अपितु 'मायोष्टाः' अस्मत्-सुखहितैषिणः स्त्रियः 'ते' तव तत् सख्यं मया सह सखित्वं वर्द्धयन्त्विति शेषः ॥७॥

हे ईक्षकाः ! यूयं 'समेत' एकत्रीभूत्वा आगच्छत, ऐत्य च 'इयं' परिणीता 'वधूः' 'सुमङ्गलीः' कल्याणी इति मत्वा 'इमां' 'पश्यत !' किञ्च 'अस्यै' 'सौभाग्य' दत्वा (आशीर्भिरितियावत्) 'अस्तं' गृहं 'विपरेतन याथाः' प्रत्यावृत्तं गच्छत ॥ ८ ॥

'विश्वेदेवाः' दृश्यमानाः दीप्यमानाः समस्ताः पदार्थ-जाताः 'नौ' आवयोः 'हृदयानि' 'समञ्जन्तु' शोधयन्तु । 'आपः'

এই একত্র সপ্তপদগমনা কন্যা, তুমি চিরদিনের জন্য আমার সহচারিণী হও ! আমি ত্বদীয় সখ্য ভোগ করি ! তোমার সহিত সুদৃঢ় সংস্থাপিত এই সখ্য (ঘরভাঙানি) বিচ্ছেদকারিণী স্ত্রীগণে বিচ্ছিন্ন করিতে না পারে ! বরং অস্ম-দাদির হিতৈষিণা ভদ্রা স্ত্রীরা এই অভিনব সঞ্জাত সখ্য সদুপ-দেশ প্রদানাদি দ্বারা ক্রমে পরিবর্দ্ধিত করিতে থাকুন ॥৭

হে পরিদর্শকগণ ! তোমরা একত্র হইয়া এই অগ্নি-সমীপে আগমন কর, অনন্তর এই পরিণীতা বধূকে কল্যাণ-কারিণা বিবেচনায় দর্শন কর এবং ইহাকে আশীর্ব্বাদ-বলে সৌভাগ্য প্রদান করত নিজ নিজ নিকেতনে প্রতি গমন কর ॥৮

৮—অনুষ্টুব্ছন্দঃ । আশাসমানা দেবতা । দর্শক-প্রতিমন্ত্রণে বিনিয়োগঃ ।

संमातरिश्वा सं धाता समुदेष्ट्री दधातु नौ ॥९॥ गृभ्णा-मि ते सौभगत्वाय हस्तं मया पत्या जरदष्टि र्यथासः ॥ भगो अर्यमा सविता पुरन्धिर्मह्यं त्वा दुर्गार्हपत्याय देवाः ॥१०॥ अघोरचक्षु रपतिघ्न्येधि शिवा पशुभ्यः

जलदेवताः 'सम्' अञ्जन्तु-इति कर्षणीयः । 'मातरिश्वा' वायुः 'सम्' अञ्जन्तु । 'धाता' प्रजापतिः 'सम्' अञ्जन्तु । किञ्च 'उ-देष्ट्री' देवी 'नौ' आवयोः हृदयानि 'संदधातु' एकीकुर्वन्तु ॥९॥

हे कन्ये ! 'पुरन्धिः' पुर-रक्षकरूपः 'भगः' 'अर्य्यमा' 'सविता' च नामभेदेन विभिन्ना एते 'देवाः' 'त्वा' त्वां 'गार्हपत्याय' गार्हस्थ्य-कार्य्य-निर्व्वाहाय 'मह्यम्' 'अदुः' । ततश्च 'मया पत्या' 'जरदष्टिः' जरान्तं यावत् 'यथा असः' यथा भवसि तथा 'सौ-भगत्वाय' सौख्याय 'ते' तव 'हस्तं' पाणिम् 'गृभ्णामि' गृह्णामि ॥१०॥

এই সমস্ত দেদীপ্যমান পদার্থসকল আমাদের উভয়ের হৃদয় পবিত্র করুন, জলদেবতা আমাদের উভয়ের হৃদয় পবিত্র করুন, অন্তরীক্ষচারী বায়ুদেবতা আমাদের উভয়ের হৃদয় পবিত্র করুন, প্রজাপতি (আকাশ) আমাদের উভয়ের হৃদয় পবিত্র করুন। সদুপদেশকারিণী ভদ্র মহিলাগণ আমাদের উভয়ের হৃদয়-দ্বয়ের ঐক্য সম্পাদন করুন ॥৯

হে কন্যে! অর্য্যমা, ভগ, সবিতা প্রভৃতি নাম ভেদে বিভিন্ন পুর-রক্ষক এই সূর্য্য দেবতা এই উদ্বাহ কার্য্যে সাক্ষী রূপে

९—अनुष्टुप्छन्दः । विश्वेदेवाद्या देवताः । मूर्द्धाभिषेचने विनियोगः ।

सुमनाः सुवर्चाः । वीरसूर्जीवसू र्देवकामा स्योना शन्नो भव द्विपदे शं चतुष्पदे॥११॥ आ नः प्रजां जनयतु प्रजापति राजरसाय समनक्त्वर्यमा ॥ अदुर्मङ्गलीः

हे कन्ये ! त्वम् 'अघोरचक्षुः' अक्रूरदृष्टिः' 'अपतिघ्नी' अविधवा, 'पशुभ्यः शिवा' गो-वत्सादि-पालन-कारिणी, 'सुमनाः' सहृदया, 'सुवर्चाः' तेजस्विनी, 'वीरसूः' पुत्रप्रसूतिः, 'जीवसूः' जीवत्पुत्रा' 'देवकामा' पञ्चयज्ञानुकूला' 'स्योना' सुखकरी किं बहुना—'नः' अस्माकं सर्व्वथैव 'शं' कल्याणकरी 'एधि' भव। किञ्च अन्यस्मिन्नपि द्विपदे 'च' अपिच 'चतुष्पदे' प्राणिजाती 'शं' कल्याणकरी 'भव' ॥११॥

हे कन्ये ! 'प्रजापतिः' 'नः' अस्माकं 'प्रजां' पुत्रपौत्रादिकम् 'आ' आभिमुख्येन 'जनयन्तु'। 'अर्य्यमाः' सः तान् 'समनक्तु' अवस्थित थाकिया तोमाकें गार्हस्थ्य कार्य्य सम्पादानार्थ आमाय समर्पन करियाछेन, आमिओ पालनकारी हईया जरावस्था पर्य्यन्त यतदिन तुमि जीविता थाकिबे तावत् कालेर जन्य सुख-भोगाशयें तोमार हस्त ग्रहण करितेछि ॥१०

हे कन्ये ! तुमि मन्देक्षणा ओ पतिघातिनी ना हईया-गो-वत्सादिर पालनकारिणी, सहृदया, तेजस्विनी, जीवत्-सन्ततिं, पञ्चयज्ञान्तर्गत बलि कार्य्य-परायणा, सुखकरी—अधिक कि, सर्व्वप्रकारे आमादेर वंशेर कल्याण-साधिनी हओ एवं अस्मत्सम्बन्धी अन्यान्य द्विपद, चतुष्पद प्राणीदेर पक्षेओ कल्याणरूपिणी हओ ॥११

१० – त्रिष्टुप्छन्दः । भगादयो देवताः । पाणिग्रहणे विनियोगः ।

११ – त्रिष्टुप्छन्दः । कन्या देवता । आशासने विनियोगः ।

पतिलोक माविश शं नो भव द्विपदे शं चतुष्पदे॥१२॥ इमां त्व मिंद्र मीढ्वः सुपुत्राꣳ सुभगांकृधि ॥ दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि ॥१३॥ संम्राज्ञी श्वशुरे

रूपगुणादिभिर्व्यञ्जयन्तु । 'मङ्गलीः' मङ्गलाकारिण्यो देवताः त्वां मह्यम् 'अदुः' दत्तवन्तः, अतस्त्वं 'पतिलोकम्' 'आविश' । एवं सर्व्वथैव 'नः' अस्माकं 'शं' कल्याणी 'च' अपिच अन्यस्मिन्नपि 'द्विपदे' 'चतुष्पदे' प्राणिजाती 'शं' कल्याणी भव ॥ १२ ॥

हे 'इन्द्र!' ऐश्वर्य्यमान् देव 'मीढ्वः' द्युलोकस्य सेक्ता तर्पयिता 'त्वम्' 'इमां' कन्यां 'सुपुत्रां' सत्पुत्रवतीं 'सुभगां' सौभाग्यशालिनीं 'कृधि' कुरु । किञ्च 'अस्यां' कन्यायां 'दश पुत्रान्' 'आधेहि' आधानं कुरु अपिच अस्याः 'पतिम्' भर्त्तारं तैः सह सङ्कलनया 'एकादशं' 'कुरु' ॥१३॥

হে কন্যে ! প্রজাপতি আমাদের পুত্র পৌত্রাদি প্রদান করুন, অর্য্যমা তাহাদিগকে রূপগুণাদিতে প্রসিদ্ধ করুন। মঙ্গল-কারিণী দেবীরা তোমাকে আমায় সমর্পন করিয়াছেন অতএব তুমি পতিগৃহে প্রবেশ কতিছ, সর্ব্বপ্রকারে আমাদের কল্যাণ-কারিণী হও এবং অস্মৎসম্বন্ধী অন্যান্য দ্বিপদ, চতুষ্পদ প্রাণিগণের পক্ষেও কল্যাণরূপিণী হও ॥১২

হে ঐশ্বর্য্যশালিন্ ! দেব ! তুমি এই কন্যাকে সৎপুত্র-জননি, সৌভাগ্যশালিনী কর এবং কন্যার দশটি গর্ভ পালন কর, ঐ দেশের সহিত পতিকে সঙ্কলন করিলে ইহার একাদশ জনা রক্ষক হইতে পারিবে! ॥১৩

१२—जगतीच्छन्दः । प्रजापतिर्देवता । आशासने विनियोगः ।

१३—अनुष्टुप्छन्दः । इन्द्रो देवता । आशीः-प्रार्थने विनियोगः ।

भव संम्राज्ञी श्वश्र्यां भव ॥ नानान्दरि संम्राज्ञी भव संम्राज्ञी अधिदेवृषु ॥१४॥ मम व्रते ते हृदयं दधातु मम चित्त मनुचित्तन्ते अस्तु ॥ मम वाच मेकमना जुषस्व बृहस्पति स्त्वा नियुनक्तु मह्यम् ॥१५॥

कन्ये ! त्वं 'श्वशुरे' श्वशुर-मनोरञ्जने 'संम्राज्ञी प्रधाना' 'भव'। 'श्वश्र्यां' 'सम्राज्ञी' 'भव'। 'ननान्दरि' 'सम्राज्ञी' 'भव'। 'देवृषु' देवरेषु 'अधि' अधिकृत्य 'सम्राज्ञी' भवेति अनुकर्षणीयः ॥१४॥

कन्ये ! 'ते' तव 'हृदयं' 'ममव्रते' मदीय-कर्मणि 'दधातु' धेहि धारय। 'ते' 'चित्तं' 'मम' 'अनुचित्तम्' 'अस्तु'। त्वम् 'एकमनाः' सती मम' वाचम्' जुषस्व' सेवस्व। 'बृहस्पतिः' जगत्पतिर्देवः त्वां 'मह्यं' 'नियुनक्तु' मां प्रसादयितुं मनोरञ्जिनीं करोतु ॥१५॥

इति सामवेदीये मन्त्रब्राह्मणे प्रथम-प्रपाठकस्य द्वितीयःखण्डः ॥२॥

हे कन्ये ! तुमि श्वशुर, शक्र, ननन्दा, देवर प्रभृति तावत् परिजनेर उपरेई आधिपत्य करिते सक्षमा हओ ॥१४

हे कन्ये ! तोमार हृदय आमार कार्य्ये नियुक्त कर, तोमार चित्त आमार चित्तेर अनुगामी हउक, तुमि एकमना हइया आमार आज्ञा प्रतिपालन कर। एई बृहत् जगतेर पालयिता देवता तोमाके आमार मनोरञ्जने नियुक्त करितेछेन ! ॥१५

१४—अनुष्टुप्छन्दः। कन्या देवता। सम्राज्ञीकरणे विनियोगः।

१५—त्रिष्टुप्छन्दः। प्रार्थ्यमान देवता। एकीभाव-प्रार्थने विनियोगः।

अथः तृतीय खण्डः—

लेखा सन्धिषु पक्ष्मस्वारोकेषु च यानि ते॥ तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहम्॥ १॥ केशेषु यच्च पापकं मोक्षिते रुदि ते च यत्॥ तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहम्॥२॥ शीलेषु यच्च पापकं भाषिते

हे कन्ये ! 'ते' तव 'लेखा-सन्धिषु' लेखानां रेखानां सन्धयो यत्र तादृशेषु मूर्द्ध-प्रदेशेषु, किञ्च 'पक्ष्मसु' चक्षुर्लोमसु 'च' अपिच 'आवर्त्तेषु' नाभिरन्ध्रादिषु 'यानि' अपचिह्नानि (सन्तीति शेषः)—अहं पाणिग्रहः 'तानि सर्व्वाणि' 'पूर्णाहुत्या' अनया शेषाहुत्या 'समयामि' उपशमितानि करोमि ॥ १ ॥

हे कन्ये ! 'यच्च' 'पापकं' पापं अशुभकरं 'ते' तव 'केशेषु (अस्तीति शेषः) 'च' अपिच 'ईक्षिते दर्शन-क्रियायां 'उदिते' चलिते गमन क्रियायां 'यत्' अस्ति—'अहं' इत्यादि ॥२॥

হে কন্যে ! তোমার শরীরস্থ রন্ধ্রগত রেখা সমস্তের সন্ধি সকলে, চক্ষুরিন্দ্রিয়ের পরিরক্ষক পক্ষ্মসকলে, এবং নাভি কূপাদি প্রদেশে যে সকল অমঙ্গল চিহ্ন আছে—আমি এই শেষ আহুতি দ্বারা তৎ সমস্তই উপশমিত করিতেছি ॥ ১

হে কন্যে ! তোমার কেশ সমস্তে যে পাপ আছে এবং তোমার ঈক্ষণে, চলনে, যাহা কিছু পাপ আছে— আমি এই শেষ আহুতি দ্বারা তৎ সমস্তই উপশমিত করিতেছি ॥২

१—लेखिल्यादीनां षण्णाम्—अनुष्टुप् छन्दः । अभिधीयमाना देवता ।

पाणि-ग्रहस्याज्यहोमे विनियोगः ।

हसिते च यत् ॥ तानि ते पूर्णाहुत्या सर्वाणि शमया-
म्यहम्॥३॥ आरोकेषु च दन्तेषु हस्तयोः पादयोश्च यत्॥
तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहम् ॥४॥ ऊर्वो-
रुपस्थे जङ्घयोः सन्धानेषु च यानि ते ॥ तानि ते पूर्णा-
हुत्या सर्वाणि शमयाम्यहम्॥५॥यानि कानि च घोरा-

हे कन्ये ! 'ते' तव 'शीलेषु' व्यवहारेषु 'यत्' 'पापकं' यच्च 'भाषिते' कथन-क्रियायां 'च' अपिच 'हसिते' हसन-क्रियायां पापकम् अस्ति—'अहं' इत्यादि ॥ ३ ॥

हे कन्ये ! 'ते' तव 'आरोकेषु' दन्तान्तरेषु (मेड़े इति प्रसिद्धेषु) 'च' अपिच 'दन्तेषु', 'हस्तयोः', 'पादयोः' 'यच्च' पापकम् अस्ति—'अहं' इत्यादि ॥ ४ ॥

हे कन्ये ! 'ते' तव 'ऊर्वोः' ऊरु-द्वययोः 'उपस्थे' गोपनीये इन्द्रिये 'जङ्घयोः' 'च' अपिच 'सन्धानेषु' अन्यान्य-प्रदेशेषु 'यत्' पापकं अस्ति—'अहं' इत्यादि ॥ ५ ॥

কন্যে! তোমার ব্যবহারে যে পাপ আছে, এবং তোমার কথনে, হসনে, যে পাপ প্রকাশ পায়—আমি এই শেষ আহুতি দ্বারা তৎ সমস্তই উপশমিত করিতেছি ॥৩

হে কন্যে ? তোমার দন্তের মেড়েগুলিতে এবং দন্তসকলে, হস্তদ্বয়ে, ও পাদদ্বয়ে যে পাপ আছে— আমি এই শেষ অহুতিদ্বারা তৎ সমস্তই উপশমিত করিতেছি ॥৪

হে কন্যে ! তোমার উরূদ্বয়ে, উপস্থেন্দ্রিয়ে, জঙ্ঘাদ্বয়ে এবং অন্যান্য সন্ধি প্রদেশে যে পাপ আছে—আমি এই শেষ আহুতি দ্বারা তৎসমস্তই উপশমিত করিতেছি ॥৫

णि सर्वाङ्गेषु तवाभवन् । पूर्णाहुतिभि राज्यस्य सर्वाणि तान्यशीशमम् ॥६॥ ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवं विश्व मिदं जगत् ॥ ध्रुवासः पर्वता इमे ध्रुवा स्त्री पतिकुले इयम् ॥ ७ ॥ अन्नपाशेन मणिना प्राण-सूत्रेण

'च' अपिच हे कन्ये ! 'तव' सर्वाङ्गेषु' समस्त-शरीरांशेषु 'यानि कानि' 'घोराणि' पापानि 'अभवन्'—'अहं' 'तानि सर्व्वाणि' 'आजास्य' घृतस्य 'आहुतिभिः' 'अशीशमम्' शमितवानिव ॥ ६ ॥

हे प्रार्थ्यमान-देव ! यथा इयं 'द्यौः' 'ध्रुवा' स्थिरा, इयं 'पृथिवी' 'ध्रुवा', 'इदं' दृश्यमानं विश्वम् सर्व्वं जगत् चराचरं समस्तं 'ध्रुवम्', 'इमे' दृश्यमानाः पर्व्वताः गिरयश्च 'ध्रुवासः' ध्रुवाः स्थिराः, 'इयं' 'स्त्री' 'पतिकुले' अत्र पतिगृहे, तथैव 'ध्रुवा' भवत्विति शेषः ॥ ७ ॥

এবং হে কন্যে ! তোমার সর্ব্বাঙ্গে যেসকল ঘোরতর পাপ হইয়াছে—আমি এই ঘৃতের পূর্ণাহুতি প্রদানে তৎসমস্তই উপশমিত করিতেছি ॥৬

হে প্রার্থ্যমান দেব ! যেমন এই দ্যুলোক চিরস্থায়ী, এই পৃথিবী চিরস্থায়িনী, এই পরিদৃশ্যমান সমস্ত চরাচর চিরস্থায়ী, এই অচলরাজিও চিরস্থায়ী—এই স্ত্রীও, এই পতিগৃহে সেইরূপ চিরস্থায়িনী হউক ॥৭

৩—অনুষ্টুপ্ ছন্দঃ । অভিধীয়মানা দেবতা । অনুমন্ত্রণে বিনিয়োগঃ ।

ष्मिना॥ बध्नामि सत्यग्रन्थिना मनश्च हृदयंच ते॥८॥ यदेतद्धृदयं तव तदस्तु हृदयं मम॥ यदिदꣳ हृदयं मम तदस्तु हृदयं तव॥९॥ अन्नं प्राणस्य पद्विꣳ

हे वधु! 'ते' तव 'मनः' चित्तं 'च' अपिच 'हृदयं'भावं 'बध्नामि' बन्धनं करोमि स्ववशं नयामीत्यर्थः। कथम्? इत्याह— 'मणिना' मणितुल्येन, रत्न-सदृशेन 'प्राण-सूत्रेण' अपिच 'सत्य-ग्रन्थिना' सत्यरूप-ग्रन्थिना। अयं भावः—तुभ्यं मणिमयं यदिदं अन्नम् ददामि तव हृदयस्य मनसश्च बन्धनाय तत् पाशरूपं भवति, यदिदं रत्नतुल्यं मदीयं प्राणसङ्घं तत् समस्तमेव तुभ्य मुत्सृजे, उत्सृष्टश्चैतत् तत्पाश-बन्धनायोपयोगि सूत्रं भवति, तत्र च ग्रन्थिः सत्य-वचनं प्रतिज्ञा-कथनमिति॥ ८॥

हे बधु! 'यत् एतत्' अनुभूतं 'तव' सम्बन्धि 'हृदयं' 'तत्' 'मम' सम्बन्धि 'अस्तु' भवतु—किञ्च, 'मम' 'यत्' 'हृदयं' 'तत्' 'तव' 'अस्तु' आवयो रैक-हृदयं भवतु इत्यर्थः॥ ९॥

হে বধু! তোমার মন ও হৃদয় মণিতুল্য অন্নদানরূপ পাশে এবং রত্ন সদৃশ প্রাণরূপ সূত্রে ও সত্যস্বরূপ গ্রন্থি দ্বারা বন্ধন করিতেছি॥৮

হে বধু! এই যে ত্বদীয় হৃদয়—ইহা আমার হউক অর্থাৎ তুমি মর্ম্মবেদনা পাইলে সেই যাতনা আমার হউক এবং আমার এই হৃদয় তোমার হউক অর্থাৎ আমার মর্ম্মবেদনা তোমার মর্ম্মাঘাত-কর হউক। এইরূপ তোমার সুখে আমার সুখ এবং আমার সুখে তোমার সুখ হউক॥৯

৮—অনুষ্টুপ্ ছন্দঃ। অন্ন দেবতা। অন্ন-প্রাশনে বিনিয়োগঃ।
৯—অনুষ্টুপ্ ছন্দঃ। প্রার্থ্যমানা দেবতা। হৃদয়ৈক্যে বিনিয়োগঃ।

श स्तेन बध्नामित्वासौ ॥ १० ॥ सुल्मकिꣳशुकꣳ शल्मलिं विश्वरूपꣳ सुवर्णवर्णꣳ सुकृतꣳ सुचक्रम् । आरोह सूर्य अमृतस्य नाभिꣳ स्योनं पत्ये वहन्तु कृणुष्व ॥११॥

हे बधु ! 'अन्न' अदनीयं वस्तुजातं 'प्राणस्य' वायोः 'पड़िं-शः' बन्धनं यतः, अतः 'तेन' अन्नन 'त्वा' त्वां 'बध्नामि' बन्धनं करोमि ॥ १० ॥

हे 'सूर्य्ये !' यथा सूर्य्या तेजोरूपा तद्वत्तेजस्वति ! त्वं 'सूचक्र' सुन्दर-चक्रोपेतम् इमं रथम् 'स्वारोह' सुखेनारोहणं कुरु। कीदृशं रथमित्याह—'किंसुकं' पलाश-कुसुममिव रक्तवर्णं, 'शल्मलिं' शाल्मलि-कुसुममिव आरादिविशिष्टं 'विश्वरूपं' विचित्रं, 'सुवर्णवर्णं' रक्तपीताभं, 'सुकृतं' सुनिर्मितं। इमे रथाश्वाः 'अमृतस्य' कल्याणस्य 'नाभिम्' उत्पत्तिस्थानं त्वां 'वहन्तु'। त्वञ्च 'पत्ये' भर्त्रे 'स्योनं' सुखं 'कृणुष्व' कुरु ॥ ११ ॥

हे वधू ! एई ये समस्त अदनीय वस्तु—ईहाई प्राणेर रक्षणोपाय बन्धन स्वरूप हईया थाके, अतएव एई अन्नदाने तोमाके आबद्ध करितेछि ॥१०

हे सूर्य्यतुल्य तेजस्वति ! तुमि एई—पलाश कुसुमेर न्याय रक्तवर्ण, शिमुल गुच्छेर चित्रे चित्रित, सुवर्ण वर्ण, विविध चित्रे सुशोभित, सुन्दर चक्र-समन्वित, उत्कृष्ट कारुवर-विनिर्म्मित रथे आरोहण कर। एई रथेर अश्वगण कल्याणेर आकर तोमाके भालरूपे वहन करुक एवं तुमि सर्व्वदा पति याहाते सुखी हन ताहाई करिवा ॥११

१०—द्विपाद् गायत्रीच्छन्दः। अन्न देवता। अन्नस्तुतौ विनियोगः।
११—त्रिष्टुप्छन्दः। कन्या देवता। रथारोहणे विनियोगः।

मा विदन् परिपन्थिनो य आसीदन्ति दम्पती सुगेभि र्दुर्गमतीता मपद्रान्त्वरातयः॥१२॥ इह गावः प्रजायध्व-मिहाश्वा इह पूरुषाः । इहो सहस्रदक्षिणो पि पूषा निषीद तु॥१३॥ इह धृति रिह स्वधृति रिह रन्ति रि-

'ये' 'परिपन्थिनः' दस्यवः 'आसीदन्ति' पथीति शेषः, ते इमौ 'दम्पती' जायापती रथारूढौ इति 'मा विदन्' न हि विदिता भवेयुः । किञ्च 'सुगेभिः' सुगमै र्मार्गैः 'दुर्गम्' दुर्गमं पन्थानम् 'अतीताम्' व्यतीताम् । अन्येपि 'अरातयः' शत्रवः 'अपद्रान्तु' अपगता यथा स्युस्तथा पलायन्तु ॥ १२ ॥

'इह' बधूवर सम्बन्धिनि गृहे 'गावः' 'प्रजायध्वम्' बहुला भवन्तु । 'इह' 'अश्वाः' प्रजायध्वम् । इह 'पूरुषाः' पुत्रादयो वंशाः प्रजायध्वम् । 'उ' अपिच 'सहस्र-दक्षिणोऽपि' यस्य देवस्य प्रसादात् गो-सहस्र-दक्षिणा अपि क्रतवः सम्पद्यन्ते सोऽसौ 'पूषा' आदित्यो देवः 'इह' 'निषीदन्तु, प्रसीदन्तु॥१३॥

এই দম্পতীতে রথারূঢ় হইলেন পথি মধ্যে বিঘ্নকারী যে সমস্ত দস্যুদল আছে, তাহারা যেন জানিতে না পারে! দুর্গম পথ সকল যেন সুগমরূপে অতীত হয়! শত্রুরা সকলেই যেন দূর হইয়া যায়! ॥১২

এই বধূ ও বরসম্বন্ধী গৃহে গোধন পরিবর্দ্ধিত হইতে থাকুক এবং এই গৃহে অশ্বসম্পত্তি পরিবর্দ্ধিত হইতে থাকুক। এই গৃহে

१२—अनुष्टुप् छन्दः । आशास्यमाना देवता । चतुष्पथाद्यामन्त्रणे ।

१३—अनुष्टुप् छन्दः । आशास्यमाना देवता । गृह-प्रवेशे विनियोगः ।

ह रमस्व। मयि धृति मयि स्वधृति मयि रमो मयि रमस्व ॥१४॥

हे बधू 'इह' अस्मिन् गृहे तव 'धृतिः' धैर्य्यम् अस्तु। 'इह' तव 'स्वधृतिः' स्वैरात्मीयैः धृति धारणम् एकत्र मेलनम् अस्तु। इह तव 'रन्तिः' रमणम् अस्तु। 'इह' 'रमस्व' आमोदेन तिष्ठ। किञ्च 'मयि' भर्त्तरि तव धृत्यादिकं विशेषेणास्तु इत्याह—धृति रित्यादि ॥ १४ ॥

पुत्रादि वंशवृद्धि हउक। अपर যে দেবতার প্রসাদে সহস্র দক্ষিণার উপযুক্ত যজ্ঞ সকল হইতে পারে সেই পূষা (সূর্য্য) দেবতা এই গৃহে সর্ব্বদা প্রসন্ন থাকুন ॥১৩

হে বধু! এই গৃহে তোমার স্থির মতি হউক, এই গৃহে তুমি সানন্দে কাল যাপন কর। এবং আমাতে তোমার স্থির মতি হউক, আমার আত্মীয় গণের সহিত তোমার মিলন হউক, আমাতে তোমার আশক্তি হউক, আমার সহিত তুমি সানন্দে কাল যাপন কর ॥১৪

इति सामवेदीये मन्त्रब्राह्मणे प्रथमप्रपाठकस्य तृतीयः खण्डः ॥ ३ ॥

——:०:——

१४—उष्णिक्छन्दः। कन्या देवता। हौमे विनियोगः।

अथ चतुर्थः खण्डः ।

अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्याः पापी लक्ष्मीस्तामस्या अपजहि ॥ १ ॥ वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्याः पतिघ्नी तनूस्तामस्या अपजहि ॥ २ ॥ चन्द्र प्रायश्चित्ते

'प्रायश्चित्ते' प्रायश्चित्त कार्य्ये आराध्यमान ! 'अग्ने!' 'त्वं' देवानाम् अस्मदादीनां 'प्रायश्चित्तिः' दोषस्य उपशमिता 'असि' भवसि, अतः 'नाथकामः' नाथः अधिनायकः मे भूयादिति कामनावान् 'अहं 'ब्राह्मणः' 'त्वाम्' 'उपधावामि' अभ्यर्चामि । त्वं हि 'अस्याः' 'पापी लक्ष्मी' अशुभसम्बन्धिनी शोभा 'या' स्यात्, 'अस्याः' वध्वः 'ताम्' दुष्ट शोभाम् 'अपजहि' अपगतां कुरु ॥ १

'प्रायश्चित्ते' कार्य्ये आराध्यमान ! 'वायो !' 'त्वं' 'देवानाम्' अस्मदादीनां प्रायश्चित्तिः' दोषस्य उपशमिता 'असि' भवसि, अतः 'नाथकामः' 'अहं' 'ब्राह्मणः' 'त्वा' 'उपधावामि'; 'अस्यां' 'पतिघ्नी

হে প্রায়শ্চিত্ত কার্য্যে আরাধ্যমান অগ্নে ! তুমি দেদীপ্যমান আমাদিগের দোষের উপশমকারী হইতেছ অতএব নাথকাম আমি (অর্থাৎ আমার কেহ নাথ [মুরুব্বী] হউক এরূপ অভিলাষী) ব্রাহ্মণ, তোমাকে অর্চ্চনা করিতেছি, তুমি এই বধূর অমঙ্গল শোভা যাহা থাকে তাহা দূর করিয়া দাও ॥ ১

হে প্রায়শ্চিত্ত কার্য্যে আরাধ্যমান বায়ো ! তুমি দেদীপ্যমান আমাদের দোষের উপশমকারী হইতেছ অতএব নাথকাম আমি ব্রাহ্মণ, তোমাকে অর্চ্চনা করিতেছি, তুমি এই বধূর শরীরে পতিবিয়োগ-কারণ দোষ যাহা থাকে, তাহা দূর করিয়া দাও ॥২

১—অগ্ন্যাদয় ইমে পঞ্চ মন্ত্রা নিগদাः (যজুর্বিশেষः) । অগ্ন্যাদি দৈবতাকাः । চতুর্থীতি প্রসিদ্ধ হোম কর্ম্মণি বিনিযুক্তাः ।

त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वानाथकामउप-
धावामि यास्या अपुत्रा तनूस्तामस्या अपजहि॥३॥ सूर्य
प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथ
कामउपधावामि यास्या अपशव्या तनूस्तामस्या अप-

पति-हनन-कारिणी 'तनूः' 'या' स्यात्, 'अस्याः' 'तां' तद्-
दूषण-विशिष्टां तनूम् 'अपजहि' दूषण-विनिर्मुक्तां कुरु इत्यर्थः॥२

'प्रायश्चित्ते' कार्य्ये आराध्यमान 'चन्द्र!' 'त्वं' 'देवानाम्'
अस्मदादीनां 'प्रायश्चित्तिः' दोषस्य उपशमिता 'असि', अतः
'नाथ-कामः' 'अहं' 'ब्राह्मणः' 'त्वाम्' 'उपाधावामि', 'अस्याः'
'अ-पुत्रा' पुत्राय हिता पुत्रा तदविपरीता वन्ध्यात्वादि-दूषण-
दूषिता 'तनूः' 'या' स्यात्, 'अस्याः' 'ताम्' 'अपजहि' ॥३

'प्रायश्चित्ते' कार्य्ये आराध्यमान 'सूर्य!' 'त्वं' 'देवानाम्'
प्रायश्चित्त कार्य्যে আরাধ্যমান হে চন্দ্র! তুমি দেদীপ্যমান
আমাদের দোষের উপশমকারী হইতেছ অতএব নাথকাম
আমি ব্রাহ্মণ, তোমাকে অর্চ্চনা করিতেছি, তুমি এই বধূর
শরীরে বন্ধ্যা হইবার কারণ যে কোন দোষ থাকে, তাহা দূর
করিয়া দাও ॥৩

প্রায়শ্চিত্ত কার্য্যে আরাধ্যমান হে সূর্য্য! তুমি দেদীপ্যমান
আমাদের দোষের উপশমকারী হইতেছ অতএব নাথ-কাম
আমি ব্রাহ্মণ, তোমাকে অর্চ্চনা করিতেছি, তুমি এই বধূর
শরীরে অ-পশব্য* দোষ যাহা থাকে, তাহা দূর করিয়া
দাও ॥৪

जहि ॥ ४ ॥ अग्नि वायु चन्द्र सूर्य्याः प्रायश्चित्तयो यूयं देवानां प्रायश्चित्तयस्य ब्राह्मणोवो नाथकाम उपधावामि यास्याः पापी लक्ष्मी र्या पतिघ्नी यापुत्रघ्ना या पशव्या ता अस्या अपहत ॥५॥ विष्णुर्योनिं कल्पयतु त्वष्टा

अस्मदादीनां 'प्रायश्चित्तिः' दोषस्य उपशमिता 'असि', अतः 'नाथ-कामः' 'अहं' 'ब्राह्मणः' 'त्वाम्' 'उपधावामि'; 'अस्याः' 'अ-पशव्या' पशवे हिता पशव्या तद्विपरीता पशु-नाश-दूषण-दूषिता 'तनूः' 'या' स्यात्, 'अस्याः' 'ताम्' 'अपजहि' ॥४

हे अग्नि-वायु-चन्द्र-सूर्य्याः ! 'यूयं' 'देवानाम्' अस्मदादीनां 'प्रायश्चित्तयः' दोषस्य उपशमितारः 'स्थः' अतः 'नाथ-कामः' 'अहं' 'ब्राह्मणः' 'वः' युष्मान् 'उपधावामि'; 'अस्याः' 'पापी लक्ष्मी' 'या' तनूः, 'पतिघ्नी' 'या' तनूः, अपुत्रा' 'या' तनूः, अ-पशव्या' 'या' 'तनूः, 'अस्याः' 'ताः' तद्विधाः समस्ताः तन्वः 'अपहत' दूरं कुरुत दूषण-दूषिताः तन्वः दूरीकृत्य निर्दुष्टाः कुरुतेत्यर्थः ॥ ५

হে অগ্নি, বায়ু, চন্দ্র ও সূর্য্য ! তোমরা আমাদের দোষের উপশমকারী হইতেছ অতএব নাথ-কাম আমি ব্রাহ্মণ, তোমাদিগকে অর্চ্চনা করিতেছি, তোমরা এই বধূর শরীরে অমঙ্গল শোভা, পতি বিয়োগ-কারণ দোষ, বন্ধ্যা দোষ, অপশব্য দোষ প্রভৃতি যে কোন দোষ থাকে, তাহা দূর করিয়া দাও ॥৫

* যে দোষে গো-মহিষাদি গৃহপশুর হানি হয়।

रूपाणि पिंशतु ॥ आसिंचतु प्रजापति र्धाता गर्भं दधातु ते॥६॥ गर्भन्धेहि सिनीवालि गर्भन्धेहि सरस्वति। गर्भं ते अश्विनौ देवा वाधत्तां पुष्करस्रजौ ॥ ७ ॥

हे बधु ! 'विष्णुः' व्यापको देवः 'ते' तव 'योनिं' गर्भस्थानं 'कल्पयतु' गर्भग्रहणोपयुक्तां करोतु। 'त्वष्टा' स्रष्टा सएव देवः 'रूपाणि' गर्भाकारान् 'पिंशतु' प्रकाशयतु। तमेव गर्भं गर्भस्थानं योनिं वा सएव 'प्रजापतिः' प्रजानां पालको देवः 'आ सिञ्चतु' सिञ्चनं करोतु जीवनीनामशक्तेरतिशेषः। 'धाता' धारयिता सएव देवः तं 'दधातु' धारयतु ॥ ६

हे 'सिनीवालि' चन्द्र-शक्ते ! अस्यां 'गर्भं' 'धेहि' धारय पोषय वा। हे 'सरस्वति' अस्मद्वाणि ! अस्यां 'गर्भं धेहि' अस्मत्कथनादेवास्यां गर्भमस्तु इतिभावः। हे वधु ! 'अश्विनौ देवौ' द्यावापृथिवी ! ते तव 'गर्भम्' 'आधत्ताम्' धारयताम् कीदृशौ तावित्याह—'पुष्करस्रजौ' पुष्करमम्बरमेव स्रगिव स्रग् ययोः तौ अम्बरेण व्यापितावित्यर्थः ॥ ७

हे वधु ! विष्णु (व्यापक देव) तोमार योनि प्रदेशके गर्भ ग्रहणोपयुक्त करुन। स्रष्टृरूपी सेई देव ताहाते गर्भाकार प्रकाश करुन। प्रजागणेर पालक सेई देवता जीवनी शक्तिते सेई गर्भ सिञ्चन करुन। धारयिता रूपी सेई देव ताहाके धारण करुन, याहाते गर्भ नष्ट ना हय! ॥६

हे चन्द्रमार अमृतमय शक्ते ! एई वधूते गर्भ धारण कर। हे अस्मद् वाक्यामृत ! एई वधूते गर्भ धारण कर। हे वधु !

पुमाꣳसौ मित्रावरुणौ पुमाꣳसा वश्विना वुभौ ॥ पुमानग्निश्च वायुश्च पुमान् गर्भ स्तवोदरे ॥ ८ ॥ पुमा-

हे वधु ! यथा 'मित्रावरुणौ' अहोरात्रौ कालौ 'पुमांसौ' प्रजननशक्तिमन्तौ, तत्रैवैतत्समस्तस्य जायमानत्वात् ; 'उभौ' द्यावापृथिवी 'अश्विनौ' अश्वाविव वेगगामिनौ 'पुंमांसौ' पूर्ववत् ; 'अग्निः' पार्थिवो देवः 'च' अपिच 'वायुश्च' अन्तरीक्षस्थो देवश्च 'पुमान्'—'तव उदरे' अपि एवमेव 'पुमान् गर्भः' भवतु ॥ ८

हे वधु ! यथा 'अग्निः' पार्थिवो देवः 'पुमान्', यथा 'इन्द्रः' अन्तरीक्षस्थो देवो 'पुमान्', यथा 'बृहस्पतिः' बृहतां विपुलानां राशिचक्राणां पतिः पालकः सूर्य्यः दुस्थोदेवः 'पुमान्'—एवमेव त्वमपि 'पुमांसं' प्रजनन-शक्तिमन्तं पुत्रं 'विन्दस्व' लभस्व। किञ्च तं लब्धपुत्रम् 'अनु' अन्योऽपि 'पुमान्' पुमांसः पुत्राः 'जायताम्' तवोदरे इति शेषः ॥ ८

এই অম্বর-মাল্য-ধারী দ্যব্যাপৃথিবী তোমার গর্ভ ধারণ করুন ॥৭

হে বধু ! এই অহোরাত্রকালেই সমস্ত প্রজা উৎপন্ন হইতেছে অতএব ইহা যেরূপ পুরুষ (প্রজনন ক্রিয়াক্ষম) এই অশ্বের ন্যায় বেগগামী এই দ্যাবাপৃথিবী যেরূপ পুরুষ এবং এই পৃথিবীর দেবতা অগ্নি ও অন্তরীক্ষের দেবতা বায়ু যেরূপ পুরুষ—তোমার উদরেও সেইরূপ পুরুষ অর্থাৎ প্রজননক্ষম গর্ভ উৎপন্ন হউক ॥৮

হে বধু ! এই পৃথিবীর দেবতা যেরূপ পুরুষ, অন্তরীক্ষের

नग्निः पुमानिन्द्रः पुमान्देवो बृहस्पतिः॥ पुमाꣳ सं पुत्रं विन्दस्व तं पुमाननु जायताम्॥ ९॥

দেবতা ইন্দ্র (আকাশ) যেরূপ পুরুষ, এই অতিবিপুল রাশি-চক্রের পালন কর্ত্তা সূর্য্য যেরূপ পুরুষ—তুমিও সেইরূপ পুরুষ সন্তান লাভ কর। অপিচ সেই সন্তানের পরে তোমার উদরে আরও প্রজননশালী সন্তানগণ উৎপন্ন হউক॥৯

इति सामवेदीये मन्त्र-ब्राह्मणे प्रथम प्रपाठकस्य चतुर्थः खण्डः॥ ४॥

॥ अथ पञ्चमः खण्डः॥

अयमूर्ज्जावतो वृक्ष ऊर्ज्जीव फलिनी भव॥ पर्णम्बनस्पते नुत्वा नुत्वा सूयताꣳरयिः॥१॥ येनादितेः सोमानं

'अयम्' 'ऊर्ज्जावतः' उडुम्बरः वृक्षः 'ऊर्ज्जी' बहुतेजःसम्पन्नः 'इव' अयमिव त्वमपि 'फलिनी' बहुतरफलशालिनी बहुपुत्रवती भव। हे 'वनस्पते'! 'पर्णं' स्वकीयकृष्टनं 'नुत्वा नुत्वा' भूयः प्रेरयित्वा तथासंख्यो वेतिभावः 'रयिः' धनं 'सूयताम्' प्रसूयताम् अस्मै इत्यर्थः॥ १

এই বহু-ফল-শালী তেজস্বী উড়ুম্বর বৃক্ষের ন্যায় তুমি পুত্ররূপ বহু-ফল-শালিনী হও। হে উড়ুম্বর বৃক্ষ! তোমার পত্র পত্র গণনা করিয়া তৎপরিমিত ধন ইহার জন্য প্রসব কর॥১

नयति प्रजापति र्महते सौभगाय॥ तेनाह मस्यैसीमानं नयामि प्रजा मस्यै जरदष्टिं कृणोमि ॥२॥ राका मह ँ सुहवा ँ सुष्टुती ऽवे ष्टणोतु नः सुभगा बोधतु

'प्रजापतिः' जगत्स्रष्टा देवः 'येन' हेतुना प्रजोत्पत्ति कामेनास्य 'देवानाम्' अस्मदादीनाम् मातृभूतस्य अण्डस्य 'सीमानं' अवधिम् नयति नीतवान्—(द्विधाकरणेनेति यावत्) 'तेन' एव हेतुना 'अहम्' भर्त्ता अपि 'अस्यै' अस्याः 'सीमानं' 'नयामि' उन्नयनं उन्नतिशीलं करोमि। किञ्च प्रजापतेस्तथा नयने किं निमित्तम्? उच्यते—'महते सौभगत्वाय' अतिविपुल-सौभाग्याय तस्याण्डस्यति शेषः, जगत्-प्रकाशायेति यावत्—तथैवाहमपि 'अस्यै' अस्याः 'जरदष्टिं' जरावस्था पर्य्यन्त-जीविनीं 'प्रजाम्' 'कृणोमि' करोमि ; एतयैव क्रिययेति भावः अस्या एतदेव महत् सौभाग्यम्, एतदर्थमेव सीमन्तोन्नयनम् ॥ २

প্রজাপতি যে হেতুতে (প্রজোৎপত্তি কামনায়) চরাচর সমস্তের মাতা স্বরূপ অখণ্ড অণ্ডের দ্বিধাভাগ করত সীমার উন্নতি করিয়াছেন—আমিও (ভর্ত্তা) সেই হেতুতেই এই বধূর সীমন্তের উন্নতি করিতেছি। তাঁহার সেই সীমার উন্নয়ন ক্রিয়াতে সেই অণ্ডের বিপুল সৌভাগ্য প্রকাশ পাইয়াছে অর্থাৎ তাহাতেই এই সমস্ত আবির্ভূত হইয়াছে—আমিও এই সীমন্তোন্নয়ন ক্রিয়ার প্রভাবে ইহাকে মহৎ সৌভাগ্যবতী করিতেছি =ইহার প্রজা জরাবস্থ হইয়া বিনষ্ট হইবে, তাহাদের অকাল-মৃত্যু হইবে না সুতরাং ইহাকে শোকাতুরা হইতে হইবে না ॥২

उपागहि सहस्र पोषꣳ सुभगे रराणा ॥ ३ ॥ किं प-त्मना ॥ सोव्यत्वपः सूच्या छिद्यमानया ददातु वीरꣳ शतदायुमुख्यम् ॥ ४ ॥ यास्ते राके सुमतयः सुपेशसो याभि र्ददासि दाशुषे वसूनि ॥ ताभि र्नो अद्य सुमना

'अहं' भर्त्ता सुष्टुतो 'सुस्तुतया' 'सुहवां' शोभनाह्वानां 'राकां' अमावास्यां तिथि-कालं 'हुवे' आह्वयामि। 'सुभगा' सौभाग्यवती सा देवी 'नः' अस्माकं एतत् आह्वानं 'शृणोतु;' किञ्च 'त्मना' आत्मना स्वयमेव 'बोधतु' बुध्यतु। अपिच सैवदेवी 'अपः' भविष्यमाणान् कर्मरूपान् पुत्रादीन् 'अच्छिद्यमानया' अभजामानया 'सूच्या' वेधन-यन्त्रेण 'सीवातु'। अपरञ्च 'शतदायुमुख्यम्' शतदायुषु बहु-दान-क्षमेषु मुख्यम् एवं 'वीरं' पुत्रं 'ददातु' ॥ ३

हे 'सुभगे' सौभाग्यवति! 'ते' तव 'या' 'सुपेशसः' सुरूपाः 'सुमतयः' 'याभिः' सुरुप-सुमतिभिः 'दाशुषे' यजमानाय 'वसूनि' धनानि 'ददासि', 'ताभिः' मतिभिः साकं 'सुमनाः' प्रसन्न-चित्तस्त्वं 'नः' अस्मभ्यम् 'सहस्रपोषं' बहु-प्रतिपालकं पुत्रं 'रराणा' ददाना सती 'अद्य' 'उपागहि' समागच्छ ॥४

सुन्दर स्तवे आह्वानের উপযুক্ত অমাবশ্যা তিথিরূপ দেবতাকে আমি (ভর্ত্তা) আহ্বান করিতেছি। সৌভাগ্যবতী সেই দেবী আমাদের এই আহ্বান শ্রবণ করুন এবং আহ্বানের অভিপ্রায় আপনা হইতেই বুঝিয়া লউন। অপরঞ্চ ভবিষ্যমাণ পুত্রাদিকে যাহা ভাঙ্গিবার নহে এরূপ সূচি দ্বারা সীবন (সেলাই) করুন এবং বদান্যাগ্র-গণ্য প্রপুত্র দান করুন॥৩

भ्यसि प्रजां पशुं त्सौभाग्यं मह्यं दीर्घायुत्वं पत्युः ॥५॥ यातिरश्चो निपद्यते अहं विधरणी इति। तां त्वा

भर्त्ता पृच्छेत्—हे वधु ! अत स्थाल्या 'प्रजां' 'पशून्', 'मह्यं सौभागम्' 'पत्युः' मम 'दीर्घायुत्वं' 'पश्यसि' किम् ? ॥ ५ ॥

'ता' देवता अत्र शुभे कर्मणि "तिरश्चो" न वाञ्छितफल-विघ्नकर्त्री "निपद्यते" भवति, "अहं" भर्त्ता सा देवता "विधरणी शुभदायिनी 'इति' मत्वेति शेषः 'तां' "त्वा" त्वां "संराधनीं" कार्य्यसाधिनीं देवीं "अहं" भर्त्ता "घृतस्यधारा" आहुत्या 'यजे' अर्चयामि ॥ तथाचार्चन-मन्त्रः——"संराधन्यै" कार्य्यसाधिन्यै "दिष्ट्यै" इष्टफलदात्र्यै—"दैव्यै" स्वाहेति मन्त्र-शेषः ॥ ६ ॥

হে সৌভাগ্যবতি ! রাকে ! তোমার যে সুন্দর মতি সমস্ত আছে, যে মতি সমস্তে যজমানদিগকে বিবিধ ধনদান করিয়া থাক, সেই সমস্ত মতির সহিত প্রসন্ন মনে আমাদিগকে বহুপোষী পুত্র প্রদানাশয়ে অদ্য আগমন কর ॥ ৪

ভর্ত্তা জিজ্ঞাসা করিবেন—

হে বধূ ! এই স্থালীতে পুত্র পৌত্রাদি প্রজা, গো মহিষীপ্রভৃতি গৃহপশু, মদীয় সৌভাগ্য, তোমার পতির অর্থাৎ আমার দীর্ঘায়ু দেখিতে পাইতেছ কি ? ৫

যে দেবতা এই শুভ কর্ম্মে বাঞ্ছিত ফলের বিঘ্নকারিণী হইতেছেন, আমি (ভর্ত্তা) তাঁহাকে শুভ-ফল-দায়িনী বিবেচনা করিয়া, কার্য্যসাধিনী সেই দেবতাকে ঘৃতের ধারা প্রদান পুরঃসর অর্চ্চনা করিতেছি ॥ যথা মন্ত্র—"কার্য্যসাধিনী, ইষ্টফলদায়িনী, দেবীকে এই ঘৃতাহুতি প্রদান করি" ॥ ৬

घृतस्य धारया यजे सꣳराधनीमहं॥ सꣳराधन्यै देव्यै देष्ट्रे ॥ ६ ॥ विपश्चित्पुच्छम भरत्तद्धातापुनराहरत् ॥ परे हि त्वं विपश्चित् पुमानयं जनिष्यतेऽसौ नाम ॥७॥ इय माज्ञे दमन्न मिद मायु रिदममृतम्॥ ८ ॥ मेधां ते मित्रावरुणौ मेधामग्निर्दधातु ते ॥ मेधां ते अ-

एवं हि श्रुतम्—"विपश्चित्" देवः 'पुच्छं' पुत्रस्य प्रतिष्ठास्थानम् 'अभरत्' अहरत् 'तत्' तदेव प्रतिष्ठा स्थानम् 'धाता' देवः 'पुनराहरत्' आहरणं करोति। 'हि' यतः, अतः हे 'विपश्चित्' देव! 'त्वं' 'परेहि' आगच्छ प्रसन्नोभव, 'अयं' पुरुषः 'असौ नाम' एतन्नामकं पुत्रं 'जनिष्यते' उत्पादयतु ॥ ७ ॥

हे बालक! 'इयम्' 'आज्ञा' प्रज्ञा प्रज्ञावर्द्धकत्वात् प्रज्ञारूपमेव 'इदम्' 'अन्नम्' 'आयुः' आयुस्थानत्वात्, 'इदम्' 'अमृतम्' प्राणाधारत्वात्, ॥ ८ ॥

हे 'कुमार!' 'ते' तव 'मेधां' पठित-श्रुत-धारणविषयां शक्तिं

एइरूप श्रुत आछे—यें, विपश्चित् देवता पुत्रेर स्थान आहरण करेन, विधाता ताहाइ धारण करेन। अतएव विपश्चित् देवता तुमि प्रसन्न हओ एइ पुरुष आपनाके देखाइया) एइ नामक पुत्रेर उत्पादक हउक।७

हे बालक! एइ प्रज्ञावर्द्धक सुतरां प्रज्ञास्वरूप अन्न, आयुर्वृद्धिकारक अतएव आयुःस्वरूप ओ इहा अमृतस्वरूप।८

७—विपश्चिद्देवता। यजुः। गर्भाधानाङ्गकर्मणि विनियोगः।

८—बालक देवता। यजुः। अङ्गुष्ठानामिकाभ्यां बालकस्य व्रीहियवचूर्णप्राशने विनियोगः।

श्विनौ देवा वाधत्तां पुष्करस्रजौ ॥ ९ ॥ यत्तेसुसीमे हृदयꣳ हितमन्तः प्रजापतौ ॥ वेदाहं मन्ये तद् ब्रह्म-माहं पौत्रमघं नि गाम्॥१०॥यत्पृथिव्या अनामृतं दिवि

'मित्रावरुणौ' अहोरात्ररूपौ देवौ 'आधत्ताम्' स्थापयताम्। यथा 'ते' 'मेधाम्' 'अग्निः' देवः 'दधातु' स्थापयतु। तथा 'ते' 'मेधां' 'पुष्करस्रजौ' अम्बरमाला-धारिणौ 'अश्विनौ' सूर्याचन्द्रमसौ 'देवौ' प्रदीप्तौ "आधत्ताम् स्थापयताम् ॥ ९ ॥

हे चन्द्र! 'यत्' 'ते' तव 'प्रजापतौ' प्रजापालके 'सुसीमे' ज्योत्स्नारूप-शीतल-द्रव्ये 'अन्तः' प्रविष्टतया "हृदयं" सारभागः 'नि' 'हितं' स्थापितमस्ति, 'अहं' 'तत्' 'वेद' जानामि, 'ब्रह्म' सर्व्वव्यापकम् इति 'मन्ये', ततश्चास्ति बालकान्तरेपि, अतः सम्भावये—'पौत्रं' पुत्रसम्बन्धि 'अघं' पापफलं शोकादिकं 'मा गाम्' नाप्नुयाम् ॥ १० ॥

হে বালক! এই আহোরাত্র দেবতারা তোমাতে মেধা স্থাপন করুন, এই অগ্নি দেবতা তোমাতে মেধা স্থাপন করুন, অম্বরমালাধারী এই প্রদীপ্ত চন্দ্র সূর্য্য দেবতারা তোমাতে মেধা স্থাপন করুন। ৯

হে চন্দ্র! প্রজাগণের পোষক ত্বদীয় শীতল জ্যোৎস্নার অন্তর্গত যে সার পদার্থ আছে, আমি তাহাকে সর্ব্বব্যাপী বলিয়া জানি, সুতরাং মদীয় বালকান্তরেও অবশ্য আছে; অতএব ভরসা করি—আমি পুত্র সম্বন্ধি পাপ-ফল (শোকাদি) প্রাপ্ত হইব না! ।১০

৯—मित्रावरुणादयो देवताः। अनुष्टुप् छन्दः। सर्पिःप्राशने विनियोगः।

१०—एषां चतुर्णां चन्द्रोदेवता। अनुष्टुप् छन्दः। शिशोः प्रसवदिन-तृतीयस्यां ज्योत्स्नायां चन्द्रदर्शने विनियोगः।

चन्द्रमसि श्रितं। वेदामृतस्याहं नाम माहं पौत्रमघ-ꣳरिषम् ॥११॥ इन्द्राग्नी शर्म यच्छतं प्रजापतो। यथा यन्न-प्रमीयेत पुत्रो जनित्र्या अधि ॥ १२॥ यददश्च

'यत्' 'अमृतं' 'पृथिव्याः,' 'न' 'दिवि' द्युलोके 'चन्द्रमसि' त्वयि 'श्रितम्' आश्रितम्, 'तत्' 'अमृतस्य' गुणम् 'अहं' 'वेद' जानामि ; अतः सम्भावये—'पौत्रम्' पुत्र-सम्बन्धि 'अघम्' पाप-फलं शोकादिकं 'मा रिषम्' नाप्नुयाम् ॥ ११ ॥

'मे' मम 'प्रजायै' पुत्राय 'इन्द्राग्नी' देवते 'शर्म' कल्याणं 'यच्छतम्' ददताम्, 'प्रजापती' प्रजापतिः प्रजानां पालको देवः तथा कुरुतात् 'यथा' असौ 'पुत्रः' 'जनित्र्याः' जनन्या, 'अधि' उत्सङ्गे (जीवितायां मातरीति भावः)'न प्रमीयेत' न म्रियात् ॥ १२ ॥

যে অমৃত পৃথিবীতে নাই=দ্যুলোকে চন্দ্রমাকে আশ্রয় করিয়া রহিয়াছে, সেই অমৃতের গুণ আমি অবগত আছি ; অতএব ভরসাকরি আমি পুত্র সম্বন্ধি পাপফল) শোকাদি প্রাপ্ত হইব না ! । ১১

ইন্দ্রাগ্নী দেবতারা আমার এই পুত্রকে কল্যাণ প্রদান করুন, প্রজাগণের পালক দেবতাও সেইরূপ করুন—যাহা-তে জননীর ক্রোড়ে (অর্থাৎ জননী জীবিতা থাকিতে) এই পুত্রের মৃত্যু না হয় ॥১২

न्द्रमसि कृष्णं पृथिव्या हृदयꣳ श्रितं । तदहं विद्वाꣳ स्तत्पश्यन् माहं पौत्र मघꣳरुदम् ॥ १३ ॥ कोसि कतमोस्येषोस्यमृतोसि ॥ आहस्पत्यं मासं प्रविशासौ ॥१४॥

'चन्द्रमसि' त्वयि 'पृथिव्याः' 'हृदयं' छायारूपम् 'कृष्णं' कृष्णवर्णं लाञ्छनं 'श्रितम्' 'आश्रितम् 'अहं' 'विद्वान्' पदार्थवित् 'तत्' लाञ्छनं 'पश्यन्' तत्वतो जानन् आशासे—'पौत्रम्' पुत्रसम्बन्धि 'अघ' पापफलं शोकादिकम् उपभुज्य 'मा रुदम्' न रुदामितार्थः ॥ १३ ॥

हे बालक ! त्वं 'कोसि' किन्नामधेयोसि ? 'कतमोसि' अकालमरणधर्मासि ? आहोस्वित् पूर्णायुर्भागसि ? न जानासि चच्छृणु—"एषोऽसि" एतन्नामकः भवसि किञ्च "अमृतोऽसि" अमरणधर्मा भवसि । अतः 'असौ' एतन्नामकः त्वं 'आहस्पतं' अहस्पतेः सूर्यस्य इदं संक्रान्ति-कृतं सौरं 'मासं' कालं "प्रविश" उपभुङ्क्ष्व ॥ १४ ॥

হে চন্দ্র! তোমাতে আশ্রিত পৃথিবীর ছায়াস্বরূপ যে কৃষ্ণবর্ণ লাঞ্ছন তাহার প্রকৃত তত্ত্ব আমি অবগত আছি; ভরসা করি—তোমাকে পুত্র সম্বন্ধি পাপ-ফল শোকাদি ভোগ করত ক্রন্দন করিতে হইবে না ॥ ১৩

হে বালক! তোমার কি নাম? তুমি কে? (অর্থাৎ অকাল-মৃত্যুর পথিক অথবা দীর্ঘায়ু)। যদি অবগত নহ, তবে শ্রবণ কর—তোমার এই নাম, তুমি পূর্ণায়ু হইবে; দিবাকরের কৃত (সৌর) এই মাসক্রমে কালাতিপাত কর ॥ ১৪

১৪—আদিত্য দেবতা। যজুঃ। নাম করণে বিনিয়োগঃ।

स त्वाह्ने परिददात्वहस्त्वा रात्रै परिददातु रात्रिस्त्वाहोरात्राभ्यां परिददात्वहोरात्रौ त्वार्द्धमासेभ्यः परिदत्ता मर्द्धमासास्त्वा मासेभ्यः परिददतु मासास्त्वर्त्तुभ्यः परिददत्वृतवस्त्वा संवत्सराय परिददतु संवत्सरस्त्वायुषे जरायै परिददात्वसौ ॥ १५ ॥ अङ्गा

'सः' अहस्पतिः देवः 'त्वा' त्वां 'अह्ने' दिवसाय 'आयुषे' आयुर्वर्द्धनार्थं 'परिददातु'; 'अहः' सच स्वकालेन संवर्द्धय 'त्वा' त्वां 'रात्रै' संवर्द्धनाय 'परिददातु'; 'रात्रिः' 'त्वा' त्वां 'अहोरात्राभ्यां' 'परिददातु'; 'अहोरात्रौ' 'त्वा' त्वां 'अर्द्धमासेभ्यः' पक्षेभ्यः 'परिदत्ताम्'; 'अर्द्धमासाः' पक्षसङ्घाः 'त्वा' त्वां 'मासेभ्यः' 'परिददतु'; 'मासाः' 'त्वा' त्वां 'ऋतुभ्यः' 'परिददतु'; 'ऋतवः' 'त्वा' त्वां 'संवत्सराय' 'परिददतु'; 'संवत्सरः' 'त्वा' त्वां 'जरायै' आजराजीवनाय 'परिददातु'; 'असौ' त्वञ्च एतन्नाम्ना प्रसिद्धो भव ॥ १५ ॥

হে বালক! এই দিবাপতি তোমার পরমায়ু বৃদ্ধির জন্য তোমাকে দিবাকালের করে সমর্পণ করুন; দিবা ঐ রূপে রাত্রির করে সমর্পণ করুন; অহোরাত্র উভয়ে একত্রিত হইয়া মাসার্দ্ধের অর্থাৎ পক্ষ কালের হস্তে সমর্পণ করুন; মাসার্দ্ধগণ মাসসংঘের হস্তে সমর্পণ করুন; মাস সকল ঋতুগণের হস্তে সমর্পণ করুন; ঋতুগণ সংবৎসর কালের হস্তে সমর্পণ করুন এইরূপে এক সংবৎসর দ্বিতীয় সংবৎসরের হস্তে দ্বিতীয় তৃতীয়ের হস্তে, তৃতীয় চতুর্থের হস্তে, এইরূপ ক্রমে জরা

১৫—আদিত्य देवता। निगदः। नामकरणे विनियोगः।

दङ्गात् सꣳभवसि हृदया दधिजायसे ॥ प्राणं ते प्राणेन सन्दधामि जीव मे याव दायुषम् ॥ १६ । अङ्गादङ्गात् सम्भवसि हृदया दधिजायसे ॥ वेदो वै पुत्र

हे पुत्र ! त्वं 'मे' मम 'अङ्गात् अङ्गात्' मदीय-समस्तावयवात् संभवसि' संभूतो भूतः ; किञ्च 'हृदयात्' मदीयात् 'अधिजायसे' उत्पन्नः ; अतः 'ते' तव 'प्राणं' 'प्राणेन' मदीयेन आत्म-प्राणविसर्जनेनापि -'संदधामि' पोषयामि—पुत्र ! 'यावदायुषं यावत् आयुषः अवधिः श्रुत्युक्तः तावत्, शतवर्षं 'जीव' ॥ १६ ॥

हे 'पुत्र !' यः त्वं 'अङ्गात् अङ्गात्' मदीयात् प्रत्यवयवात् 'सम्भवसि' समुत्पन्नोऽसि, 'हृदयात्' मदीयात् 'अधिजायसे' अतः त्वं 'वै' निश्चयं 'वेदः' वेदपाठी 'नाम' प्रसिद्धः 'असि' भवसि लोके (मम वैदिकत्व-प्रसिद्धेरिति भावः) ; 'सः' त्वं 'शरदः शतं' शतसंख्याकं शरत् कालं 'जीव' ॥ १७ ॥

কাল পর্য্যন্ত ইহারা তোমাকে পরিবর্দ্ধন করুন এবং তুমি এই নামে প্রসিদ্ধ হও ॥ ১৫

হে পুত্র ! তুমি আমার প্রত্যেক অঙ্গ হইতে সংশ্রুত হইয়াছ অর্থাৎ আমার হস্ত হইতে তোমার হস্ত হইয়াছে, আমার পাদ হইতে পাদ, মুখ হইতে মুখ, নাসিকা হইতে নাসিকা ইত্যাদি ক্রমে আমার অঙ্গ সমস্ত হইতেই ত্বদীয় সমস্ত অঙ্গ হইয়াছে। তুমি আমার আত্মা স্বরূপ হৃদয়ের ধন। অতএব আমার স্বীয় প্রাণ বিসর্জ্জনেও ত্বদীয় প্রাণ পোষণীয়—পুত্র ! যাবৎকাল মনুষ্যের আয়ু হইতে পারে (অর্থাৎ শত বর্ষ) তাবৎ জীবিত হও ॥ ১৬

১৬—অঙ্গ, পরস্য, তৎপরস্য চ—প্রজাপতিঃ দেবতা। অনুষ্টুপ্ ছন্দঃ। সূই প্রাণনে বিনিয়োগঃ।

नामासि स जीव शरदः शतम्॥ १७॥ अश्मा भव परशुर्भव हिरण्य मस्तृतं भव॥ आत्मासि पुत्र मा मृथाः स जीव शरदः शतम्॥ १८॥ पशूनां त्वा हिङ्कारेणाभिजिघ्राम्यसौ॥ १९॥

हे 'पुत्र!' 'अश्मा भव' प्रस्तरवत् दृढ़ीभव, 'परशुर्भव' परशुवत् स्वयमच्छेद्यः शत्रूणां छेदकश्च भव, 'हिरण्यं' सुवर्णमिव 'अस्तृतं' यत्नेन रक्षणीयं 'भव'; त्वम् 'आत्मासि' 'मा मृथाः' मृतुं न गच्छ, अपितु 'सः' त्वं 'शरदः शतं' कालं 'जीव'॥ १८

हे पुत्र! 'असौ' अहं 'ता' त्वां 'पशूनाम्' गवादीनाम् इव 'हिंकारेण' अव्यक्त-शब्द-पूर्वकं 'अभिजिघ्रामि' त्वदीयं मस्तकमिति यावत्॥ १९॥

हे पुत्र! যে হেতুক মদীয় প্রত্যেক অঙ্গ হইতে ত্বদীয় প্রত্যেক অঙ্গ গঠিত হইয়াছে এবং তুমি আমার হৃদয় হইতে উৎপন্ন হইয়াছ অতএব তুমি প্রসিদ্ধ বেদাধ্যায়ী হইবা, অতএব প্রার্থনা করি—তুমি শত শরৎ* আয়ু লাভ কর॥ ১৭

হে পুত্র! প্রস্তরের ন্যায় দৃঢ়কায় হও, পরশুর ন্যায় স্বয়ং অচ্ছেদ্য ও শত্রুর ছেদক হও, সুবর্ণের ন্যায় যত্নে রক্ষণীয় (অর্থাৎ গুণবান্) হও, তুমি আমার আত্মা হইতেছ—অকালে মৃত হইও না প্রত্যুত শত শরৎ জীবিত থাক॥ ১৮

হে পুত্র! এই আমি গোপ্রভৃতি পশুগণের ন্যায় অস্ফুট শব্দ পুরঃসর ত্বদীয় মস্তক আঘ্রাণ করি॥ ১৯

इति सामवेदीये मन्त्र-ब्राह्मणे प्रथम प्रपाठकस्य पञ्चमः खण्डः॥ ५॥

१७—प्रजापतिः देवता। यजुः। शिरआघ्राणे विनियोगः।

* সেকালে শরৎকালই বৎসরের প্রথম ঋতু বলিয়া স্বীকৃত হইত।

॥ अथ षष्ठः खण्डः ॥

आय मगात् सविता क्षुरेण ॥ १ ॥ उष्णेन वाय उदकेनैधि ॥ २ ॥ आपउन्दन्तु जीवसे ॥३॥ विष्णोर्दꣳष्ट्रोसि ॥ ४ ॥ ओषधे त्रायस्वैनम् ॥ ५ ॥ स्वधिते मैनꣳ

हे कुमार ! "सविता" सवितृस्वरूपः 'अयं' नापितः 'क्षुरेण' वपनास्त्रेण सह क्षुरंगृहीत्वेति यावत् 'आ अगात्' आभिमुख्येन सयत्नः आगतः ॥ १॥

हे 'वायो' देव ! अत्रैव समये 'उष्णेन' 'उदकेन' सह 'एधि' एहि ॥ २ ॥

'आपः' जलदेवता कुमारस्यास्य 'जीवसे' निरुपद्रव-जीवनाय इमम् 'उन्दन्तु' क्लेदयन्तु ॥ ३ ॥

हे क्षुर ! त्वं 'विष्णोः' देवस्य 'दंष्ट्रोसि' दन्तो भवसि ॥ ४ ॥

हे 'ओषधे !' लाजारूप ! भक्ष्यद्रव्य ! 'एनं' बालकं 'त्रायस्व' निर्भयं कुरु ॥ ५ ॥

হে কুমার ! সবিতৃ-স্বরূপ এই নাপিত ক্ষুর লইয়া আসিয়া উপস্থিত হইয়াছে ॥ ১

হে বায়ুরূপী নাপিত ! উষ্ণোদক গ্রহণ পুরঃসর আগমন কর ॥ ২

হে জলদেব ! এই কুমারের নিরুপদ্রব জীবিতার্থ এই মস্তক সিক্ত কর ॥ ৩

হে ক্ষুরদেবতা ! তুমি বিষ্ণুদেবতার দ্রংষ্টা স্বরূপ হইতেছ ॥ ৪

१—६ एषां षण्णां प्रजापतिः देवता । निगदाः । चूडाकरणाङ्गकार्येषु विनियोगः ।

हिꣳसीः॥६॥ येन पूषा बृहस्पतेर्वायोरिन्द्रस्य वावपत्॥ तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय दीर्घायुष्ट्वाय वर्चसे ॥७॥ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुष मग-

हे 'स्वधिते !' 'एनं' कुमारं' 'मा हिंसीः' हिंसां मा कुरु अस्य रक्तपातो यथा न स्यादिति भावः ॥ ६ ॥

'येन' अस्त्रेण 'पूषा' देवः 'बृहस्पतेः' देवस्य किञ्च 'वायोः' देवस्य 'च' अपिच 'इन्द्रस्य' देवस्य 'अवपत्' वपनं केशस्य कृतवान्, 'तेन' एव 'ब्रह्मणा' ब्रह्मभूतेन अस्त्रेण 'ते' तव 'जीवातवे' अरोग-जीवनाय 'दीर्घायुष्ट्वाय' बहुतरायुषे, 'वर्चसे' तेजो विवृद्ध्यर्थञ्च वपामि केशानिति शेषः ॥ ७ ॥

त्रीणि बाल-युव-स्थविरत्वानि आयूंषि त्र्यायुषं। 'जमदग्नेः' 'यत्' 'त्र्यायुषं'—'काश्यपस्य' यत् 'त्र्यायुषं'—'अगस्त्यस्य' यत् 'त्र्यायुषं' 'देवानां' यत् 'त्र्यायुषं' 'तत्' 'त्र्यायुषं 'ते' 'अस्तु' भवतु ॥ ८ ॥

হে অস্ত্র ! (লাজা, খৈ) এই বালকের ভয় অপনোদন কর ॥ ৫

হে সবিতঃ ! এই কুমারের মস্তকে যেন রক্তপাত না হয় ! ॥ ৬

পূষা দেবতা যে অস্ত্রে বৃহস্পতির, যে অস্ত্রে বায়ুর, যে অস্ত্রে ইন্দ্রের কেশ বপন করিয়াছেন—ব্রহ্মস্বরূপ সেই অস্ত্রে তোমার কেশ বপন করিতেছি—এই কার্য্যফলে তুমি দীর্ঘায়ু, নীরোগ ও তেজস্বী হইবা ॥ ৭

৩—प्रजापतिः देवता। उष्णिक् छन्दः। केशवपने विनियोगः।

स्त्यस्य त्र्यायुषं यद्देवानां त्र्यायुषं तत्ते अस्तु त्र्यायुषम्॥८॥
अग्ने व्रतपते व्रतं चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयं
तेनर्ध्यां समिदमहमनृतात् सत्य मुपैमि स्वाहा॥ ९ ॥

हे 'व्रतपते !' उपनयनादि-व्रतस्याधिपते ! 'अग्ने !' 'अहम्' 'इदं' 'व्रतं' ब्रह्मचर्य्यं 'चरिष्यामि' आचरिष्यामि, 'तत्' तस्मात् 'ते' तुभ्यं 'प्रब्रवीमि' आवेदयामि त्वत्प्रसादेन 'तत्' 'शकेयं' चरितुमिति यावत् किञ्च 'तेन' तत्फलेन 'ऋध्यासं' समृद्धियुक्तो भवेयम्—इत्यञ्च 'अनृतात्' अलीकावस्थातो निर्गत्य 'सत्यं' ब्रह्म तत्प्राप्तये धृत मेतद् व्रतम् 'उपैमि' उपगच्छामि प्राप्नोमि ॥ ९ ॥

জমদগ্নির যে অবস্থাত্রয়*—কশ্যপের যে অবস্থাত্রয়—অগস্ত্যের যে অবস্থাত্রয়—দেবগণের যে অবস্থাত্রয়, তাহা তুমি লাভ কর ॥ ৮

উপনয়ন প্রভৃতি ব্রতের অধিনায়ক হে অগ্নে ! আমি এই ব্রহ্মচর্য্য ব্রত আচরণ করিব, সেই জন্য প্রার্থনা করি—তৎপ্রসাদে যেন উহা নির্ব্বাহ করিতে পারি ! এবং ঐ ব্রত ফলে যেন ব্রহ্মবর্চ্চস লাভ করিতে পারি !—এই সমস্ত অভিপ্রায়ে বিদ্যমান অবস্থা হইতে নির্গত হইয়া সত্যস্বরূপ প্রাপ্তির জন্য এই ব্রত অবলম্বন করিতেছি ॥ ৯

৮—প্রজাপতিঃ দেবতা । যজুঃ । আশীঃকরণে বিনিয়োগঃ ।

৯—অগ্নি র্দেবতা । নিগদঃ । উপনয়ন-হোমে বিনিয়োগঃ ।

* বাল্য, যুবা, বৃদ্ধ ।

वायो व्रतपते व्रतं चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयं तेनर्ध्यां समिदमहमनृतात् सत्य मुपैमि स्वाहा ॥१० ॥ सूर्य व्रतपते व्रतं चरिष्यामि तत्ते प्रब्रवीमि तच्छकेय तेन र्ध्यां समिदमहमनृतात् सत्य मुपैमि स्वाहा ॥ ११ ॥ चन्द्र व्रतपते व्रतं चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयं तनर्ध्यां समिदमहमनृतात् सत्य मुपैमि स्वाहा ॥१२ ॥ व्रतानां व्रतपते व्रतं चरिष्यामि तत्ते प्रब्रवीमि

हे 'व्रतपते !' उपनयनादि-व्रतस्य अधिपते ! 'वायो' ! अहमित्यादि पूर्ववत् ॥ १० ॥

हे 'व्रतपते !' उपनयनादि-व्रतस्य अधिपते ! 'सूर्य्य !' अहमित्यादि पूर्ववत् ॥ ११ ॥

हे 'व्रतपते !' उपनयनादि-व्रतस्य अधिपते ! 'चन्द्र !' अहमित्यादि पुर्ववत् ॥ १२ ॥

हे 'व्रतानाम्' उपनयनादीनां कार्य्याणां 'व्रतपते !' इन्द्र ! अहमित्यादि पुर्ववत् ॥ १३ ॥

উপনয়ন প্রভৃতি ব্রতের অধিনায়ক হে বায়ো ! ইত্যাদি পূর্ব্ববৎ ॥ ১০

উপনয়ন প্রভৃতি ব্রতের অধিনায়ক হে সূর্য্য ! ইত্যাদি পূর্ব্ববৎ ॥ ১১

উপনয়ন প্রভৃতি ব্রতের অধিনায়ক হে চন্দ্র ! ইত্যাদি পূর্ব্ববৎ ॥ ১২

१०—वायु देवता । निगदः । उपनयन-होमे विनियोगः ।
११—सूर्यो देवता । निगदः । उपनयन-होमे विनियोगः ।
१२—चन्द्रो देवता । निगदः । उपनयन होमे विनियोगः ।

तच्छकेयं तेनदध्यां समिदमह मनृतात् सत्य मुपैमि स्वाहा ॥ १३ ॥ आगन्त्वा समगन्महि प्रसुमर्त्तं युयोतन॥ अरिष्टाः सञ्चरेमहि स्वस्ति चरतादयम् ॥१४॥ अग्निष्टे हस्त मग्रहीदयमा हस्तमग्रहीन्मित्र स्त्वमसि

हे अग्न! 'आगन्त्वा' ब्रह्मचर्य्ये आगमनशीलेन अनेन वटुना सह वयम् आचार्य्यादयः त्वां 'समगन्महि' उपास्महे। त्वं हि एनं वालकं 'सुमर्त्तं' शोभनमनुष्यं 'युयोतन' ब्रह्मचर्य्ये नियुक्तं कुरु। 'अरिष्टाः' विघ्नाः अस्य वयमेव 'सञ्चरेमहि' उपभुञ्जामः 'अयं' वालकः "स्वस्ति" सुखं 'चरतात्' भुञ्जतात् ॥१४॥

हे वालक! 'ते' तव 'हस्तम्' इदम् मया गृहीतम् 'अग्निः' देवः 'अग्रहीत्' गृहीतवान्, शरणं दत्तवानित्यर्थः मद् ग्रहणेन तस्यैव ग्रहणं सिद्ध मिति चाशयः, पथा सविता देवः 'हस्तम्' 'अग्रहीत्'; तथैव अर्य्यमा' देवश्च "हस्तम्" 'अग्रहीत्'। वालक! ब्रह्मचर्य्या वस्थः 'त्वं' 'कर्मणा' अहिंसादि-

সমস্ত ব্রতের শ্রেষ্ঠ-উপনয়ন প্রভৃতি ব্রতের অধিনায়ক হে ইন্দ্র! ইত্যাদি পূর্ব্ববৎ ॥ ১৩

হে অগ্নে! ব্রহ্মচর্য্য ব্রতে প্রবৃত্ত এই বালকের সহিত আমরা (আচার্য্য প্রভৃতি) তোমার উপাসনা করিতেছি, তুমি এই বালককে এই ব্রত নির্ব্বাহে উপযুক্ত কর; এই বালকের বিঘ্ন সকল আমরাই ভোগ করিতে স্বীকৃত আছি, এ বালক সুখে কালযাপন করুক ॥ ১৪ ॥

১৩—इन्द्रो देवताः। निगदः उपनयन-होमे विनियोगः।

१४—अग्नि र्देवता। अनुष्टुप् छन्दः। आचर्य्य पठने विनियोगः।

कर्मणाग्नि राचार्यस्तव ॥ १५ ॥ ब्रह्मचर्य मागा मुपमानयस्व ॥ १६ ॥ को नामास्यसौ नामास्मि ॥१७ देवस्य ते सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णोहस्ता-

व्यवहारेण 'मित्रः' सर्व्वेषां मित्रभूतः 'असि' 'अग्निः', देवः अयम् 'तव' 'आचार्य्यः' वेदोपदेशकः इति जानीहि, मामग्नि-तुल्यमव गच्छेति वा भावः ॥ १५ ॥

हे गुरो ! अहम् इदानीम् 'ब्रह्मचर्य्यम्' व्रतम् 'आगाम्' स्वीकृतवान्, अथ 'मा' माम् 'उपनयस्व' आत्म-समीपं प्रापय ॥१६ ॥

हे कुमार ! 'कः नाम' किन्नामधेयः त्वम् 'असि' भवसि ?

হে বালক ! এই আমি তোমার হস্ত গ্রহণ করিলাম (অর্থাৎ শরণ দান দিলাম) ; আমার এই হস্ত গ্রহণেই তোমার অগ্নি দেবতা-কর্ত্তৃক হস্ত-গ্রহণ সিদ্ধ হইল এবং ইহাতেই সবিতৃ-দেব-কর্ত্তৃকও হস্ত গ্রহণ সম্পন্ন হইল ও অর্য্যমা দেবতা-কর্ত্তৃকও হস্ত গৃহীত হইল। হে বালক ! এই ব্রহ্মচর্য্য অবস্থাতে সমস্ত জীবের প্রতি অহিংসা ভাব ধারণ করিবা, সকল জীবই তোমার মিত্র জানিবা এবং আমাকে (আচার্য্যকে) অগ্নি তুল্য সম্মানাস্পদ জ্ঞান করিবা। (অথবা এই অগ্নিকেই আচার্য্য বলিয়া জানিবা)।১৫

হে গুরো ! আমি সম্প্রতি ব্রহ্মচর্য্য ব্রত গ্রহণ করিলাম, অতঃপর আপনি আমাকে উপনয়ন (আত্ম সমীপে নয়ন) করুন।১৬

হে কুমার ! তুমি কিন্নামধেয় ? অর্থাৎ তোমার নাম কি ?—হে গুরো ! আমার এই নাম।১৭

১৫—অগ্নি র্দেবতা। যजुः। हस्त-ग्रहणे विनियोगः।

१६—अग्निर्देवता। यजुः। ब्रह्मचारि-प्रार्थने विनियोगः।

भ्याᳬ हस्तं गृह्णाम्यसौ ॥ १८ ॥ सूर्यस्याहृत मन्वावर्त्त-स्वासौ॥१९॥ प्राणानां ग्रन्थि रसि मा विस्रसोन्तक इदं ते परिददाम्यसुम्॥२०॥ अहुरइदं ते परिददाम्यसुम्॥२१

हे गुरो ! अहं 'असौ नाम' एतन्नामकः 'अस्मि' भवामि ॥ १७ ॥

'असौ' देवशर्मन् ! 'ते' तव 'हस्तं' 'सवितुर्देवस्य' 'प्रसवे' अनुज्ञाते सति 'अश्विनोः' देवयोः 'बाहुभ्यां' 'पूष्णः' पूष-देवस्य 'हस्ताभ्यां' 'अहं' 'गृह्णामि' ॥ १८ ॥

असौ' हे देवशर्मन् ! त्वं 'सूर्य्यस्य' 'आहृतम्' प्रदक्षिणम् 'आ' आभिमुख्येन 'वर्त्तस्व' कुरु ॥ १९ ॥

हे 'नाभे' ! त्वं 'प्राणानां' प्राणवायुादि-वाहि-नाड़ीनां 'ग्रन्थिः' मिलनस्थानं 'असि' ; हे 'अन्तक !' 'इदं' बालक-शरीरं 'ते' तुभ्यं 'परि' सर्व्वतः 'ददामि' शरणापन्नं करोमीति भावः ॥ २० ॥

हे 'अहुरे !' वायो ! 'इदं' बालक-शरीरं 'ते' तुभ्यं 'परि' सर्व्वतः 'ददामि' शरणापन्नं करोमि ॥ २१ ॥

হে দেব শর্ম্মন্ ! আমি সবিতা দেবতার অভিপ্রায়ানুসারে অশ্বি নামক দেব দ্বয়ের সাহায্যে, পূষা দেবতার হস্ত দ্বারা তোমার হস্ত গ্রহণ করিতেছি।১৮

হে দেব শর্ম্মন্ ! ভালরূপে সূর্য্যকে প্রদক্ষিণ কর।১৯

হে নাভে ! তুমি প্রাণ বায়ু প্রভৃতি বায়ু সমস্তের গ্রন্থি

१७—अग्नि र्देवता । यजुः । प्रश्न प्रतिवचने विनियोगः ।
१८—अग्नि र्देवता । यजुः । पाणि-स्वीकरणे विनियोगः ।
१९—सूर्य्यो देवता । यजुः । सूर्य्य-प्रदक्षिणे विनियोगः ।
२०—यमो देवता । यजुः । नाभि-स्पर्शने विनियोगः ।
२१—वायुर्देवता । यजुः । नाभ्युत्सर्पणे विनियोगः ।

क्रव्यन इदं ते परिददाम्यमुम् ॥२२॥ प्रजापतये त्वा परिददाम्यसौ ॥ २३ ॥ देवाय त्वा सवित्रे परिददाम्यसौ ॥ २४ ॥ ब्रह्मचार्यस्यसौ ॥ २५ ॥ समिधमाधेह्य-

हे 'क्रव्यन !' क्रव्यानी ! 'इदं' बालक-शरीरं 'ते' तुभ्यं 'परि' सर्व्वतः 'ददामि' शरणापन्नं करोमि ॥ २२ ॥

'असौ' देवशर्मन् ! 'त्वा' त्वां 'प्रजापतये' देवाय 'परि ददामि' सर्व्वतः शरणापन्नं करोमि ॥ २३ ॥

'असौ' देवशर्मन् ! 'त्वा' त्वां 'सवित्रे' 'देवाय' 'परि ददामि' सर्व्वतः शरणापन्नं करोमि ॥ २४ ॥

'असौ' देवशर्मन् ! 'ब्रह्मचारी' 'असि' भवसि—इति मनसि स्वीकुरु इति प्रेषणम् ॥ २५ ॥

স্বরূপ, মিলন স্থান হইতেছ—হে অন্তকারিন্ ! এই বালক-শরীর তোমার করে সর্ব্বপ্রকারে সমর্পণ করিতেছি, রক্ষাকর ।২০

হে বায়ো ! এই বালককে সর্ব্বপ্রকারে তোমার শরণাপন্ন করিতেছি ।২১

হে কৃশানো ! এই বালককে সর্ব্ব প্রকারে তোমার শরণাপন্ন করিতেছি ।২২

হে দেবশর্ম্মন্ ! তোমাকে সর্ব্ব প্রকারে প্রজাপতি দেবতার শরণাপন্ন করিতেছি ।২৩

হে দেবশর্ম্মন্ ! তোমাকে সর্ব্ব প্রকারে সবিতা দেবতার শরণাপন্ন করিতেছি ।২৪

হে দেবশর্ম্মন্ ! তুমি ব্রহ্মচারী হইতেছ—ইহা তুমি অবগত হও ।২৫

---

২২ – অগ্নি র্দেবতা । যজুঃ । হৃদয়-স্পর্শনে বিনিয়োগঃ ।

২৩ – প্রজাপতি র্দেবতা । যজুঃ । দক্ষিণাংশ-স্পর্শনে বিনিয়োগঃ ।

২৪ – সবিতা দেবতা । যজুঃ । বামাংশ-স্পর্শনে বিনিয়োগঃ ।

২৫ – অগ্নি র্দেবতা । যজুঃ । আচার্য্য-কথনে বিনিয়োগঃ ।

पोशान कर्म कुरु मा दिवा स्वाप्सीः ॥ २६ ॥ इयं दुरुक्तात्परिबाधमाना वर्णं पवित्रं पुनती म आगात् ॥ प्राणापानाभ्यां बलमाहरन्ती स्वसा देवी सुभगा मेखलेयम् ॥२७॥ ऋतस्य गोप्त्री तपसः परस्वी व्रतो रक्षः

हे आयुष्मन् ! 'समिधम्' समित् काष्ठम् 'आधेहि' आधानं कुरु अग्नाविति शेषः, प्रत्यह मिति विवेकः । 'अपः' 'अशान' आचमनोदकं प्रतिकर्म्म प्राशय । 'कर्म्म' गुरु-सेवां 'कुरु' नित्य मिति भावः । 'दिवा' अहनि 'मा स्वाप्सीः' शयनं मा कार्षीः ॥ २६ ॥

'इयं' 'मेखला' 'दुरुक्तात्' व्रात्य-नाम-दुरपवाद वचनात् 'परिबाधमाना' अपसारयन्ती 'वर्णं' ब्राह्मणाख्यं 'पवित्रं' द्विजत्वेन विशुद्धं 'पुनती' कृतवती सती 'मे' ममान्तिके 'आ अगात्' आगतवती; 'इयं' मेखला 'प्राणापानाभ्यां' शरीरस्थ-वायुभ्यां 'बलम्' 'आहरन्ती' सम्पादयन्ती सती 'सुभगा' कल्याणी 'स्वसा देवी' भगिनी इव भवति ॥ २७ ॥

হে আয়ুষ্মন্ ! প্রতি দিন তুমি অগ্নিতে সমিৎ প্রক্ষেপ করিবা অর্থাৎ নিত্য হোম করিবা। সতত আচমন করিবা অর্থাৎ শুচি থাকিবা। গুরুর সেবায় রত থাকিবা। কদাপি দিবসে নিদ্রিত হইবা না।২৬

ব্রাত্য রূপ দুরপবাদের বাধক রূপী এই মেখলা বিপ্র-

२६—अग्नि र्देवता । यजुः । उपदेश-कर्म्मणि विनियोगः ।

२७—अग्नि र्देवता । भुरिक् छन्दः । मेखला परिधापने विनियोगः ।

सहमाना अरातीः॥ सा मासमन्त मभि पर्येहि भद्रे धर्त्तारस्ते मेखले मा रिषाम॥ २८॥ तत्सवितुर्वरे-

हे 'मेखले!' त्वं 'ऋतस्य' ब्रह्मचर्य्य-लक्षणस्य सत्यस्य धर्मणः 'गोप्त्री' रक्षयित्री असि। 'तपसः' वेदाध्ययनस्य 'परस्त्री' सर्व्वस्वभूता असि। 'रक्षः' रक्षसः विघ्नकारिणः 'घ्नती' विनाशयित्री असि। 'अरातीः' अरातीन् शत्रून् सहमाना अभिभवन्ती। 'सा' त्वं 'समन्तं' समन्तात् 'मा' माम् 'अभि' लक्ष्य 'पर्य्येहि' आगच्छ। हे 'भद्रे! कल्याणि! 'ते' तव 'धर्त्तारः' धारणकारिणः वयं 'मा रिषाम' केनापि मा हिंसिष्म॥२८

'सवितुः' जगत्-प्रसवितुः 'देवस्य' सर्व्वत्र द्योतमानस्य 'तत्' 'भर्गः' तेजः 'धीमहि' ध्यायामः चिन्तयामः। कस्य देवस्य? কুলোদ্ভব বালকদিগকে দ্বিজরূপে পবিত্র করিতে সকলের নিকটে আগমন করিয়া থাকেন। এই মেখলা প্রাণাপান নামক শরীরস্থ বায়ু দ্বারা বল আহরণ করত কল্যাণী ভগিনীর ন্যায় উপকারিণী হইয়া থাকেন।২৭

হে মেখলে! তুমি ব্রহ্মচর্য্য রূপ সত্য ধর্ম্মের রক্ষয়িত্রী হইতেছ, বেদাধ্যয়ন রূপ তপস্যার প্রধান উপকরণ হইতেছ, বিঘ্নকারিগণের বিনাশ কারিণী হইতেছ। শত্রু বর্গের অভিভব কারিণী হইতেছ। তুমি সর্ব্ব প্রকারে আমার মঙ্গল লক্ষ্য করত আগমন কর। হে কল্যাণি! তোমার ধারণকারী আমি যেন কোন রূপ ক্লেশ না পাই।২৮

সেই জগৎ-প্রসবিতা, সর্ব্বত্র দ্যোতমান বস্তুর (গুরু

২৮—मेखला देवता। उष्णिक् छन्दः। मेखला-परिधापने विनियोगः।

रण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥२९
भूर्भुवस्वरोꣳ ॥ ३० ॥ सुश्रवः सुश्रवसं मा कुरु
यथा त्वꣳ सुश्रवः सुश्रवा देवेष्वेव नहꣳ सुश्रवः सुश्रवा
इत्याह—'यः' देवः 'नः' अस्माकं 'धियः' बुद्धीः 'प्रचोदयात्' प्रकृष्टं यथा स्यात् तथा चोदयति प्रेरयति ॥२९॥

'भूः' भूलोकः। 'भुवः' अन्तरीक्षलोकः। 'स्वः' द्युलोकः। एषु त्रिषु लोकेष्वेव 'ओं' आत्मा व्यापकः॥३०॥

हे 'सुश्रवः' सुष्ठु श्रवो यशः यस्य तथाविध ! दण्ड ! 'मा' 'मां' सुश्रवसं 'कुरु'। हे 'सुश्रवः ! त्वं यथा 'देवेषु' दीप्यमानेषु पदार्थसमूहेषु 'सुश्रवाः' सुविख्यातः, हे 'सुश्रवः !' 'ब्राह्मणेषु' मध्ये 'अहम्' अपि 'एवं' 'सुश्रवाः' 'भूयासम्' ॥ ३१

कर्त्तृक उपदिष्ट) तेजेर चिन्ता करि। ये द्योतमान आमादेर बुद्धि वृत्तिके उत्कृष्ट पथे प्रेरण करेन।२९

एई भूलोक। एई भुव (अन्तरीक्ष) लोक। एई स्वः (स्वर्ग अथवा द्यु) लोक।—एई लोकत्रयेतेई ওँ (आत्मा) सर्व्वव्यापक रूपे भासमान रहियाछेन।३०

हे प्रथित-कीर्त्ते दण्ड ! आमाके प्रथित-कीर्त्ति कर। हे प्रथित-कीर्त्ते ! दीप्यमान पदार्थ समस्तेर मध्ये तुमि येरूप सुविख्यात, हे सुविख्यात ! आमिह येन ब्राह्मणगणेर मध्ये सेइरूप सुविख्यात हई।३१

२९—अग्नि देवता। गायत्रीच्छन्दः। उपदेश कर्म्मणि विनियोगः।

३०—अग्नि देवता। यजुः। उपदेश कर्म्मणि विनियोगः।

ब्राह्मणेषु भूयासम् ॥ ३१ ॥ अग्नये समिध माहार्षं बृहते जातवेदसे ॥ यथात्व मग्ने समिधा समिध्यस्येव महमायुषा मेधया वर्च्चसा प्रजया पशुभि र्ब्रह्मवर्चसेन धनेनान्नाद्येन समेधिषीय स्वाहा ॥ ३२ ॥ पुनर्मामै-त्विन्द्रियं पुनरायुः पुनर्भगः ॥ पुनर्द्रविण मैतु मा पुन

'बृहते' महते 'जातवेदसे' जातप्रज्ञाय 'अग्नये' 'समिधम्' 'आहार्षम्' आहृतवान् । हे 'अग्ने' ! 'त्वं' 'यथा' 'समिधा' अनया 'समिध्यसि' 'एवं' 'अहम्' 'आयुषा' 'मेधया' 'वर्च्चसा' तेजसा, 'प्रजया' पुत्रादिलक्षणेन, 'पशुभिः' गवादिभिः 'ब्रह्म वर्च्चसेन', 'धनेन', 'अन्नाद्येन' अन्न-प्रभृति-भोग्य-वस्तु-समस्तेन 'सम्' सम्यक् 'एधिषीय' वृद्धियुक्तः स्याम् ॥३२॥

रेतःस्कन्दनादि-दोषेण यत् 'इन्द्रियम्' अपचितम् 'तत्' 'पुनः' 'माम्' 'ऐतु' सम्यक् आगच्छतु । तथाच यत् 'आयुः' क्षीणम्, तत् 'पुनः' ऐतु । किञ्च तेनैव कर्म्मणा यः 'भगः' ऐश्वर्य्यं

जात-प्रज्ञ, अति प्रवृद्ध, अग्निर उद्देशे समिৎ আহরণ করা হইয়াছে। হে অগ্নে ! তুমি যেরূপ এই সমিৎ প্রদানে সমৃদ্ধ হইয়াছ আমিও সেইরূপ আয়ু, মেধা, বর্চ্চ, তেজ, প্রজা, পশু, ব্রহ্মবর্চ্চস, ধন, অন্নপ্রভৃতি সর্ব্বপ্রকারে বৃদ্ধিযুক্ত হই ।৩২

রেতঃ-স্কন্দনাদি দোষে যে ইন্দ্রিয় অপচিত হইয়াছে, তাহা আমার প্রত্যাবৃত্ত হউক। আমার যাবৎ আয়ু ক্ষীণ হইয়াছে, তৎ সমস্ত প্রত্যাবৃত্ত হউক। যাহা কিছু মানাদি নষ্ট হইয়াছে, তাহা প্রত্যাবৃত্ত হউক। যে সমস্ত দ্রব্যাদি অপব্যয়িত হইয়াছে, তাহা প্রত্যাবৃত্ত হউক। অধিক কি,

---

३१—दण्डी देवता । पङ्क्तिच्छन्दः । दण्ड ग्रहणे विनियोगः ।

३२—अग्नि र्देवता । यजुः । समित्-प्रक्षेपे विनियोगः ।

ब्राह्मण मैतु मा ॥३३॥ पुनर्मनः पुनरात्मा म आगात् पुनश्चक्षुः पुनः श्रोत्रं म आगात् ॥ वैश्वानरो अदब्धः स्तनूपा अन्त स्तिष्ठतु मे मनोऽमृतस्य केतुः साहा ॥ ३४ ॥

मानादिलक्षणं नष्टं, स च 'पुनः' ऐतु। अपि हि तथा दुराचारे प्रवृत्ते यत् 'द्रविणम्' व्ययितं, तच्च 'पुनः' 'मा' माम् 'ऐतु' आगच्छतु। किमधिकेन यदि कथमपि 'ब्राह्मणम्' ब्राह्मण्य सपि क्षयितं स्यात्, तदपि 'मा' माम् 'पुनः' 'ऐतु' आगच्छतु ॥ ३३ ॥

'मे' मम: 'मनः' 'पुनः' आगात्' असत्पथात् प्रत्यागतं स्वस्थं भूतम्। 'चक्षुः' अपि 'पुनः' आगात्। 'मे' मम 'श्रोत्रम्' अपि 'पुनः' आगात्। शरीरस्थाना मिन्द्रियादीनां 'अदब्धः' अहिंसिता, 'तनूपाः' शरीर-रक्षकः, 'वैश्वानरः' आभ्यन्तरिकोऽग्निः 'अन्तः' यथास्थानं तिष्ठतु। 'मे' मम 'मनः' 'अमृतस्य' आत्मनः 'केतुः' प्रज्ञारूपः स्यात् ॥ ३४ ॥

ऐ अपकार्य्ये यदि कोन प्रकारे आमार ब्राह्मण्यও क्षयित हईयाथाके ताहाও आमार निकटे पुनरागमन करुक।৩৩

आमार मन असत् पथ हईते प्रत्यावृत्त हईया स्वस्थ भाव अवलम्बन करुक, चक्षुरिन्द्रियও असत् पथ हईते प्रत्यावृत्त हउक, श्रवणेन्द्रियও असत् पथ हईते प्रत्यावृत्त हउक। शरीरस्थ इन्द्रिय समस्तेर सहायकारी, शरीर-रक्षक, वैश्वानर अग्निও यथास्थाने स्थित हउन। आमार मन, अमृत पुरुष सेई परमात्मार पताका स्वरूप हउक अर्थात् प्रज्ञारूपे परिणत हउक।৩৪

॥ इति सामवेदीये मन्त्र-ब्राह्मणे प्रथम प्रपाठकस्य षष्ठः खण्डः समाप्तः ॥

३३, ३४—अग्निर्देवता। निगदौ। इन्द्रियापचारे प्रायश्चित्त-कर्म्मणि समित् प्रक्षेपे।

॥ अथ सप्तमः खण्डः ॥

ये अप्स्वन्तरग्नयः प्रविष्टा गोह्य उपगोह्यो मरूको मनोहाः ॥ खलो विरूजस्तनूदृष्टिरिन्द्रियहा अति तांसृजामि ॥१॥ यदपां घोरं यदपां क्रूरं यदपामशान्तमतितत्सृजामि ॥२॥ यो रोचनस्तमिह गृह्णामि तेनाहं

'अप्सु अन्तः' इह जलमध्ये 'गोह्यः' १ 'उपगोह्यः' मरूकः, ३ 'मनोहाः' ४ 'खलः' ५ 'विरूजः' ६ 'तनूदृष्टिः' ७ 'इन्द्रियहाः, ८ इति 'ये' अष्टविधाः 'अग्नयः' शरीर-नष्ट-कारिण स्तेजसः 'प्रविष्टाः' स्थिताः, 'तान्' अग्नीन् 'अतिसृजामि' अतिशयेन वर्जयामि ॥ १ ॥

किञ्च 'अपाम्' उदक-जातीनां 'यत्' 'घोरं', 'अपां' 'यत्' 'क्रूरं', 'अपां' 'यत्' 'अशान्तम्'—एतत् त्रिविधम् अहितकरं गुणं 'तत्' तदपि 'अति सृजामि' अतिशयेन वर्जतायि ॥ २ ॥

'यः' अग्निः 'रोचनः' शरीर-दीप्तिकरः 'इह' जले 'तम्'

এই জলের মধ্যে যে গোহ্য১ উপগোহ্য২, মরূক৩, মনোহা৪, খল৫, বিরূজ৬, তনূদৃষ্টি৭, ইন্দ্রিয়হা৮—নামক শরীর-হানি-কারক অষ্ট প্রকার অগ্নি থাকে; তৎ সমস্তকে আমি বিদূরিত করিতেছি।১———এবং জলের ঘোর নামক যে দোষ, ক্রূর নামক যে দোষ, অশান্ত নামক যে দোষ তাহাও বিদূরিত করিতেছি।২

১, ২—অনয়ীঃ অগ্নির্দেবতা। ত্রিपदी। সম্ভ্রাবর্ত্তন জলাভিমন্ত্রণে বিনিয়োগঃ।

मामभिषिञ्चामि ॥ ३ ॥ यशसे तेजसे ब्रह्मवर्चसाय बलायेन्द्रियाय वीर्यायान्नाद्याय रायस्पोषाय त्विष्या अपचित्यै ॥ ४ ॥ येन स्त्रिय मकृणुतं येनाया मृषतꣳ सुरां ॥ येना ऽर्चानभ्यषिञ्चतं येनेमां पृथिवीं महीं । यद्वान्तदश्विना यशस्तेन मा मभिषिञ्चतम् ॥५॥ उद्यन्

एव 'गृह्णामि' अनन्तरञ्च 'अहम्' ब्रह्मचारी 'तेन' एव जलेन 'माम्' आत्मानं अभिषिञ्चामि ॥ ३ ॥

किमर्थं मित्याचष्टे— 'यशसे', 'तेजसे', ब्रह्मवर्चसाय,' 'बलाय', 'इन्द्रियाय', 'वीर्य्याय', 'अन्नाद्याय' अन्नादि-लाभाय, रायस्पोषाय' धनस्य पोषणाय, 'त्विषे' कान्त्यै, 'अपचित्यै' सम्मान-प्राप्तये च (पूर्व्वेण सम्बन्धः) ॥ ४ ॥

हे 'अश्विनौ' अश्वाविव वेगगमनशालिनौ ! 'येन' कर्म्मणा 'स्त्रियं' स्त्रीजातिं 'अकृणुतम्' भोग्यत्वेन निरूपितवन्तौ— 'येन' कर्म्मणा 'अपाम्' 'सुराम्' 'ऋषतम्' गमयितवन्तौ, अपः सुरात्वेन भोग्यान् कृतवन्तौ—'येन' कर्म्मणा 'अर्चान्' देवनान् भोग्यान् कृतवन्तौ—किमधिकेन, 'येन' 'इमां' 'महीं' महतीं

যে অগ্নি, শরীরের দীপ্তিকারী—তাহাই এই জলে গ্রহণ করিতেছি এবং আমি (ব্রহ্মচারী) সেই নির্দোষ জলে আপনাকে সিঞ্চন করিতেছি ।৩——ইহা দ্বারা আমার যশ, তেজ, ব্রহ্মবর্চ্চস, বল, ইন্দ্রিয়-সামর্থ্য, বীর্য্য, অন্নাদি, ধন-সঞ্চয়, কান্তি ও সম্মান লাভ হইবে ।৪

অশ্বের ন্যায় বেগ-গমনশীল হে সূর্য্য ও চন্দ্র ! তোমরা

৩,-৪ – অনয়োः অগ্নির্দেবতা । যজুः । সমাবর্ত্তনাভিষেকে বিনিয়োগः ।
৫—অশ্বিনौ দেবতে । षड्ष्टका-महापङ्क्तिश्छन्दः । समावर्त्तनाभिषेके विनियोगः ।

भ्राजभृष्टिभि रिन्द्रो मरुद्भिरस्यात् प्रातर्यावभिर-स्यात्॥ दशसनिरसि दशसनिं मा कुर्वा त्वा विशाम्या माविश॥ ६॥ उद्यन् भ्राजभृष्टिभि रिन्द्रो

सुविपुलां 'पृथिवीं' समस्तामेव 'अभि अभिषिञ्चतम्' तर्पितवन्तौ। 'यां' युवयोः तादृशं 'यत्' कर्म्म 'तत्' 'यशः' इत्याचक्षते। 'तेन' 'यशसा' 'माम्' 'अभिषिञ्चतम्' मां यशस्विनं कुरुतम्-इति प्रार्थये॥ ५॥

'इन्द्रः' (इदि परमैश्वर्य्ये तेजोरूप-परमैश्वर्य्य-योगादिन्द्र आदित्य उच्यते) आदित्यः 'उद्यन्' उदीयमानः त्वं 'भ्राजभृष्टिभिः' दीप्तदृष्टिभिः 'मरुद्भिः' देवैः सह 'अस्यात्' क्षिप्त 'प्रातर्यावभिः' प्रातराशभोक्तृभिः अन्यान्यैश्च देवैः सह 'अस्यात्'। त्वं 'दशसनिः' दशानां सनिः सम्भजनीयः 'असि' भवसि, 'मा' मामपि तथैव 'दशसनिं' दशजनानां भजनीयं कुरु; अहम् 'आविशामि' उपगच्छामि अर्थित्वेन त्वामिति शेषः, त्वञ्च 'मा' माम् 'आविश' फलदात्रत्वेनेति भावः॥ ६॥

যে প্রকারে স্ত্রীজাতিকে পুরুষ জাতির ভোগ্য বলিয়া স্থির করিয়া দিয়াছ, যে প্রকারে জলকেও সুরারূপে ভোগ্য করিয়াছ, পাশক (পাশা) গুলিকে যে প্রকারে ভোগ্য করিয়াছ, অধিক কি—এই সুবিপুল সমস্ত মহীমণ্ডলই যে প্রকারে পরিতৃপ্ত করিতেছ—তোমাদের সেই ক্রিয়াকে যশ বলা যায়, আমাকে সেইরূপ যশ প্রদান করিয়া যশস্বী কর।৫

হে আদিত্য! তুমি দীপ্ত-দৃষ্টি মরুদ্গণের সহিত এবং

৫—৮ ত্র্যচাণাং সূর্য্যো দেবতা। নিগদঃ। সূর্য্যোপস্থানে বিনিয়োগঃ।

मरुद्भि रस्यात् सा तपनेभि रस्यात् शतसनि रसि शतसनिं कुर्वा त्वाविशाम्या माविश ॥ ७ ॥ उद्यन् भ्राजभृष्टिभि रिन्द्रो मरुद्भि रस्या त्सायंयावभि रस्यात् ॥ सहस्रसनि रसि सहस्रसनिं मा कुर्वा त्वा विशाम्या माविश ॥ ८ ॥ चक्षुरसि चक्षु-ष्ट्वमस्यव

इन्द्र इत्यादि पूर्व्ववत् । त्वं 'शतसनिः' शतानां सनिः सम्भजनीयः 'असि' भवसि, 'मा' मामपि तथैव "शतसनिं" शतजनानां भजनीयं कुरु । अहमित्यादि पूर्व्ववत् ॥ ७ ॥

पुनरिन्द्र इत्यादि पूर्व्ववत् । 'सहस्रसनिः' सहस्राणां बहूनाम् अनन्तानां वा सनिः सम्भजनीयः 'असि' 'मा' मामपि तथैव 'सहस्रसनिं' बहुनां भजनीयं कुरु । अहमित्यादि पूर्व्ववत् ॥ ८ ॥

প্রাতরাশ-ভোজী অন্যান্য দেবগণেরও সহিত উদিত হইয়া দেদীপ্যমান রহিয়াছ । তুমি যেরূপ দশজনের পূজনীয়, আমাকেও সেইরূপ দশজনের পূজনীয় কর। আমি যাচক রূপে তোমার নিকটে উপস্থিত হইয়াছি, তুমি দাতৃরূপে আমার নিকটে উপস্থিত হও। ৬

হে আদিত্য ! ইত্যাদি পূর্ব্ববৎ। তুমি যেরূপ শত শত জনের পূজনীয় আমাকেও সেইরূপ শত শত জনের পূজনীয় কর। আমি যাচক ইত্যাদি ।৭

হে আদিত্য ! ইত্যাদি পূর্ব্ববৎ। তুমি যেরূপ সহস্র জনের পূজনীয়, আমাকে ও সেইরূপ সহস্র সহস্র জনের পূজনীয় কর আমি যাচক ইত্যাদি । ৮

मे पाप्मानं जहि सोम त्वा राजाऽवतु नमस्ते स्तु मा-
माहिꣳसीः ॥ ९ ॥ उदुत्तमं वरुण पाश मस्मद् वाधमं
विमध्यमꣳ श्रथाय ॥ अथादित्य व्रते वयन्तवानागसो

हे सूर्य्य! त्वं "चक्षुः" जगतां चक्षुभूतः 'असि' भवसि, किञ्च 'चक्षुष्ट्वं' यत् चक्षुधर्म्मं तदपि त्वमेवासि। 'मे' मम 'पाप्मानम्, 'अवजहि' नाशय। 'सोमः' चन्द्रः देवः 'राजा' ब्राह्मणानाम् ओषधीनाञ्च 'अवतु' आप्यायनं करोतु। 'ते' तुभ्यं 'नमः' 'अस्तु'। 'मा' मां 'मा हिंसीः' नष्टं मा कुरु ॥ ९ ॥

हे 'वरुण'! 'अस्मत्' अस्माकं 'उत्तमं' उत्तमाङ्गे कण्ठादौ स्थितं 'पाशम्' 'उत्श्रथाय' ऊर्द्ध्वत एव शिथिलीकुरु; 'मध्यमं" मध्यमाङ्गे कण्ठादौ च स्थितं पाशम् 'वि' श्रथाय विशेषेण शिथिली कुरु; 'अधमम्' अधमाङ्गे पादादौ च स्थितम्

হে সূর্য্য! তুমি জগতের চক্ষুস্বরূপ হইতেছ এবং চক্ষুর যে শক্তি তাহাও তুমিই। আমার পাপ নষ্ট কর। প্রদীপ্ত এই চন্দ্রমা তোমাকে স্বীয় শীত কিরণদানে পরিতৃপ্ত করুন। তোমাকে নমস্কার। কেহ যেন আমাকে নষ্ট করিতে না পারে!। ৯

হে বরুণ দেবতা! আমার উত্তমাঙ্গে কণ্ঠাদিতে অবস্থিত পাশ, শিথিল করিয়া উপর হইতেই খসাইয়া দাও; মধ্যমাঙ্গে কটি দেশাদিতে অবস্থিত পাশ শিথিল করত বিযুক্ত কর; অধমাঙ্গে পাদাদিতে অবস্থিত পাশও শিথিল করিয়া নীচভাগ

९ – सूर्य्यो देवता। अनुष्टुप् छन्दः। सूर्य्योपस्थाने विनियोगः।

अदितये स्याम ॥ १० ॥ श्रीरसि मयि रमस्व ॥ ११ ॥ नेत्रौ स्थो नयतं माम् ॥ १२ ॥ गन्धर्वो-स्युपाव उपना-

'अव' अथाय नीचत एव शिथिलीकुरु ॥ किञ्च हे 'आदित्य' अदितेः अखण्डस्यांश ! 'अथ' अनन्तरं पाशमुक्ताः सन्तः 'वयं' 'तव' 'व्रते' कर्मणि 'अनागसः' निरपराधिनः यथा 'स्याम' तथा कुरु । किमर्थमित्याह—'अदितये' अखण्ड-फल-लाभाय ॥ १० ॥

हे माले ! त्वं 'श्रीः' शोभा 'असि' अतः त्वाम् प्रार्थये—'मयि' मम शरीरे 'रमस्व' विहर अवस्थानं कुरु ॥ ११ ॥

हे उपानहौ ! युवां 'नेत्रौ' नेत्ररूपौस्थौ 'मां' देशाद् देशान्तरं सुखेन 'नयतम्' प्रापयतम् ॥ १२ ॥

हे दण्ड! त्वं गन्धर्वः रक्षणसमर्थः 'असि' भवसि, 'माम्' হইতেই স্খলিত করিয়া দাও। হে অখণ্ডাংশ ! আমরা পাশমুক্ত হইয়া তোমার সন্তোষবিধান কার্য্যে অখণ্ড ফল লাভের নিমিত্ত যাহাতে নিরপরাধী থাকি এরূপ কর। ১০

হে মালা দেবতা ? তুমি শোভাস্বরূপা হইতেছ, অতএব প্রার্থনা করি—মদীয় শরীরে অবস্থান কর। ১১

হে উপানৎ দেবতারা ! তোমরা নয়নকারিণী হইতেছ (অর্থাৎ তোমাদের সাহায্যে কণ্টকাদিতে আবৃত দুর্গম পথেও অনায়াসে যাওআ যায়) আমার গমনে সুখকারিণী হও। ১২

১০—वरुणो देवता । त्रिष्टुप् छन्दः । मोचणे विनियोगः ।

११—श्री देवता । यजुः । स्रग्वस्त्रने विनियोगः ।

१२—उपान हे वता । यजुः । उपानत्-परिधाने विनियोगः ।

मव ॥ १३ ॥ यक्षमिव चक्षुषः प्रियो वो भूयासम् ॥१४॥ ओष्ठापिधाना नकुली दन्तपरिमितः पविः ॥ जिह्वे मा विह्वलो वाचं चारु माद्येह वादय ॥१५॥ वनस्पते 'उपाव' समीपमागत्य रक्ष । पुनः कथयति—'माम्' 'उपाव' समीपमागत्य रक्ष, सततं सर्व्वतः रक्षेति यावत् ॥ १३ ॥

हे परिषदः ! अहं 'वः' युष्माकं 'चक्षुषः' 'यक्षम्' यक्षः 'इव' 'प्रियः' 'भूयासम्', यक्षः यथा सर्व्वेषां प्रियः, तथा अहमपि भूयासम्-इति प्रार्थये ॥ १४ ॥

हे 'जिह्वे' ! त्वं 'नकुली' नकुलीवत् 'ओष्टापिधाना' ओष्ठाभ्यामाच्छादिता नकुली यथा विले प्रच्छन्ना भवति क्षणेनात्मप्रकाशं करोति पुनः क्षणेन प्रच्छन्ना भवति तथास्वभावा, अहञ्च 'विह्वलः' कामादिरिपुसाहचर्य्यात् 'पविः' वज्रः 'दन्तपरिमितः' अपि भवति, अशुद्धादिरूपः उच्चारित-वागपि वज्रा-

हे दण्डदेवता ! तुमि विपदे रक्षा करिते समर्थ हईतेछ अतएव तोमाके गन्धर्व्व बला याय, तुमि आमार निकटे सतत अवस्थिति कर । १३

हे सभासद् महोदयगण ! आमि आपनादेर चक्षे येन यक्षेर न्याय प्रिय हई ! ।१४

हे जिह्वे ! सर्व्वदाई अधर ओ ओष्ठेर अभ्यन्तरे अवस्थित तुमि नकुलीर न्याय हईतेछ, आमरा कामादि रिपुर वशे सर्व्वदाई विह्वल, दन्त साहाय्ये उच्चारित कोन कोन

१३—दण्डो देवता । यजुः । दण्ड ग्रहणे विनियोगः ॥

१४—परिषदो देवताः । यजुः । वीक्षणे विनियोगः ।

१५—जिह्वा देवता । अनुष्टुप् छन्दः । मुखापिधाने विनियोगः ।

वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ॥ गोभिः सन्नद्धो असि वीड्यस्व ॥ आस्थाता ते जयतु जेत्वानि ॥ १६ ॥

त्मको भवतीति भावः । अतः प्रार्थ्यते—'अद्य' 'इह' कर्मणि मां 'चारु' शोभनं 'वाचं' वचनं 'वादय' ॥ १५ ॥

हे 'वनस्पते !' वनस्पतिर्वृक्षः तदवयवेन काष्ठेन निर्मित हे रथ ! त्वं 'हि' निश्चयं 'वीड्वङ्गः' दृढाङ्गः 'भूयाः' किञ्च 'अस्मात्' अस्माकं 'सखा' सखि-रूपः सन् 'प्रतरणः' त्राता 'भूयाः' अपिच 'सुवीरः' वीरश्रेष्ठानां वाहकः 'भूयाः' । 'गोभिः' गोचतुष्टयैः 'सन्नद्धः' संयुक्तः 'असि', स त्वं 'वीड्यस्व' इहैव किञ्चित् क्षणं तिष्ठ । 'ते' तव 'आस्थाता' आरोही 'जेत्वानि' जेतुमुपयुक्तानि परपक्षीयसेनादलानि 'जयतु' ॥ १६ ॥

वाक्यও वज्रस्वरूप प्रकाश पाय ; अतएव प्रार्थना करि—अद्य এই কার্য্যে আমাকে নির্দ্দোষ বাক্যের বক্তা কর। ১৫

হে বন্য-কাষ্ঠ-নির্ম্মিত রথ ! তুমি নিশ্চয়ই দৃঢ়াঙ্গ, আমাদের সখারূপে বিপদে ত্রাতা হও ও বীর-শ্রেষ্ঠদিগের বহনকারী হও। গোসঙ্ঘে সংযুক্ত হইয়াছ ; কিঞ্চিৎক্ষণ এই স্থলেই স্থিতি কর ; তোমার আরোহী রথী মহোদয় পরপক্ষীয় সেনাদলকে জয় করুন। ১৬

॥ इति सामवेदिये मन्त्र-ब्राह्मणे प्रथम प्रपाठकस्य सप्तमः खण्ड समाप्तः ॥

१६—रथी देवता । त्रिष्टुप् छन्दः । रथाभिमर्शनारोहणे विनियोगः ।

अथ अष्टमः खण्डः ।

इमा मे विश्वतो वीर्यो भव इन्द्रश्च रक्षतं ॥ पूषञ्स्त्वं पर्यावर्त्तयानष्टा आयंतुनो गृहान् ॥ १ ॥ इमा मधुमती र्मह्यमनष्टाः पयसा सह ॥ गाव आज्यस्य मातर इहेमाः सन्त भूयसीः ॥ २ ॥

'विश्वतोवीर्य्यः' सर्व्वतोबलशाली 'भव' ; 'मे' मम 'इमाः' गाः सन्ति, 'तं' ताः 'च' 'रक्ष' हे 'पूषन्!' देव! 'त्वं' एनाः 'पर्य्यावर्त्तय' प्रत्यावर्त्तस्व यथा च इमाः 'अनष्टाः सत्यः 'नः' अस्माकं 'गृहान्' 'आयन्तु' प्रत्यागच्छन्तु तथा कुरु ॥ १ ॥

हे इन्द्र! 'इमाः' 'मधुमतीः' गाः 'पयसा' दुग्धेन 'सह' 'अनष्टाः' यथा स्यु स्तथा 'मह्यं' प्रत्यर्पय किञ्च 'इमाः' 'भूयसीः' भूयस्यः बहवः 'गावः' 'इह' गृहे 'आज्यस्य' 'मातरः' जनयित्र्यः 'सन्तु' इति प्रार्थये ॥ २ ॥

ইন্দ্র তুমি বলশালী হও, আমার এই গোগুলি রক্ষা কর। হে পূষন্! তুমি ইহাদিগকে গোষ্ঠ হইতে প্রত্যাবৃত্ত করাইবা, যাহাতে ইহারা নির্ব্বিঘ্নে আমাদের ভবনে প্রত্যাগমন করিতে পারে!। ১।

হে ইন্দ্র! এই মধুমতী গো-সকল, যাহাতে অপরিমিত দুগ্ধবতী হয়—গোষ্ঠহইতে এইরূপ করিয়া আনয়ন কর এবং

१, २—इन्द्रोदेवता। अनुष्टुप्छन्दः। गोचारणत्यागे विनियोगः।

गवाꣳ स्नेष्मासि गावो मयि श्लिष्यंतु ॥ ३ ॥ संग्रहण संगृहाण ये जाताः पशवो मम ॥ पूषैषाꣳ शर्म यच्छतु यथा जीवन्तो अप्ययात् ॥ ४ ॥ भुवन मसि साहस्र मिन्द्राय त्वा स्नो ददात् ॥ अक्षतम·

हे वत्स! त्वं 'गवां' 'स्नेहा' स्नेहकः 'असि' अतः त्वां प्रार्थये— 'गावः' इमाः 'मयि' मद्गृहे श्लिष्यन्तु स्वच्छन्दास्तिष्ठन्तु ॥ ३ ॥

हे सङ्ग्रहण! 'मम' गृहे 'ये' 'पशवः' गावः, 'जाताः', तान् 'सङ्गृहाण' रक्षां कुरु, 'एषां' गवां, 'पूषा' आदित्यः 'शर्म' कल्याणं, तथा यच्छतु' ददातु, यथा 'जीवन्तः' प्राणान् धारयन्तः एते, 'अप्ययात्' समयं नियुः [एते आयुष्मन्तो भूया स्तरिति भावः] ॥ ४ ॥

এই বহুতর গোবৃন্দ এই পরিবারে অপরিমিত ঘৃতের জনয়িত্রী হউক। ২।

হে বৎসেরা! তোমরা গো-সকলের স্বচ্ছন্দ আলিঙ্গনের বস্তু হইতেছ, অতএব প্রার্থনা করি—এই গোগুলি যেন ত্বৎ প্রসাদে মদীয় গৃহকে স্বচ্ছন্দ আলিঙ্গন করে অর্থাৎ এই গৃহেই যেন চিরকাল সুখে বাস করে। ৩।

হে সঙ্গ্রহণ! (পূষাদেব) আমার গৃহে যে সকল পশুরা হইয়াছে, তাহাদিগকে রক্ষা কর, এবং এই পশুদিগের (গোদিগের) পূষাদেব (আদিত্য) এরূপ কল্যাণ করুন, যাহাতে ইহারা প্রাণ ধারণ করতই সময়াতিবাহন করুক, অর্থাৎ

৩—স্নেহা দেবতা। যজুঃ। গীবৎসনিरीक्षणे विनियोगः।

৪—অনুষ্টুপ্ছন্দঃ। পূষাদেবতা। বিজয়ন-স্নানে বিনিয়োগঃ।

रिष्टमिलादं ॥ ५ ॥ गोपोषण मसि गोपोषस्य ग्रिषे-
गोपोषाय त्वा ॥ सहस्रपोषणमसि सहस्र पोषस्य-

हे स्वधिते! अस्त्र! त्वं 'भुवनं' भुवनोपकारकम्, 'असि' भवसि, अतएव पशूनां साहस्रं बाहुल्यनिमित्तं, 'असि', किञ्च 'सुमीदेवः, 'त्वा' त्वां, 'इन्द्राय' 'अदात्' दत्तवान्, कथम्भूतं त्वां?—'अक्षतं' अभग्नं, नूतनं वा, 'अरिष्टं' विघ्ननाशनं, 'इलादं' अन्नदातारं ॥ ५ ॥

हे स्वधिते! 'गोपोषणं' गवां पुष्टिकरं, 'असि', किञ्च गोपोषस्य गवां पुष्टेः 'ग्रिषे' वृद्धि-कर्त्ता 'असि' अतएव 'त्वा' त्वां गोपोषाय' गवां पुष्टयर्थं, गृहीतवान् इति सम्बन्धः—अपिच यतस्त्वं 'सहस्र पोषणं' बहूनां पशूनां पुष्टि निमित्तं 'असि' 'सहस्र पोषस्य' बहूनां पुष्टेः 'ग्रिषे' वृद्धिकर्त्ता, 'असि' अतस्त्वं

इहारा याहाते आयुष्मान हउक एइरूप कल्याण प्रदान कर ॥ ४

हे अस्त्र! तुमि भुवन मात्रेर उपकारक हइतेछ, अतएव पशुदिगेर बाहुल्य विधाने हेतुभूत तुमिइ हइतेछ, एवं अक्षत, विघ्ननाशन एवं अन्नदाता हइतेछ, देख—एइ निमित्तइ तोमाके सुम नामक देवता इन्द्रेर प्रति समर्पण करियाछेन ॥ ५

हे अस्त्र! तुमि गो-सकलेर पुष्टिकारी हइतेछ, आर तुमि गो-सकलेर पुष्टिर उत्तरोत्तर वृद्धिकारी हइतेछ, अतएव गो-सकलेर पुष्ट्यर्थ तोमाके ग्रहण करियाछि;

५—स्वधिति र्देवता। गायत्रीच्छन्दः वत्सस्य कर्णयोः स्थिद्र-करणे विनियोगः।

शिषे सहस्र पोषाय त्वा ॥६॥ लोहितेन स्वधितिना मिथुनं कर्णयोः कृतं ॥ यावतीनां यावतीनां व ऐषमो लक्षण मकारिषं ॥ भूयसीनां भूयसीनां व उत्तरा मुत्तराꣳ समां कृयासं ॥ ७ ॥ इय न्तन्ती गवां माता

'त्वा' त्वां 'सहस्र पोषाय' बहूनां पशूनां पुष्टि-वृद्ध्यर्थं, गृहीतवान् इत्यनुसञ्जनीयम् ॥ ६ ॥

हे गावः ! 'यावतीनां यावतीनां' यावत् सङ्ख्यकानां, 'वः' युष्माकं, 'लोहितेन' औदुम्बरेण, 'स्वधितिना' असिना, 'मिथुनं कर्णयोः' द्वयोः कर्णयोः, 'कृतं' वेदविहितं, 'लक्षणं' छिद्रं 'ऐषमः' अस्मिन वर्षे, 'अकारिषं' कृतवानस्मि, 'भूयसीनां भूयसीनां' तेभ्योपि विपुलानां, 'वः' युस्माकं, 'उत्तरामुत्तरां' उत्तरस्मिन्२ 'समां' वर्षे, 'कृयासम्' करिष्यामि ॥ ७ ॥

इयं 'तन्ती' वत्सबन्धनरज्जुः, 'गवां' 'माता' पालयित्री,

एवं तुमि अनेक पशुदिगेर पुष्टिर निमित्त हइतेछ ও অনেক পশুদিগের পুষ্টি-বর্দ্ধনকারী হইতেছ, অতএব আমিহ অনেক পশুদিগের পুষ্টি বৃদ্ধি করিবার নিমিত্ত তোমাকে গ্রহণ করিয়াছি ॥ ৬

হে গো-সকল ! এ বৎসরে তোমাদিগের যত গুলির কর্ণদ্বয়েতে লোহিত অসিদ্বারা বেদ-বিহিত ছিদ্র করিয়াছি, উত্তরোত্তর বর্ষেতে তাহাহইতে অধিক গুলির ঐ রূপে ছিদ্র করিব ॥ ৭

---

६ – देवतादयः पूर्व्ववत् ।

७—गौर्देवता । त्रिपादनुष्टुप्छन्दः । क्रम-लक्षणस्य गोरनुमन्त्रणे विनियोगः ।

सवत्सानां निवेशनी ॥ सा नः पयस्वती दुहा उत्तरा मुत्तराꣳ समां ॥ ८ ॥

अस्याः परिबद्धा हारादि प्रापकत्वेन गवां पालन कर्त्तृत्वम् । 'सवत्सानां' वत्ससहितानां गवां 'निवेशनी' प्रापयित्री, दोहन समये मातृजङ्घायां वत्सस्य बन्धनात्, 'सा' तन्ती, 'नः' अस्माकं 'उत्तरा मुत्तरां' उत्तरोत्तरम्, 'समां' वर्षं, 'पयस्वती' क्षीरवती सती, अर्थात् इष्टफलदायिनी सती, 'दुहा' कामानां प्रपूरयित्री स्यादित्यर्थः ॥ ८ ॥

এই রজ্জু গো-সকলের মাতাস্বরূপ হইতেছে এবং বৎসের সহিত গোদিগের একত্রকারিণী হইতেছে, সেই রজ্জু উত্তরোত্তর বর্ষে ক্ষীরবতী হইয়া অর্থাৎ ক্ষীরবতী গো-সংযুক্ত হইয়া আমাদিগের কামনা সমুদয়ের পূরণকর্ত্রী হউক ॥ ৮

॥ इति सामवेदीये मन्त्र-ब्राह्मणे प्रथमप्रपाठकस्य अष्टमः खण्डः । समाप्तश्चायम्प्रपाठकः ॥

—:०:—

८—तन्ती देवता । अनुष्टुप्छन्दः । बद्धवत्सस्यानुमन्त्रणे विनियोगः ।

॥ अथ द्वितीयः प्रपाठकः ॥

तत्र

प्रथम-खण्डः

ओं ॥* यः प्राच्यां दिशि सर्पराज एष ते बलिः॥ यो दक्षिणस्यां दिशि सर्पराज एष ते बलिः ॥ १ ॥ यः प्रतीच्यां दिशि सर्पराज एष ते बलिः ॥ य उदीच्यां

'प्राच्यां दिशि, पूर्व्वस्यां दिशायां 'यः सर्पराजः' यः सर्पश्रेष्ठः वर्त्तमे, 'एष' मदत्तो 'बलिः' सखल् 'ते' तव ग्रहणीयो भवतु ; 'दक्षिणस्यां दिशि' 'यः सर्पराजः' इत्यादेरपि पूर्व्ववदर्थो वेदितव्यः ॥ १ । २ ॥

पूर्व्वदिग व्यापिया वर्त्तमान, हे सर्पराज! तोमाकें एई बलि प्रदत्त हइल, दक्षिणदिग व्यापिया वर्त्तमान हे सर्पराज! तोमाकें एई बलि प्रदत्त हइल, पश्चिमदिग व्यापिया वर्त्तमान हे सर्पराज! तोमाकें एई बलि प्रदत्त हइल, उत्तर

* "अथातः श्रवणा कर्म" इति गोभिलः ३, ७।

१—४—एषां चतुर्णां सर्पोदेवता। निगदः। सर्पबलि-कर्म्मणि विनियोगः। "उदकं निनीय बलिं निनयति यः प्राच्यां दिशि" इत्यादि गो० ३, ७।

दिशि सर्पराज एष ते बलिः॥ २॥ नमः पृथिव्यै दृं
ष्टाय विश्वभृन्मा ते अन्ते रिषाम॥ संहृतं मा विवधी
र्विहृतं मा भिसम्बधीः॥ ३॥ सोमो राजा सोमस्तं
बो राजा सोमो स्माकं राजा सोमस्य वयं स्मः॥

हे 'विश्वभृत्'! अग्ने,! तुभ्यं 'नमः' किम्भूताय—'पृथिव्यै' पृथिव्याः 'दृंष्टाय' प्रधान भूताय, 'ते अन्ते' तव समीपे, 'मा रिषाम' मा विनश्येम॥ किञ्च 'संहृतं' सङ्गतं, अस्माभिसह विविधं 'मा वधीः' मा स्फोटयिष्यसि, 'विहृतं' वियुक्तमपि 'मा अभिसम्बधीः' मा अभिनैषी रित्यर्थः॥ ३॥

'सोमोराजा' ब्राह्मणानां सोमोदेवः राजा, 'सोमस्तम्बो-राजा' दर्भस्तम्बानां सोमो देवः राजा; 'सोमो अस्माकं राजा' स्पष्टं, 'सोमस्य' एतन्नामकस्य 'वयं' उपासकाः, 'स्मः' भवामः;॥ দিক্ ব্যাপিয়া বর্ত্তমান হে সর্পরাজ! তোমাকে এই বলি প্রদত্ত হইল॥ ১ ২

হে বিশ্ব সংসারের ভরণকারী অগ্নিদেব! তোমাকে নমস্কার করি, তুমি পৃথিবীর রক্ষণে প্রধানভূত হইতেছ, তোমার নিকটে থাকিয়া যেন বিনাশপ্রাপ্ত না হই, এবং আমাদিগের সহিত যাহারা একত্র হইয়া আছে তাহাদিগকে বিযুক্ত করিওনা এবং যাহারা বিযুক্ত হইয়া আছে তাহাদিগকে পুনঃ সংযুক্ত করিতে আনিওনা॥ ৩

ব্রাহ্মণদিগের সোমদেব রাজা হইতেছেন, দর্ভস্তম্বেরও সোমদেব রাজা হইতেছেন, সোমদেবই আমা-

अहि जम्भन मसि सौमस्तं वꣳ सौमस्तंव महि जम्भन मसि ॥ ४ ॥ याꣳ संधाꣳ समधत्त यूयꣳ सप्तऋषिभिः सह ॥ ताꣳ सर्पा मात्यक्रामिष्ट नमो वो अस्तु मा नो हिꣳसिष्ट ॥५॥ मा न स्तोके तनये मा न आयौ मा नो

হে সোমস্তম্ব ! সোমদেবতাকোদ্ভূর্ভ স্তম্ব ! 'অহি জম্ভনং' অহীনাং স্তম্ভনং, 'অসি' ভবসি, দ্বিত্বং বচনং মাদরার্থং ॥৪॥

হে সর্পাঃ ! 'যাং সন্ধাং' সন্ধিব্যবস্থাং, 'সপ্তভিঃ ঋষিভিঃ সহ যূয়ং সমধত্ত' সম্যক্ ধৃতবন্তঃ, 'তাং' ব্যবস্থাং 'মাত্যক্রামিষ্ট' মা অতিক্রমত, 'নমোবোঽস্তু' 'বঃ' যুষ্মাকং 'নমঃ' অস্তু, 'নঃ' অস্মান্, 'মা হিংসিষ্ট' যূয়ং ন হিংসত ॥ ৫ ॥

হে ভগবন্ 'রুদ্র' ! 'নঃ' অস্মাকং, 'তোকে' পৌত্রাদি বিষয়ে, তনয়ে পুত্রে, 'আয়ৌ' আয়ুষি, 'গোষু, অশ্বেষু' 'মা রীরিষঃ'

দিগের রাজা হইতেছেন, এই সোমদেবেরই আমরা উপাসক হইতেছি, হে সোমাধিদৈবত দর্ভস্তম্ব ! তুমি সর্প সকলের স্তম্ভনস্বরূপ হইতেছ, তুমিই সর্প সকলের স্তম্ভন স্বরূপ হইতেছ ॥ ৪

হে সর্প সকল ! তোমরা সাতজন ঋষির সহিত সন্ধি পূর্ব্বক যে ব্যবস্থা ভালরূপে গ্রহণ করিয়াছিলে, সে ব্যবস্থা অতিক্রমণ করিও না, তোমাদিগকে আমরা নমস্কার করি, তোমরা আমাদিগকে হিংসা করিও না ॥ ৫

৫—অগ্নির্দেবতা । অনুষ্টুপ্ ছন্দঃ । ভূমিজপে বিনিয়োগঃ ।

"ভূমৌন্যস্যৌ পাণীপ্রতিষ্ঠাপ্য নমঃ পৃথিব্যাদ্যত্যেতং মন্ত্রং জপতি" গো০ ৩, ১ ।

मानो गोषु मानो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भामिनो वधी र्हविष्मन्तः सदमित्त्वा हवामहे ॥८॥ शतायुधाय शतवीर्याय शतोतये भिमाति षाहे ॥ शतं

हिंसां मा कृथाः, किञ्च 'नः' अस्माकं 'वीरान्' विक्रान्तान् मनुष्यान्, 'भामिनः' तेजस्विनः, 'मा वधीः' हिंसां मा कृथाः 'हविष्मन्तः' यजन्तो वयं 'त्वा' त्वां, 'हवामहे' आह्वयामः, सदमीति पादपूरणे, पुनः पुनः 'मा नो' वचनं प्रार्थनादौ आवश्यकत्वादृत्तम् ॥ ८ ॥

हे 'इन्द्र'! 'नः' अस्माकं 'शरदः' अनुपाय-हेतुत्वात् शत्रुभूतायाः 'शतं' शतसंख्यां 'अजीजनत्' अजीजात् अभ्यवीभवत्, सुखेन अतिवाहयतीति स्पष्टार्थः, किञ्च 'यः' इन्द्रः 'नः' 'दुरितानि' दुरुत्तराणि व्यसनानि 'विश्वा' विश्वानि स-

हे ऐश्वर्य्यशालिन् रुद्र! आमादेर पुत्रपौत्र प्रभृतिर एवं गो अश्व प्रभृतिर परमायु विषयें हिंसा करिओ ना, एवं आमादिगेर वीर ओ तेजस्वी मनुष्य सकलके नष्ट करिओ ना, यजनशील आमरा तोमाके आह्वान करि ॥ ८ ॥

हे इन्द्र! आमादिगेर शत शत शरत् ऋतु, सुखे

६—सोमसर्पौ देवते। निगदः। भूमिजपे विनियोगः।

"दर्भस्तम्बं समूलं प्रतिष्ठाप्य सोमीराजेत्यतं मन्त्रं जपति" गो० ३, ७।

७—सर्पो देवता। अनुष्टुप् छन्दः। भूमिजपे विनियोगः।

"यां सत्यां समधत्ते तिच" गो० ३,७।

८—रुद्रो देवता। जगतीच्छन्दः। होमकर्म्मणि विनियोगः।

"जहयात् ** मानस्तोक इति द्वितीयाम्" गो० ३, ८।

यो नः शरदो अजीजा दिन्द्रो नेष दतिदुरितानि विश्वा ॥९॥ ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति ॥ तेषां यो अज्यानि मजीजि माबहा स्तस्मै

र्व्वाणि, 'अतिनेषत्' अतिशयेन विनाशं नीतवान्, तस्मै इत्यम्भूताय इन्द्राय,—'शतायुधाय', बहु-प्रकारक-वज्राय, 'शतवीर्य्याय' बहुबलाय, 'शतोतये' बहु-प्रकारक-पालनाय, 'अभिमाति' अभिमानात्मकमहत्त्वम् आदत्ते, 'षाहे' स्वाहा, हविस्तदीयः स्यात् ॥ ९ ॥

हे विश्वेदेवाः !' 'ये' 'चत्वारः पथयः' प्रन्थानः, 'देवयानाः' स्वर्गमार्गाः 'अन्तरा' मध्ये, 'द्यावापृथिव्योः' स्वर्ग-मर्त्त्ययोः, 'वियन्ति' विविधं गच्छन्ति, 'तेषां' चतुर्णाम्मध्ये 'यः' देवः, 'अज्यानि' अमृतत्व-प्राप्ति-हेतुं, 'अजीजि' क्षेमेण अभीष्टदेशं,

अतिविहित करिया थाक एवं यें इन्द्र आमादिगेर दुरित सकल एकवारे विनाश करेन्, एवं यिनि विविध आयुध-विशिष्ट, बहुबलशाली, विविध प्रकार पालनकर्त्ता हइया अभिमान करितेछेन्, ताँहाके एई मदीय हवि प्रदत्त हइल ॥ ९ ॥

हे विश्वेदेवा-देव सकल ! द्युलोक ओ मर्त्त्यलोकेर मध्ये विविध प्रकार यें चारिटी देवमार्ग आछे, उहार मध्ये अमृत लाभेर हेतुभूतओ कल्याणप्रद विधाय अभीप्सित,

---

९—इन्द्रो देवता । पंक्तिश्छन्दः । आज्यहोमे विनियोगः ।

"आज्यपूर्णिभिरभि जुहोति शतायुधायेत्येतत् प्रभृतिभिः" गो० ३, ८ ।

नो देवाः परिदत्तेह सर्वे ॥ १० ॥ ग्रीष्मो हेमन्त उत-
नो वसन्तः शरद्वर्षाः सुवितन्नो अस्तु ॥ तेषां वयमुत्तमे-
शत-शारदानां निवात एषां मभये स्याम ॥११॥ यत-

'आवहाः' नायकः, 'तस्मै' देवाय, 'इह नः' इहलोके स्थितान् अस्मान्, 'परिदत्त' समर्पयत, ॥ १० ॥

'ग्रीष्मः' ग्रीष्मऋतुः, 'हेमन्तः' हेमन्तऋतुः, 'उत' अपिच, 'वसन्तः' वसन्तऋतुः, 'शरत्' शरत्ऋतुः, 'वर्षा' वर्षाऋतुः, 'नः' अस्माकम्, एते निर्दिष्टाः षट् ऋतवः! यूयं मया प्रार्थ्यन्ते, यत इदं अस्माकं कर्म्म, तत्, युष्मत्-प्रसादेन 'सुवितत' सुखम् 'अस्तु' भवतु, किञ्च यत्र कर्म्मणि ते ऋतवः 'शत-शारदानां' शतः प्रवर्त्तनेन बहु-शरद्-विशिष्टानाम्, 'तेषां' 'एषां' ऋतूनां 'अभये' निर्भये, 'निवाते' आश्रये, 'स्याम' निर्भया भवेम ॥ ११ ॥

स्थानে, যে দেব লইয়া যাইতেছেন, সেই দেবেতে ইহলোক স্থিত আমাদিগকে সমর্পণ করুন, এই হবি আপনাতে সমর্পিত হইল ॥ ১০ ॥

গ্রীষ্ম ঋতু, হেমন্ত ঋতু, এবং বসন্ত ঋতু ও শরৎ ঋতু, বর্ষা ঋতু, আমাদিগের সম্বন্ধে বর্ত্তমান এই সকল ঋতুগণ! তোমরা আমাদিগকর্ত্তৃক প্রর্থিত হইতেছ—আমাদিগের অনুষ্ঠিত এই কর্ম্ম তোমাদিগের প্রসাদে উত্তম রূপে সম্পন্ন হউক ;

১০—विश्वे देवा देवताः । त्रिष्टुप्छन्दः । आज्यहोमे विनियोगः ।

११— ऋतवो देवताः । त्रिष्टुप्छन्दः । आज्यहोमे विनियोगः ।

[illegible] परिवत्सराय संवत्सराय कृणुता बृहन्नमः। [illegible] वयꣳ सुमतौ यज्ञियानां ज्योग्जीता अहता-स्याम ॥ १२ ॥ भद्रान्नः श्रेयः समनैष्ट देवास्त्वया वसेन

हे स्तोतारः ! येभ्यः मनुष्य-पितृ-देव-सम्बन्धि-तत्तत्-वत्सर-विशेष-कालेभ्यः इदं हविः 'बृहत् इत्' बृहदेव, यूयं 'कृणुत' कुरुत, तस्मै 'वत्सराय परिवत्सराय संवत्सराय' तत्तत्-काल-विशेषाय 'नमः' 'तेषां' वत्सराणां 'यज्ञियानां' यज्ञहेतुभूतानां, 'सुमतौ' शोभनायां बुद्धौ, वर्त्तमानाः 'वयं' 'ज्योक्' चिरं, 'जीताः' दुरितानां जेतारः सन्तः, 'अहताः' अपीड़िताः, 'स्याम' भवेमेति प्रार्थयते ॥ १२ ॥

हे 'देवाः !' ब्रीहिमयाः, 'त्वा' त्वां, वयं 'सशीमहि'

আমরা একশত শরৎ ঋতু অর্থাৎ শতসংবৎসর যেন তোমাদিগের আশ্রয়ে নির্ভয়ে থাকি, [অর্থাৎ রোগ-শোকাদি-শূন্য হইয়া যেন শতায়ু হই] ॥ ১১ ॥

হে স্তাতৃগণ ! তোমরা মনুষ্য, পিতৃ, দেব সম্বন্ধি যথাক্রমে বৎসর, পরিবৎসর, সংবৎসর নামক যে সকল কাল বিশেষে এই হবি প্রশস্ত করিয়া থাক, সেই সকল বৎসরাদি কাল বিশেষকে নমস্কার করি আমরা যজ্ঞ সকলের জনকস্বরূপ সেই সকল বৎসরাদির অধীন হওতঃ সুমতিশালী হইয়া, চিরকাল যেন দুরিত জয়ী হইয়া রোগাদিদ্বারা অসংস্পৃষ্ট হইয়া থাকি ॥ ১২ ॥

১২—সংবৎসরী দেবতা। ত্রিষ্টুপ্ছন্দঃ। আজ্যহোমে বিনিয়োগঃ।

मशीमहि त्वा ॥ स नो मयोभूः पितेवा विश्स्व शं तो काय तन्वे स्योन स्वाहा ॥ १३ ॥ अमोसि प्राण तदृतं

भुञ्जीमहि, 'त्वया' 'अवसेन' पाथेयभूतेन, नवं नवं वर्षशतं प्रापिताः वयं सश्रीका भवेमेति भावः, किञ्च यूयं 'नः' अस्मान्, 'श्रेयः' एतन्नवान्न-प्राशन-प्रभव मारोग्यं 'समनैष्ट' सम्यक् प्रापयत, किम्भूतान् नः? 'भद्रान्' युष्मत्-प्रसादेन नवान्न-प्राशन-योग्यान्, अपिच हे व्रीहे! अस्माभिः यस्त्वं प्राशनः 'सः' व्रीहिमयो देवः, 'नः' अस्मान्, 'आविशस्व' प्रविश, कथम्भूतस्त्वम्? 'पितेव मयोभूः' पिता, इव सुख-जनकः, 'तोकाय' 'शं' सुखरूपो भव 'तन्वै' शरीराय, 'स्योनः' सुखकरो भव ॥ १३ ॥

हे 'प्राण!' त्वं, 'असः' गतिशीलः, 'असि' भवसि, 'तत्' एतत्, 'ऋतं' सत्यं, 'ब्रवीमि' व्यक्तं वच्मि, 'हि' यस्मात्, 'असाः' गति-शीलाः सन्तः 'सर्व्वं' अशेषं भूतजातम् 'अनु प्रविष्टः'

হে ব্রীহিরূপিন্ দেব! তোমাকে আমরা যেন ভক্ষণ করি, তুমি পাথেয় স্বরূপ, তোমাকর্ত্তৃক নূতন নূতন বর্ষ সকল প্রাপ্ত হইয়া আমরা সকলে যেন শ্রীবিশিষ্ট হই, এবং তোমরা আমাদিগকে এই নবান্ন প্রাশনের আরোগ্য রূপ ফল ভাল-রূপে প্রদান কর; আমরা তোমাদিগের প্রসাদেই নবান্ন প্রাশন করিতে যোগ্য হইতেছি, অপিচ——

হে ব্রীহিরূপিন্ দেব! যেহেতুক তুমি আমাদিগের ভক্ষ্য হইতেছ অতএব আমাদিগের অন্তরে প্রবেশ কর, তুমি

১৩—ব্রীহ্যো দেবতাः। त्रिष्टुप्छन्दः। ব্রীহি- হবি-প্রাশনে বিনিয়োগः।

ब्रवीम्यमा ह्यसि सर्वं मनु प्रविष्टः । स मे जराꣳ रोग-मप मृज्य शरीरा दपाम एधि मा मृथान इन्द्र ॥१४॥ अग्निः प्राश्नातु प्रथमः स हि वेद यथा हविः । शिवा

'असि' भवसि, 'सः' प्राणमयो देवः 'मे' मम, 'शरीरात्' वपुषः 'जरां' शरीर-परिणाम-रूपां, 'रोगं' दुःखजनकं वपुषि आगन्तुकं ज्वरादि, 'अपमृज्य' अपनीय, 'अपामः' निर्दुष्ट-गतिकः सन्, 'एधि' भव, हे 'इन्द्र !' सर्व्वैश्वर्य्यशालिन् ! प्राण ! 'नः' अस्मान्, 'मा मृथाः' मरणं देहाद्वियोगरूपं, मा कृथा इत्यर्थः ॥ १४ ॥

'अग्निः !' जाठरोऽग्निः, 'प्रथमः' अग्रे, 'हविः' 'प्राश्नातु' प्राशनं करोतु 'हि' यतः—'स' देवः, 'यथा' येन रूपेण, तद्धविः

পিতার ন্যায় সুখ-জনক হইতেছ, তুমি আমাদিগের পৌত্রাদির নিমিত্ত কল্যাণরূপী হইয়া উদিত হও, আমাদিগের শরীরের নিমিত্তও সুখ-কারক হও অর্থাৎ কোন রোগাদির জনক হইয়া কষ্ট দিও না ॥ ১৩ ॥

হে প্রাণ ! তুমি গতিশীল হইতেছ, ইহা আমি সত্যই বলিতেছি, যেহেতু তুমি সমুদয় ভূতবর্গেতে গতিশীল হইয়াই অনুপ্রবেশ করিয়াছ, সেই প্রসিদ্ধ প্রাণরূপী দেব আমার শরীর হইতে জরা ও রোগ সকলকে অপনয়ন করত শরীরে নির্দ্দোষ-গমন-শীল হইয়া অবস্থিতি করুন, হে প্রাণ ! তুমি আমাদিগের দেহ-বিয়োগরূপ, মরণ-দুঃখ প্রদান করিও না ॥ ১৪ ॥

১৪—प्राणो देवता । त्रिष्टुप्छन्दः । अङ्गाभिमर्शने विनियोगः ॥
"प्रत्यभिमृशेरन् मुखं शिरोङ्गानीत्यनुलोम मसीसीति" गो० ३, ८ ।

अस्मभ्य मोषधीः कृणोतु विश्वचर्षणि स्वाहा ॥ १५॥

एतमुत्यं मधुना संयुतं यवꣳ सरस्वत्या अधिवनावच-

'वेद' जानाति, किञ्च 'अस्मभ्य'' 'शिवाः' कल्याणकरीः' 'ओ-षधीः' धान्य विशेषान्, सः 'विश्वचर्षणिः' विश्वस्य जगतः 'चर्षणिः' स्रष्टा अग्निः 'कृणोतु' ददातु ॥ १५ ॥

हे इन्द्र! 'एतं' ('उ' पादपूरणे) 'त्य'' तं, 'मधुना संयुतं यवं' 'सरस्वत्या' वाचा, 'वना' सम्भजनीयं, 'अध्यवचर्कृधि' अतिशयेन अधिकारं कुरु, गृहाणेति यावत्,—इदानीं यवान्न ग्रहणे इन्द्रस्य औचित्यं दर्शयति,—'इन्द्रः' 'शतक्रतुः' शत-संख्याक-यज्ञानुष्ठायी सन्नेव 'सौरपतिः' यवादुत्पादकस्य 'सौरस्य मेघस्य' 'पतिः' अधिपतिः-संरक्षण-कर्त्ता, 'आसीत्' अभूत् एवं यवादुत्पत्ति-सहकारिणोपि 'सुदानवः' शोभन

জাঠর (জঠরে উৎপন্ন) অগ্নি প্রথমে এই হবি ভক্ষণ করুন, যেহেতু তিনি যেরূপ এই হবি অবগত আছেন আমি তদ্রূপ জানি না, কিঞ্চ সেই বিশ্ব সংসারের স্রষ্টা অগ্নি আমাদিগকে কল্যাণ-জনক ধান্যাদি প্রদান করুন ॥ ১৫ ॥

হে ইন্দ্র! বাক্য দ্বারা সম্যক্‌রূপে ভজনীয়, মধু-সম্মি-শ্রিত, এই যব, ভালরূপে অধিকার কর, শতবার যজ্ঞানুষ্ঠান করিয়া শতক্রতু নাম ধারী ইন্দ্র দেবতা যবাদি অন্ন সকলের উৎপাদক মেঘের অধিপতি হইয়াছেন, এবং যবাদি অন্নের

১৫—জাঠরोऽग्नि र्देवता । अनुष्टुप्छन्दः । श्यामाकचरु-प्राशने विनियोगः ।

"अग्निः प्राशात् प्रथम मिति श्यामाकानाम्" गो० ३, ८ ।

र्धि ॥ इन्द्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानवः स्वाहा ॥ १६ ॥

दातारः, 'मरुतः' वायु-विशेषाः, 'कीनाशाः' वर्षण-कर्त्तारः, आसन् अभूवन् ॥ १६ ॥

उत्पत्तिते सहकारी, कल्याण-प्रद, मरुत् नामक वायु विशेषेराओ वर्षणकारी हईयाछेन ॥ १७ ॥

॥ इति सामवेदीये मन्त्र-ब्राह्मणे द्वितीयप्रपाठकस्य प्रथमः खण्डः ॥

———:०:———

अथ द्वितीयः खण्डः ।

***प्रथमा ह्यव्युवास सा धेनुर भवद्यमे ॥ सा नः पयस्वती दुहा उत्तरामुत्तराँ समाम् ॥ १ ॥ प्रतिक्षत्रे**

हे अग्रहायणि देवते ! 'सा' 'हव्यवास' हविषि पयोलक्षणे कारणतया वसति या तथारूपा, 'धेनुः' 'यमे' धर्मराजस्य तोषार्थं 'प्रथमा' अग्रा 'अभवत्' भवति । 'सा' तां 'पयस्वती' पयस्वतीं बहुतर-दुग्धवतीं धेनुं 'उत्तराम् उत्तराम्' उत्तरोत्तरं 'समां' वर्षं 'दुहां' अध्यधिक-दुग्धदायिनीं कुरु इति शेषः ॥ १ ॥

हे आग्रहायणी देवता! धर्म्मराजेर परितोषार्थ ये धेनु सर्व्व प्रथमे दुग्धरूप हविर कारणरूपे आविर्भूत हईते-

१६—इन्द्रो देवता । जगतीच्छन्दः । यवचरुप्राशने विनियोगः ।

"एतमुत्यं मधुना संयुत मिति यवानाम्" गो० ३, ८ ।

* "अग्रहायण्यां बलि हरणम्" गो० ३, ९ ।

१—आग्रहायणी देवता । अनुष्टुप्छन्दः । चरुहोमे विनियोगः ।

प्रतितिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रतितिष्ठामि गोषु ॥ प्रति-प्राणे प्रतितिष्ठामि पुष्टौ प्रत्यङ्गेषु ॥ प्रतितिष्ठाम्यात्मनि ॥ २ ॥ प्रतिद्यावापृथिव्योः प्रति-

हे अग्ने ! 'प्रतिक्षत्रे' क्षत्रं क्षत्रं प्रति प्रत्येक-वेश्मनि 'प्रतितिष्ठामि' प्रतितिष्ठेयम् प्रथिततया प्रतिष्ठितो भवेय मित्यर्थः। 'राष्ट्रे' राज्यमध्ये च तथैव गुणवत्तया 'प्रत्यश्वेषु' अश्वमश्वं प्रति प्रतितिष्ठामि' सुचालकतया प्रतिष्ठितो भवेयम् । 'गोषु' गो-प्रभृति-पशुषु च तथैव पालकतया । 'प्रतिप्राणे' प्राणं प्राणं प्रति प्राणिमात्रे 'प्रतितिष्ठामि' सुहृत्तया प्रतिष्ठितो भवेयम् । 'पुष्टौ' पुष्टिविषये बलादौ च तथैव बलवत्तया । 'प्रत्यङ्गेषु' हस्त-पदादिषु 'प्रतितिष्ठामि' दार्ढ्य-कर्मोपयुक्तत्वादिना प्रतिष्ठितो भवेयम् । 'आत्मनि' क्षेत्रज्ञे च तथैव ज्ञानवत्तया प्रतिष्ठितो भवेयम् ॥ २ ॥

ছেন, বহুতর দুগ্ধবতী সেই ধেনুকে উত্তরোত্তর বর্ষে অত্যধিক দুগ্ধদাত্রী কর ॥ ১ ॥

হে অগ্নে! আমি যেন বিখ্যাত হওত প্রতি ক্ষত্রিয় গৃহে প্রতিষ্ঠিত হই, রাজ্য মধ্যেও গুণবত্তা প্রচার হওত যেন প্রতিষ্ঠিত হই, এবং প্রতি অশ্বেতে সুচালকতা গুণে যেন প্রতিষ্ঠিত হই, সেইরূপ গোপ্রভৃতি পশুবিষয়েও যেন পালন কারিতা গুণে প্রতিষ্ঠিত হই, এমন কি প্রাণিমাত্রেতেই সৌহৃদ্য গুণে যেন প্রতিষ্ঠিত হই, এইরূপ পুষ্টি-বিষয়ে, বলাদি বিষয়ে,

---

২—অগ্নির্দেবতা । त्रिष्टुप्छन्दः । जपे विनियोगः ।

" प्रतिक्षत्र इत्येषा व्याहृति र्जपति" गो० ३, ९ ।

तिष्ठामि यज्ञे ॥ ३ ॥ स्योना पृथिविनो भवानृ-क्षरा निवेशनी ॥ यच्छा नः शर्म सप्रथो देवा-न्मा भया दिति ॥ ४ ॥*॥ यत्पश्च वः प्रध्यायत मनसा

हे अग्ने ! 'प्रतिद्यावापृथिव्योः' सर्व्वत्रैव 'प्रतितिष्ठामि' प्रतिष्ठितो भवेयम् ! अद्य इह 'यज्ञे' च प्रतिष्ठितो भवेयम् ॥३॥

हे 'पृथिवि !' 'अनृक्षरा' पापशून्या 'निवेशनी' प्राणिनां धारणकारिणी त्वं 'स्योना' कल्याणरूपा 'भव'। 'सप्रथः' विस्तीर्णरूपा त्वं 'नः' अस्मभ्यं सर्व्वत्रैव 'शर्म्म' कल्याणं 'यच्छ' देहि। 'देवात्' देव-कृतात् 'भयात्' 'मा' मां पाहीति शेषः ॥ ४ ॥

হস্তপাদ প্রভৃতি সমস্ত অঙ্গবিষয়ে, দৃঢ়তাজনক কার্য্য কারিতা গুণেও যেন প্রতিষ্ঠিত হই এবং জীবাত্মা বিষয়ে বিদ্যারূপ গুণেও যেন প্রতিষ্ঠিত হই ॥ ২ ॥

হে অগ্নে! প্রতি দ্যাবা পৃথিবীর সর্ব্বত্রই যেন প্রতিষ্ঠিত হই, অদ্য এই যজ্ঞে যেন প্রতিষ্ঠিত হই ॥ ৩ ॥

হে পৃথিবি! তুমি পাপশুন্যা ও প্রাণিদিগের ধারণ কারিণী হইতেছ, এবং অতিশয় বিস্তৃত হইতেছ, তুমি আমাদিগের সম্বন্ধে কল্যাণস্বরূপ হইতেছ, অতএব সর্ব্বত্র আমাদিগকে কল্যাণ প্রদান কর, এবং দৈব ভয় হইতে আমাকে রক্ষা কর ॥৪ ॥

৩—অগ্নি র্দেবতা। যজুঃ। জপে বিনিয়োগঃ।

৪—পৃথিবী দেবতা। অনুষ্টুপ্‌ছন্দঃ। জপে বিনিয়োগঃ।

স্যোনা পৃথিবি নী ভবে ত্যেতা মৃচং জপতি গী০ ৩, ৫।

* অথ অষ্টকা প্রকরণম্। অষ্টকা রাত্রি দেবতেত্যাদি গী০, ৩, ১০।

हृदयेन च॥ वाचा सहस्रपाशया मयि बध्नामि वो मनः ॥५॥* अनु त्वा माता मन्यतामनु पिता न भ्राता

हे 'पशवः'! यूयं 'यत्' येन 'मनसा हृदयेन च' 'प्रध्यायत' चिन्तां कुरुथ, तदेव 'वः' युष्माकं 'मनः' मानसम् अद्य 'सहस्रपाशया' बहुतर-रज्जु-रूपया 'वाचा' विनयवाक्येन 'बध्नामि' स्ववशं नयामि ॥ ५ ॥

हे पशो! देव पैत्रे च कर्मणि विनियुक्तं 'त्वा' त्वां, 'माता' त्वदीय-जननी 'अनु मन्यताम्' देव-पितृ-कार्य्य-साधनाय शरीर-विसर्जने अनुमतिं ददातु। 'पिता' त्वदीय-जनकः 'अनुमन्यताम्'। 'भ्राता' वैमात्रेयादिः त्वदीयः 'अनुमन्यताम्'। 'सगर्भः' सोदरः त्वदीयः 'अनुमन्यताम्'। 'सखा' त्वदीयः 'अनुमन्यताम्'। 'सयूथ्यः' त्वदीय-यूथ-चारी अपरापरश्च 'अनुमन्यताम्' ॥ ६ ॥

হে পশুসকল! তোমরা সকলে হৃদয়ের সহিত যে মনের দ্বারা ধ্যান করিয়া থাক, তোমাদিগের সেই মানস, অদ্য বিনয় বাক্য স্বরূপ বহুতর রজ্জুদ্বারা বন্ধন করিতেছি অর্থাৎ স্ববশে আনিতেছি ॥ ৫ ॥

হে পশো! দৈব, পৈত্র কার্য্যে বিনিযুক্ত তোমাকে তোমার জননী দেব পিতৃ কার্য্য সাধনের নিমিত্ত শরীর বিসর্জন করিতে অনুমতি প্রদান করুক, তোমার জনকও অনুমতি প্রদান করুক, তোমার বৈমাত্রেয়াদি ভ্রাতারাও অনুমতি

५—पशवो देवताः। अनुष्टुप्छन्दः। होमे विनियोगः।

जुहुयात् यत् पशवः प्रध्याय तेति गो० २, ९।

नु सगर्भ्योनु सखा सयूथ्यः॥६॥ आत्तं देवेभ्यो हविः॥७
यत्पशुर्मायु मक्षततो रोपद्भि राहृत । अग्नि र्मा तस्मा
देनसो विश्वान्मुञ्च त्वꣳ हसः ॥ ८॥ अग्ना वग्निश्च

हे पशो ! त्वं 'देवेभ्यः' देवार्थं 'हविः' भक्ष्यम् इति 'आत्तम्' गृहीतम् ॥ ७ ॥

हे अग्ने ! अयं 'पशुः' 'यत्' यावत् परिमितम् 'आयुः' अक्षत' प्राप्तवान् भोग्यत्वेनेति शेषः, तत् त्वं जानासीति वाक्यान्वयः । किञ्च 'ऋतः' ऋतं यज्ञं 'रोपद्भिः' स्थापयितृभिः अस्माभिः 'आहृत' अयं पशु राहन्यते इति त्वं वेत्सि । 'सः' 'त्वम्' 'अग्निः' 'ह' निश्चयम् 'तस्मात्' आयुषो नूतनीकरणरूपात् 'एनसः' पापात् 'मा' मां (न केवलं मामेव) अपितु 'विश्वान्' सर्वानेव याज्ञिकान् 'मुञ्च' मोचय ॥ ८ ॥

प्रदान करुक, तोमार सोदर भ्राताও অনুমতি প্রদান করুক, তোমার সখা অনুমতি প্রদান করুক, অপরাপর তোমার দল-প্রবিষ্টেরাও অনুমতি প্রদান করুক ॥ ৬ ॥

হে পশো ! তুমি দেবতাদিগের নিমিত্ত হবি (ভক্ষ্য) রূপে গৃহীত হইয়াছ ॥ ৭ ॥

হে অগ্নে ! এই পশু যাবৎ পরিমিত আয়ু প্রাপ্ত হইয়াছিল, তাহা তুমি জ্ঞাত আছ, এবং সত্য যজ্ঞানুষ্ঠায়ি আমা-

---

६ – पशु र्देवता । यजुः । अनुमन्त्रणे विनियोगः ।
हुत्वा चानु मन्त्रयेतानुत्वा माता मन्यतामिति गो० ३, ९ ।
७ – पशु र्देवता । यजुः । उदक-सेचने विनियोगः ।
आत्तं देवेभ्यो हविरित्यथैनामुदगुत् सृप्य गो० ३, ९ ।
८ – अग्नि र्देवता । अनुष्टुप्छन्दः । होमे विनियोगः ।
पितृ-दैवत्ये संज्ञप्तायां जुहुयात् यत् पशु र्मायुमक्षतेति गो० ३, ९ ।

रति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः ॥ स नः स्योनः सुयजा यजा च यथा देवानां जनिमानि वेद ॥ ९ ॥ औलूखलाः संप्रवदन्ति ग्रावाणो हविष्कृ-

'ऋषीणां पुत्रः' ऋषिभिर्मन्थनेनोत्पाद्यमानत्वात् ऋषीणां तनय इव 'एषः' यः 'अग्निः', 'अधिराजः' अध्यधिकदीप्तः सन् 'अग्नौ' आहवनीयाग्नौ 'प्रविष्टः' प्रवेशं कुर्वन् 'चरति' हविर्भक्षयति । 'सः' अग्निः 'नः' अस्माकं 'स्योनः' कल्याणकरः भवतु । अहञ्च 'सुयजा' याज्ञिकः 'देवानाम्' तेषां 'जनिमानि' उत्पत्त्यादीनि 'यथा' 'वेद' जानामि, तथैव 'यजा' यजे ॥ ९ ॥

'परिवत्सरीणाम्' प्रति वत्सर-सम्पाद्यमानानां अष्टकाणाम् सिद्ध्यर्थं 'हविष्कृखन्तः' हविष उपयोगिन स्तण्डुलान् दिगकर्त्तृक एई पशु हत हईतेछे—ईहाओ तुमि जानितेछ, अतएव आयुर न्यूनता करण जन्य प्रत्यवाय हईते अवश्यई तुमि आमाके—केवल आमाके नय, एईरूप सत्य यज्ञानुष्ठाने व्रती तावत्केई मोचन करव ॥ ८ ॥

ऋषिदिगकर्त्तृक अरणिद्वय मन्थने उत्पन्न विधाय ऋषिदिगेर पुत्ररूपी ये अग्नि अत्यधिक प्रदीप्त हओत आहवनीय अग्निते प्रवेश करिया हवि भक्षण करेन, सेई अग्नि आमादिगेर कल्याण-प्रद हउन, आमि याज्ञिक, सेई सकल देवदिगेर येरूप उत्पत्त्यादि अवगत आछि, तदनुरूपेई याग करितेछि ॥ ९ ॥

९—अग्नि र्देवता । विराट् त्रिष्टुप्छन्दः । होमे विनियोगः ।
चतुर्गृहीत माज्यम् गृहीत्वाष्टर्च प्रथमया जुहुयादग्नावग्नि रिति गौ० ४, १ ।

ख्वन्तः परिवत्सरीणाम् ॥ एकाष्टके सुप्रजसः सुवीरा ज्योग् जीवेम बलिहृतो वयं ते ॥ १० ॥ इडायास्पदं घृतवत्सरीसृपं जातवेदः प्रति हव्या गृभाय ॥ ये

निष्पादयन्तः 'ओलूखलाः' उलूखल-रूपेण परिणताः इमे 'ग्रावाणः' पाषाणाः 'सम्प्रवदन्ति' अस्फुट-शब्दं कुर्व्वन्ति । हे 'एकाष्टके!' एक-संख्यान्विते अद्य वर्षीये अष्टके! 'ते' त्वत् सिद्ध्यर्थं 'बलिहृतः' बल्याहरणकारिणः 'वयं' 'सुप्रजसः' सुन्दर-प्रजया समन्विताः किञ्च 'सुवीराः' समर्थाश्च सन्तः 'ज्योक्' दीर्घकालं 'जीवेम' प्राणधारणं कुर्म्म इति प्रार्थये ॥ १० ॥

हे 'जातवेदः'! अग्ने! 'इड़ायास्पदम्' अन्नस्य स्थानं 'घृतवत्' घृतेन सिक्तम् अतएव 'सरीसृपं' सुचिक्कणं 'प्रतिहव्या'

प्रति वत्सरे सम्पाद्यमान अष्टका सकलের সাধন করিতে হবির উপযোগী তণ্ডুলের নিষ্পাদন কারি, উলূখল রূপে পরিণত, এই সকল পাষাণেরাও সম্যক্‌রূপে অস্পুট শব্দ করিতেছ, হে একাষ্টকে! (এই বৎসরের অষ্টকা) তোমার সাধনে প্রবৃত্ত আমরা বলির আহরণ করিতে তৎপর হইয়া সুন্দর পুত্রাদি দ্বারা সমন্বিত এবং সমর্থ থাকিয়া দীর্ঘকাল যেন জীবিত থাকি—ইহা প্রার্থনা করি—॥ ১০ ॥

হে জাতবেদঃ অগ্নে! তুমি অন্নের আস্পদ, ঘৃতসিক্ত, অতএব চিক্কন, এইরূপ হবনীয় দ্রব্য মাত্রই গ্রহণ করিয়া আমাকে এই বর দাও—বিবিধাকারে বর্ত্তমান যে সকল গ্রাম্য গো

१०,११—अनयोः अष्टका देवता । त्रिष्टुप्छन्दः । होमे विनियोगः ।

तृतीय पात्र मवदाय द्वितीयातृतीयाभ्यां जुहोति गो० ४, १ ।

ग्राम्याः पशवो विश्वरूपा स्तेषाꣳ सप्तानां मयि रन्ति रस्तु ॥११॥ एषैवसा या पूर्व्वा व्यौच्छत् सेय मप्स्वन्तश्च रति प्रविष्टा॥ वसू र्ज्जिगाय प्रथमा जनित्री विश्वे ह्य-स्यां महिमानो अन्तः ॥ १२ ॥ एषैव सा या प्रथमा

हवनीय-द्रव्यमात्रं 'गृभाय' गृहाण । गृहीत्वा च मह्य मसुं वरं देहि—यत्, 'ये ग्राम्याः' 'विश्वरूपाः' विविधात्मकाः 'पशवः' गोमहिष्यादयः तेषां 'सप्तानां' बहूनां 'मयि' मद्-गृहे 'रन्ति' रमणं-प्रसन्न भावः 'अस्तु' ॥ ११ ॥

'या' अष्टका 'पूर्वा' प्रथमकालीनैव 'वि ऐच्छत्' विशेषेण प्रकाशमानवती 'सा' एव 'एषा'। किञ्च या 'अप्सु' नदी-तड़ादि स्थितेषु 'अन्तः प्रविष्टा' सती 'चरति' भ्रमति 'सा एव 'इयम्'। वसूः पार्थिवान् समस्तद्रव्यान् 'जिगाय' जितवती। इयञ्च प्रथमा 'प्रधाना 'जनित्री' जानयित्री कामाना मिति शेषः। 'अस्याम् अन्तः अष्टकायां मध्ये 'विश्वे' सर्व्वे 'हि' एव 'महिमानः' सन्ति ॥ १२ ॥

महिष प्रभृति पशु सकल रहियाछे तत्समुदयेरेई आमार गृहे प्रसन्नता थाकुक् ॥ ११ ॥

पूर्व्वकालेते ये अष्टका विशेषरूपे प्रकाश पाइयाछिल, सेई एई अष्टका, एवं ये अष्टका जलेते प्रविष्ट हइया भ्रमण करितेछिल, सेई अष्टका एई पार्थिव समस्त द्रव्य जय करियाछे, एई प्रधाना, ও कामना सकलेर जननकारिणी हइतेछे, एई अष्टकारई मध्ये समस्त महिमा आछे ॥ १२ ॥

१२—अष्टका देवता त्रिष्टुप्छन्दः । अवदाने विनियोगः ।
चतुर्थी-पञ्चमीभ्यां षष्ठी-सप्तमी-भ्याञ्च शेव मवदाय गी० ४, १.।

व्यौच्छत् सा धेनु रभवद्विश्वरूपा ॥ संवत्सरस्य या पत्नी सा नोऽस्तु सुमङ्गली ॥१३॥ यां देवाः प्रति पश्यन्ति रात्रीं धेनु मिवायतीं ॥ सा नः पयस्वती दुहा उत्तरा मुत्तराꣳ समाम् ॥ १४ ॥ संवत्सरस्य प्रतिमां

'एषा एव सा' अष्टका, 'या' 'प्रथमा' पूर्व्वकालीना एव 'वि ऐच्छत्' विशेषं प्रकाशमाप्तवती । 'सा' इयं 'विश्वरूपा' बहुजनसेव्यत्वात् बहुरूपा, 'धेनुः' यथाभिलषितप्रदत्वात् काम-धेनुरिव । 'या' इयं 'संवत्सरस्य' 'पत्नी' भोग्यत्वात् उच्यते वेदे, 'सा' 'नः' अस्माकं 'सुमङ्गली' कल्याणी 'अस्तु' ॥ १३ ॥

'देवाः' द्योतमानाः 'यां' 'धेनुम् इव आयतीम् यथा गोष्ठात् धेनु रागच्छतीव तथैव वर्षान्ते पुनरागच्छतीव अष्टका इति तां 'रात्रीं' उत्तराष्टकां प्रति 'पश्यन्ति' आगमन-पथं निरीक्षन्ति, 'सा' अष्टका रात्री 'दुहा' 'कर्म्म-फलानि दुह्यन्ते यस्या स्तथा भूता 'उत्तराम् उत्तराम्' उत्तरोत्तरं 'समां' वर्षं 'पयस्वती' अध्यधिक-दुग्धवतीवभव तु ॥ १४ ॥

এই অষ্টকাই—সেই, যে পূর্ব্বকালেতে বিশেষরূপে প্রকাশ পাইয়াছিল, যে অষ্টকা বহু লোকের সেব্য বিধায়, বহুবিধ অভিলষিত প্রদান করায় কামধেনু স্বরূপ, এবং যে—সংবৎসর কাল পর্য্যন্ত ভোগ্য হওয়ায় সংবৎসরের পত্নীস্বরূপ, সেই অষ্টকা আমাদিগের সমন্ধে সুমঙ্গল দায়িনী হউক ॥ ১৩ ॥

গোষ্ঠ হইতে ধেনুর আগমনের ন্যায় বর্ষান্তে পুনরাগমশীল যে—সেই উত্তর-অষ্টকা, তাহার আগমন পথ দেব-

---

१३, १४, १५—एषां सर्व्वं पूर्व्ववद् । बृहतीच्छन्दः इत्येव भेदः ।

त्वा रात्रि! यजामहे॥ प्रजामजर्य्यां नः कुरु रायस्पोषेण सꣳसृज॥ १५॥ अन्वियन्नो अनुमति र्यज्ञं देवेषु मन्यताम्। अग्निश्च हव्यवाहनः स नो ऽदाद्दाशुषे मयः॥ १६॥

हे 'रात्रि'! अष्टकाया रजनि! 'संवत्सरस्य' 'प्रतिमां' परिमापयित्रीं 'यां' 'त्वा' त्वां 'यजामहे' वयं, सा त्वं 'नः' अस्माकं 'प्रजां' 'अजर्य्यां' जरा-शून्यां 'कुरु'; किञ्च अस्मान् 'रायस्पोषेण' धनस्य सम्बन्धि-पोषणेन 'सं सृज' अतिसर्जय॥ १५॥

'इयं' 'अनुमतिः' देवी 'देवेषु' इन्द्रादिषु 'यज्ञम्' इदं 'अनुमन्यताम्' बोधयताम्'। 'हव्यवानः' हव्यानां वहनकारी 'च' 'सः' अयम् 'अग्निः' 'दाशुषे' हविर्दत्तवते यजमानाय 'नः' मह्यं 'मयः' सुखम् 'अदात्' ददातु॥ १६॥

তারা নিরীক্ষণ করিতেছেন, সেই অষ্টকা রাত্রি (উত্তরাষ্টকা) অত্যধিক দুগ্ধবতী গোর ন্যায়-উত্তরোত্তর বর্ষে ইষ্ট-ফল-প্রসবিনী হউক॥ ১৪॥ হে অষ্টকা-রাত্রি! তুমি সংবৎসরের পরিমাণকর্ত্রী, তোমাকে আমরা পূজা করিতেছি, তুমি আমাদিগের অপত্যাদিকে জরা শূন্য কর, এবং আমাদিগকে ধনের রক্ষণ সহকারে পালন কর॥ ১৫॥

এই অনুমতি দেবী ইন্দ্রাদি দেবগণেতে যজ্ঞ বোধন কারন্, এবং হব্য-সমুদয়ের বহনকারী এই অগ্নি দেবতা, দত্ত-হবিষ্ক* আমাদিগকে সুখ প্রদান করুন॥ ১৬॥

॥ इति सामवेदीये मन्त्र-ब्राह्मणे द्वितीयप्रपाठकस्य द्वितीय खण्डः समाप्तः॥

১৬—অগ্নির্দেবতা। অনুষ্টুপ্ছন্দঃ। হোমে বিনিয়োগঃ। সৌবিষ্ট কৃত মষ্টম্যা জুহুয়াৎ, গো০ ৪.১

*দত্ত-হবিষ্ক—দত্ত হইয়াছে হবি যাহা কর্ত্তৃক।

अत्र पितरो मादयध्वं यथाभागमावृषायध्वं ॥ ६ ॥
अमी मदंत पितरो यथाभागमावृषा ऽषत् ॥ ७ ॥
नमो वः पितरो जीवाय नमो वः पितरः शूषाय ॥

'पितरः' 'अत्र' पिण्डे 'मादयध्वम्' तृप्यत, 'यथा भागम्' यो यस्य भागः तम् 'आवृषायध्वम्' अभिलषत ॥ ६ ॥

अनेन पिण्डदानेन 'अमी' 'पितरः' 'मदन्तः' तृप्तवन्तः सन्तः 'यथा भागम्' यो यस्य भागः तं 'आवृषा ऽषत्' अभिलषितवन्तः गृहीतवन्तः ॥ ७ ॥

हे 'पितरः' 'वः' युष्मभ्यं 'नमः' नमामि, कस्मै? इत्युच्यते— 'जीवाय' दीर्घजीवनाय । 'शूषाय' बलाय । 'घोराय' परितृप्तये

ক্রমে আচরিত, পথেরদ্বারা এই স্থানে আগমন কর; আসিয়া এই সংসারে আমাদিগকে দ্রব্য দাও, এবং কল্যাণ, দাও ; অপিচ, অন্নধন এরূপ প্রদান কর যদ্বারা পুত্র পৌত্রাদি সকল অনায়াসে জীবন নির্ব্বাহ করিতে পারে ॥ ৫ ॥

পিতাসকল এই পিণ্ডে তৃপ্ত হউন যাহার যে ভাগ তাহা লাভ করুন ॥ ৬ ॥

এই পিণ্ডদান করায় এই সকল পিতারা পরিতৃপ্ত হইয়া আপনার আপনার ভাগ গ্রহণ করিলেন ॥৭॥

হে পিতাসকল! আপনাদিগকে নমস্কার করিতেছি, দীর্ঘজীবী হইবার নিমিত্ত, বলী হইবার নিমিত্ত, পরিতৃপ্ত

৬, ৭— অনয়োঃ পितरौ देवताः । यजुः । जपे विनियोगः ।

'जपत्यत्र पितरो मादयध्वं यथाभागमावृषायध्वमित्यपर्य्यावृत्य पुरोच्छ्वासादभिपर्य्यावर्त्तमानौ जपे दमौ मदन्त पितरो यथाभागमावृषा ऽषतेति" गौ० ४,३ ।

नमो वः पितरो घोराय नमो वः पितरो रसाय ॥८॥ नमो वः पितरः स्वधायै नमो वः पितरो मन्यवे ॥ नमो वः पितरः पितरो नमो वः ॥ ९ ॥ गृहान्नः पितरो दत्त ॥ १० ॥ सदो वः पितरो देष्म ॥ ११ ॥

'रसाय' आनन्दाय ॥ ८ ॥ स्वधायै' अन्नाय 'मन्यवे' क्रोधाय—क्रोधमूल-सम्पत्तये । अन्यत् सुगमम् ॥ ९ ॥

हे 'पितरः !' 'गृहान्नः' गृहस्य अन्नानि 'दत्त' प्रयच्छत । अथवा 'नः' अस्मभ्यं 'गृहान् 'दत्त' प्रयच्छत ॥ १० ॥

हे "पितरः' 'वः' युस्मभ्यं 'सदः' स्थानं 'देष्म' वय मिति शेषः ॥ ११ ॥

হইবার নিমিত্ত, আনন্দ লাভের নিমিত্ত, অন্নলাভের নিমিত্ত, ইহ লোকে উপকারি-ক্রোধের মূলীভূত-সম্পত্তির নিমিত্ত, বার বার নমস্কার করিতেছি ॥ ৮ ॥—॥ ৯॥

হে পিতাসকল! গৃহের অন্ন [ভক্ষ্য] সকল প্রদান কর, অথবা আমাদিগকে গৃহ প্রভৃতি স্থাবর পদার্থ সকল প্রদান কর ॥১০ ॥

হে পিতাসকল! তোমাদিগকে আমরা এই স্থান উপবেশন করিতে দিলাম ॥ ১১ ॥

८, ९— अनयोः, पितरो देवताः । उष्णिक् छन्दः । जपे विनियोगः ।
'पूर्व्वस्यां कर्ष्वां दक्षिणोत्तानौ पाणी कृत्वा—नमोवः पितरो जीवाय नमोवः पितरो शूषायेति मध्यमायां, सव्योत्तानौ-नमो वः पितरो घोराय नमो वः पितरो रसायेत्युत्तमायां, दक्षिणोत्तानौ—नमो वः पितरः स्वधायै नमो वः पितरो मन्यव इति, अथाञ्जलिकृतौ जपति – नमो वः पितरः पितरो नमो व इति गो० ४, ३ ।
१०— पितरो देवता । यजुः । गृहिण्य वेक्षणे विनियोगः ।
'गृहानवेक्षते गृहान्नः पितरो दत्तेति' गौ ४, १ ।
११ — पितरो देवताः । यजुः ।पिण्डावेक्षणे विनियोगः ।
'पिण्डानवेक्षते सदो वः पितरो देष्मेति' गौ ४, ११ । ।

एतद्वः पितरो वास॥१२॥ ऊर्ज्जं वहन्तीः रमृतं घृतंपयः कीलालंपरिस्रुतꣳस्वधास्थतर्पयत मे पितॄन्॥१३॥आधत्त पितरोगर्भंकुमारंपुष्करस्रजं॥ यथेहपुरुषस्त्वात्॥ १४ ॥

हे 'पितरः !' 'वः' युस्माकम् 'एतत्' 'वासः' परिधेयं वसनम् ॥ १२ ॥

हे आपः ! यूयं 'स्वधा' पितॄणां परमाशिषः 'स्थ' भवथ, अतः 'ऊर्ज्जम्' अन्नम् 'अमृतम्' जरामृत्यु-शून्य-कारिणम् मधु, 'घृतं', 'पयः' क्षीरं 'कीलालम्' जलञ्च 'परिस्रुतं' इदं सर्व्वं 'वहन्तीः' वहन्त्यः 'एतॄन्' इमान् 'तर्पयत' परितृप्तान् कुरुत ॥ १३ ॥

हे 'पितरः!' 'पुष्करस्रजम्'। अम्बरमाला-धारिणम् सूर्य्यं चन्द्रमिव वा 'कुमारं' पुत्ररूपं 'गर्भं' 'आधत्त' प्रददत। पुनश्चो-

हे पितासकल ! तोमादिगकें आमरा एई वस्त्र परिधान करिते दिलाम ॥ १२ ॥

हे जल ! तोमरा पितृदिगेर परम सुख-दायक हईतेछ एई हेतु अन्न, ओ जरा-मृत्यु-प्रभृतिर विनाशक मधु, घृत, दुग्ध, एवं परिस्रुत जल एई सकल वहन करत एई सकल पितांके परितृप्त कर ॥ १३ ॥

१२—पितरो देवताः। यजुः। सूत्रदाने विनियोगः।
सूत्रतन्तुं गृहीत्वा ** पिण्डे निदध्यात् ** पितृनाम गृहीत्वा सावेतत्ते वासो—येचात्रत्वानुयांश्च त्वमनु तस्मै ते स्वधेति, गो० ४,३ ॥
१३ — पितरो देवताः। पिपीलिक मध्योणिक् छन्दः। पिण्डपरिषेके विनियोगः ॥
'पिण्डान् परिषिञ्चे दूर्जं वहन्तीरिति' गों ४, ३।
१४ — पितरो देवताः। गायत्री छन्दः पिण्ड प्राशने विनियोगः।
'मध्यमं पिण्डं पत्नी पुत्रकामा प्राश्नीयादाधत्त पितरो गर्भमिति गो० ४,३।

अभून्नोदूतो हविषो जात वेदा अवाड्ढव्यानि सुरभीणि कृत्वा ॥ प्रादात् पितृभ्यः स्वधया ते अक्षन् प्रजानन्नग्ने पुनरेहि योनिं ॥ १५ ॥ वह वपां जातवेदः पितृभ्यो यत्रैतान्वेत्थ निहितान् पराचः ॥ मेदसः कुल्या अभितांत्

ष्यते—'इह' मद्गर्भे 'पुरुषः' पुरुष इति विख्यातः तनयो 'यथा-स्यात्' तथा प्रसन्नो भवेति शेषः ॥ १४ ॥

'जातवेदाः' अग्निः 'नः' अस्माकं सम्बन्धिनः 'हविषः' 'दूतः' वाहकः 'अभूत्' । अतएव 'हव्यानि' अस्मद्दत्तानि 'सुरभीणि कृत्वा' 'अवाट्' वहनं कृतवान् । 'स्वधया' अस्मदुक्तया वाचा सह तानि च 'पितृभ्यः' 'प्रादात्' दत्तवान् । 'ते' च पितरः 'अक्षन्' तानि भक्षितवन्तः । इदानीं प्रार्थये—हे 'अग्ने !' पितृभक्षणं 'जानन्' सन् 'योनिं' स्वस्थानम् अत्र 'पुनः एहि' पुनः प्रत्यागच्छ ॥ १५ ॥

হে পিতাসকল ! আকাশরূপি মালাধারি সূর্য্যের ন্যায় বা ঐরূপ চন্দ্রের ন্যায় পুত্ররূপি গর্ভ প্রদান কর, পুনশ্চ এই আমার গর্ভ পুরুষ বলিয়া খ্যাত্যাপন্ন পুত্র, যেরূপে হয় এবম্বিধ আশীর্ব্বাদ কর ॥ ১৪ ॥

জাতবেদ নামক অগ্নি, অস্মদাদি-প্রদত্ত-হবির দূত (বাহক) হইয়াছিল, অতএব অস্মদাদি প্রদত্ত-হব্য সমুদয়কে সুগন্ধি করত বহন করিয়া ছিল ; স্বধা রূপি অস্মদাদ্যুক্ত বাক্য-সহকারে সেই সমুদয় হব্য পিতৃগণকে দিয়াছিল ; পিতৃলোকেরা

১৫—অগ্নির্দেবতা । त्रिष्टुप् छन्दः । उलूका भ्रुचणे विनियोगः ।
"अभून्नो दूतो हविषो जातवेदा इत्युलूक मन्त्रिरभ्यूचा' गौ ४, ३ ।

स्वं तु सत्या एषा माशिषः संतु कामात् स्वाहा ॥ १६ ॥
जातवेदो वपया गच्छ देवाँ स्तृँहि होता प्रथमो

हे 'जातवेदः' अग्ने ! यत्र' यस्मिन् प्रदेशे 'एतान्' 'वा' पितॄन् 'पराचः' गमन-पराङ्मुखान् उपविष्टानिति यावत् 'निहितान्' स्थितान् 'इच्छ' जानीहि, तत्रैव प्रदेशे तेभ्यः 'पितृभ्यः' 'वपां' मेदः [चरबि] 'वह' प्रापय । 'मेदसः' अस्य 'कुल्याः' कृत्रिमासरितः 'तान्' 'अभिस्रवन्तु । 'एषाम्' तृप्तानां 'कामात्' इच्छातः हेतोः 'आशिषः' आशीर्व्वादाः 'सत्याः' अनृताः सफलाः 'सन्तु' ॥ १६ ॥

हे 'जातवेदः' अग्ने ! 'हि' यतः 'त्वं' 'प्रथमः' मुख्यः 'होता'

सेई समुदय भक्षण करियाछिलेन ; सम्प्रति प्रर्थितेछि—हे अग्ने! पितृलोकेर भक्षण ज्ञात हइया स्वस्थाने (एइस्थले) पुनः प्रत्यागमन कर ॥ १५ ॥

हे जातवेद अग्ने ! यें प्रदेशे गमन-पराङ्मुख, अवस्थित, एइ सकल पितृलोककें जानिवा, सेइ स्थानेते पितृदिगकें मेद वहन करिया दाओ,—एइ मेदेर कुल्या (कृत्रिम-सरित्) प्रस्तुत करत अभिषेक कर; एइ सकल पितृदिगेर स्वेच्छा पूर्व्वक प्रदत्त आशीर्व्वाद-सकल सत्य (सफल) हउक ॥ १६ ॥

---

१६ अग्निर्देवता । विष्टुप् छन्दः । वपाहोमे विनियोगः ।

* 'अथान्वष्टक्य स्थालीपाकेन' इति गो० ४, ४ ।

'पितृ देवत्येषु पशुषु वह वपां जात वेदः पितृभ्य इति वपां जुहुयात् गौ ४,४ ।

* अथाती हलाभियोगः गो० ४, ४ ।

" स्थालीपाकस्य जुहुयादैकाष्टका तपसा तप्यमानेति" गो० ४, ४ ॥

बभूव॥ सत्या वपा प्रगृहीता मे अस्तु समृध्यतां मे यदिदं करोमि॥१७॥ यत् कुसीदमप्रदत्तं मयेह्ये नय मस्य निधिना चराणि॥ इदं तदग्ने अनृणो भवामि जीवन्नेव प्रतिदत्ते ददानि॥१८॥ एकाष्टका-तपसा

देवानामाह्वाता 'बभूव', अतः 'वपया' अस्मद्दत्तया गृहीतया 'देवान्' इन्द्रादीन् गच्छ। इयञ्च 'मे' मम 'प्रगृहीता' प्रदानाय वपा 'सत्या' दोषशून्या 'अस्तु' त्वत्प्रसादादिति भावः। 'यत् इदं' कर्म करोमि तत् 'समृध्यताम्' समृद्धि-युक्तं कुरु॥ १७॥ हे 'अग्ने!' 'इह' जन्मनि 'यत्' 'कुसीदम्' 'अप्रदत्तं' न दत्तम्, 'येन' हेतुना 'यमस्य' धर्मराजस्य 'निधिना' केश-ग्रहणेन च-राणि' अह मिति यावत्, 'तत्' 'इदं' कुसीदम् 'ददानि' प्रति-दत्ते च अस्मिन्, अहं 'जीवन् एव' जीवित शरीर एव 'अनृणः' ऋणशून्यो भवामि॥ १८॥

हे जातवेद अग्ने! येहेतु तुमि देवतादिगेर मुख्य आह्वान-कर्त्ता हईयाछिले, अतएव तुमि अस्मद्दत्त वपार सहित इन्द्रादि-देवता दिगेर निकटे याओ, तोमार प्रसादे आमार दानेर निमित्त आयोजित वपा (मेद) दोष-शून्य हउक, आमि एई यज्ञ करितेछि अतएव आमाके समृद्धिशाली कर॥ १७॥

हे अग्ने! एई जन्मे याहा किछु ऋण करिया कुसीद (सुद) प्रदान करि नाई;—येहेतु आमि धर्म्मराज-कर्त्तृक येन केशा-

१७—अग्नि र्देवता। त्रिष्टुप् छन्दः। वपा होमे विनियोगः।

"देव देवत्येषु जातवेदो वपया गच्छ देवानिति" गौ ४, ४।

१८—अग्निर्देवता। त्रिष्टुप् छन्दः। होमे विनियोगः।

ऋणे प्रजायमाने गोलकानां मध्यम पर्णेन जुहुयात् यत् कुसीदमिति गौ ४,४।

तप्यमाना जजान गर्भं महिमानमिन्द्रं ॥ तेन देवा असहन्त शत्रून्हन्ता असुराणां भवच्छचीभिः ॥ १९।

'एकाष्टकातपसा' एक संख्यकाष्टकायाः तपसा शास्त्रोक्त विधिवत् कर्मणा 'तप्यमाना' तपः कर्मवती काचित् अदितिः अखण्डनीया नित्याशक्तिः 'महिमानं' महत्वयुक्तम् 'इन्द्रं' ऐश्वर्य्य-शालिनं इन्द्रनामकं वा 'गर्भं' 'जजान' जनितवती। 'तेन' इन्द्रेण अधिपतिभूतेन सह मिलित्वा 'देवाः' वायुादयः 'शत्रून्' वृत्रादीन् 'असहन्त' पराभूतान् कृतवन्तः। ततः प्रभृति स इन्द्रः 'शचीभिः' वृत्रवधादिभिः स्वकर्मभिः 'असुराणां' 'हन्ता' इति प्रसिद्धः ॥ १९ ॥

কর্ষিত হইয়া আচরণ করি অতএব সেই কুসীদ দিব, এবং দিতেছি, জীবিত থাকিতে থাকিতেই এ শরীরে ঋণ-শূন্য হইব ॥ ১৮ ॥

বিধিমত একটি অষ্টকারূপ তপোদ্বারা তপ্যমান কোন এক অখণ্ডনীয় অদিতি নাম্নী নিত্যাশক্তি, মহিমাশালি ইন্দ্র-নামে গর্ভ প্রাদুর্ভূত করিলেন্, বায়ু প্রভৃতি দেবতারা সেই অধিনায়ক ইন্দ্রের সহিৎ মিলিত হইয়া বৃত্রাদি শত্রু-দিগকে পরাভব করিয়াছিলেন্ তদবধি সেই ইন্দ্র বৃত্রবধাদি স্বীয় ক্রিয়া রূপিণী শচীর সহিৎ বিরাজমান হইয়া অসুর-দিগের হন্তা বলিয়া প্রসিদ্ধ হইলেন্ ॥ ১৯ ॥

॥ इति सामवेदीये मन्त्र-ब्राह्मणे द्वितीय प्रपाठकस्य तृतीय-खण्डः समाप्तः ॥

---

१९ – इन्द्राणी देवता। विष्टुप् छन्दः। स्थाली पाक होमे विनियोगः।

॥ अथ चतुर्थः खण्डः ॥

इदं भूमे भजामह इदं भद्रꣳ सुमङ्गलं ॥ परा सपत्ना नवाधस्वान्नेषां विन्दते वस्वन्नेषां विन्दते धनं ॥१॥
इमꣳ स्तोम मर्हते जातवेदसे रथमिव संमहेमा

हे अग्ने ! 'भूमेः' 'इदं' खण्डं खण्डिलात्मकं 'भजामहे, 'इदं' 'भद्रं' कल्याणकरं 'सुमङ्गलं' मङ्गलकरं पुनरुक्ता अतिकल्याणकरं अस्माकं भवत्विति शेषः। किञ्च 'सपत्नान्' अस्मच्छत्रून् 'परावाधस्व' सुष्ठु पीड़यस्व। किञ्चान्यदपि 'अन्येषां' परेषां शत्रूणां 'वसु' धनम् 'विन्दते' लभते इत्थं याजक इति अतमित्यभिप्रायः॥ 'अन्येषां विन्दते धनम्'—इत्यंशस्तु 'अन्येषां विन्दते वसु' इति स्थानीयं रात्रौ पाठ्यमिति युक्तमत्र ॥ १ ॥

'इमं' 'स्तोमं' स्तवं, 'सम्महेमा' पूजोपकरणयुक्तं कुर्य्याम, —किमर्थं ? 'जात वेदसे' एतन्नामकाग्नये, 'अर्हते' स्तुत्याय, 'मनीषया' प्रज्ञया, सारथि र्यथा 'रथमिव' रथं सम्महेमा तद्वत्

हे अग्ने ! आमरा भूमिर एई स्थण्डिल भाग उपासना-करितेछि तुमि आमादेर कल्याणकर, मङ्गलकर अतिशय कल्याणकर हईतेछे. अतएव आमादेर सपत्न-शत्रुदिगके भाल-रूपे पीड़ा दाओ एवं अन्यान्य शत्रुदिगेर धन हरण कर॥ १ ॥

निज प्रज्ञाबले सारथि येमन रथके चालनोपयुक्त करे तद्रूप आमरा एई स्तुतिके जातवेद नामक अग्निर निमित्त पूजोपकरणे उपयुक्त करि, येहेतु, एई अग्निर

१—अग्निर्देवता। अनुष्टुप् छन्दः।भूमि जपे विनियोगः।

*'काम्येष्यत ऊर्ज्जम् गौ ४, ५।

भूमौ त्वद्वौ पाणी प्रतिष्ठाप्येदं भूमिर्भजामह इति वस्वन्नं रात्रौ धनमिति गौ ३,५।

मनीषया ॥ भद्रा हि नः प्रमतिरस्य सꣳसद्यग्ने सख्ये मारिषामा वयं तव ॥२॥ भरा मेध्यं कृणवामा हवीꣳषि ते चितयन्तः पर्वणा पर्वणा वयं ॥ जीवातवे प्रतराꣳ साधया धियोऽग्ने सख्ये मारिषामा वयं तव ॥३॥

इति शेषः। 'हि' यतः, 'नः' अस्माकं, 'अस्य' अग्नेः प्रसादात्, 'भद्रा' कल्याणी 'प्रमतिः' प्रकृष्टा मतिः, 'संसदि' सभायां जायते; हे 'अग्ने!' 'तव' 'सख्ये' सख्यतया अवस्थिताः वयं सर्व्वे, केनाप्यनेन दुरात्मना 'मा' 'रिषामा' मा हिंसिस्महि ॥२॥

हे 'अग्ने!' त्वदर्थं, 'इध्वं' यज्ञदारु, 'भरामः' आहरामः, 'हवींषि' चरु-प्रभृतीनि, 'पर्व्वणा पर्व्वणा' पर्व्वणि पर्व्वणि, 'चितयन्तः' उत्पादयन्तः, 'कृणवामा' सम्पादयामः, निर्व्वपामइति यावत्, किमर्थं?—'प्रतरां' सुदीर्घकालं, 'जीवातवे' जीवनाय, किञ्च 'धियः' कर्म्माणि 'साधया' सफलानि कुरु, शिष्टं पूर्व्ववत् ॥ ३ ॥

